Tanjore Sarasvati Mahal Series No. 226.

Rāghavābhyudayam

OF

BHAGAVANTA RAYA MAKHI

॥ श्रीराघवाभ्युदयम् ॥

(श्रीभगवन्तरायमखिप्रणीतम्)

Tanjore Maharaja Serfoji's

Sarasvati Mahal Library, Thanjavur.

1986] [Price Rs. 38/-

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

Tanjore Sarasvati Mahal Series No. 226.

Rāghavābhyudayam

OF

BHAGAVANTA RĀYA MAKHĪ

Edited with Introduction in Sanskrit, Tamil and English

By

P. M. PADMANABHA SARMA, SIROMANI
Vedanta Visarada & Hindi Praveen Pracharak,
Retd. Sanskrit Pandit
Sarasvati Mahal Library, Thanjavur.

TANJORE MAHARAJA SERFOJI'S
SARASVATI MAHAL LIBRARY, THANJAVUR.

*

1985] [Price : Rs. 12—50

0226
Sarasvati Mahal Library, Thanjavur
CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

First Edition : — 1985.

Published by :

TANJORE MAHARAJA SERFOJI'S
SARASVATI MAHAL LIBRARY, THANJAVUR.

Published with the financial assistance from the Ministry of Education and Social Welfare, Govt. of India.

Printed at

T. M. S. S. M. LIBRARY PRESS, THANJAVUR.

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

सरस्वतीमहालय ग्रन्थमालायाः पुष्पम् - २२६.

॥ श्रीराघवाभ्युदयम् ॥

(श्रीभगवन्तरायमखिप्रणीतम्)

सरस्वतीमहालय भूतपूर्वसंस्कृतपण्डितेन

वेदान्तविशारद वेदान्तशिरोमणि हिन्दीप्रवीण प्रचारकवि दक्षाजा

पु. म. पद्मनाभशर्मणा

संशोध्य, संस्कृतद्राविडयाङ्गलभाषाप्रस्तावनासहितं सच्छायं

परिष्कृत्य सम्पादितं

प्रकाशकेन

तंजावूर महाराजाशरभोजी सरस्वतीमहालय ग्रन्थालयेन

प्रकाशितं विजयतेतमाम्

१९८५] © [रु. १२-५०

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

प्रथमावृत्तिः — १९८५.

प्रकाशकः -

तञ्जापुरी महाराजा शरभोजी सरस्वतीमहाल् ग्रन्थालयः, तञ्जापुरी.

मुद्रकः -

सरस्वतीमहाल् ग्रंथालयस्थ मुद्रणालयः, तञ्जापुरी.

CC-0. SaTasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

PUBLISHER'S PREFACE

This Sanskrit drama 'RAGHAVABHYUDAYAM' written by Bhagavantaraya Makhi is published with the Prakrit dialogues and Sanskrit equivalents for the first time from the Sarasvati Mahal Library manuscript (D. No. 4492/B. 5257). Sanskrit dramas, in most of their varieties, are represented in this Library by nearly 500 manuscripts. Writers on Sanskrit dramaturgy generally classify the dramas into ten main divisions (Dasrupakas) and innumerable sub-divisions. The ten main divisions are :- 1, Nataka, 2. Prakarana, 3. Bhana, 4. Prahasana, 5. Dima, 6. Vyayoga, 7. Samavakara, 8. Vithi, 9. Ankaand, 10. Ihamrga. This play comes under the main divisions 'Nataka'. Bhagavantarya Makhi lived in the later half of 17th century and first half of 18th century in Tanjore. His father Gangadhara Makhi served as Minister under the Tanjore Maratha King Venkoji alias Ekoji (1676 — 1683 A. D.) His brother Triyambakaraya Makhi was a minister in the court of the King Shahaji II (1684 — 1711 A. D.)

The author of this play, Bhagavantaraya Makhi was an eminent Vedic scholar. It is a well-known

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

fact that there are several dramas in Sanskrit dealing with the story material of the Ramayana. The Sanskrit poets Bhasan, Bhavabhuti, Murari Ramabhadra Dikshit and others have exploited the story of Ramayana and Bhagavantaraya Makhi has followed this tradition in this work in a successful manner.

The work of editing this drama was entrusted to Thiru P. M. Padmanabha Sarma, Retired Sanskrit Pandit of this Library. Due to his profound knowledge, he has edited this play by giving Sanskrit equivalents for the Prakrit dialogues displaying thoroughness and perscuacity for the benefit of easy understanding to the readers. Our thanks are due to him for the same and also to the Library Press for the neat execution of printing.

It becomes my duty to thank the Government of India for their generous grant for this publication.

T. R. RAMASWAMY, I. A. S.,
District Collector and Director,
T. M. S. S. M. Library.

Thanjavur,
28—1—85.

* * *
*

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

CONTENTS

		Pages.
Publisher's Preface	...	(i — ii)
English Introduction	...	i to v
Tamil Introduction	...	vii to xii
Sanskrit Introduction	...	xiii to xxii
Katha Sangrahah	...	xxiii to xxxviii
Cast of Characters	...	xxxix to XL
Text of the play		
I st Anka	...	1 to 18
II nd ,,	...	18 to 35
III rd ,,	...	35 to 57
IV th ,,	...	57 to 73
V th ,,	...	73 to 108
VI th ,,	...	108 to 127
VII th ,,	...	127 to 140
Index of Slokas	...	141 to 154

CC-0.TSarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

Our Recent Sanskrit Publications

1.	Uddhara Kosam	...	Rs. 8—00
2.	Padarthamala	...	40--00
3.	Murthi Dhyanam	...	12—50
4.	Akasa Bhairava Kalpa	...	2—75
5.	Brahadeeswara Mahatmyam		12—00
6.	Kantimati Parinayam	...	10—00
7.	Sivagnana Bodham	...	3—00
8.	Sahavilasa Geetham	...	3—50
9.	Bhuti Mahatmyam	...	5—00
10.	Sivarahasyam I, II, III	...	40—00
11.	Sivarahasyam IV, V, VI	...	40—00
12.	Agamadikshavidhi	...	4—00
13.	Kalpalatha	...	6—00
14.	Rysya Sringa Samhita	...	42--50
15.	Nyaya Kaustubha	...	65—00
16.	Siddhanta Ratnavali	...	40—00
17.	Sivatattva Ratna Kalika	...	25—00
18.	Panchakala Kiriya Deepam	...	11—00
19	Dharma Vijaya Champu	...	3—75
20.	Shaddarsani Siddhanta Sangraha		4—00

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

PREFACE

Like the various literatures that came into being in Tamil in the literary forms prose, poetry and drama we also have in Sanskrit different literatures in the forms GADHYAM. PADHYAM, CHAMPU and DRAMA. Amongst them drama became a popular art form both with the lettered and the unlettered. RAGHAVAB-YUDHAYAM is one such play that became very popular. Though its source material is THE RAMAYANA it largely relies on imagination suiting the emotive states.

From time immemorial Thanjavur has enjoyed a unique glory and historical importance. The Big Temple built by Rajaraja Chola, the magnificent palace of the Nayakka kings and the Saraswathi Mahal Library which is an off-shoot of Maratta Renaissance — all remain as historical evidences and symbols of our art and culture which have an international reputation.

The river Ponni. also known as Cauvery, girdles the Chola kingdom making it the granary of South India. The fertility of the soil is equally matched by its fertile culture and the growth of art and literature. On the banks of Cauvery innumerable poets, scholars and pandits flourished and the rulers of the kingdom invited scholars from the North and patronised them.

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

From 1676 A.D. to 1855 A.D ten Maratta Kings ruled over Thanjavur for a period of 179 years. The first among them was Ekoji or Venkoji who ruled from 1676 to 1683. It was in his court that the father of the author of this play served as a minister.

Baghawantharaya mahi is the author of this play and his father Gangadhara mahi. the minister, was a profound scholar in the Vedas and the Sastras. He belongs to the Bharadwaja Gothra and his three worthy sons were Narasimha-raya mahi, Triyambakaraya mahi and Bagha-wantaraya mahi. It is evident from the suffix 'mahi' that they were not only well versed in the Vedas and the Sastras but also performed the yagas like the Somayaga as ordained in the Vedas. There are also evidences to this effect. A few years later Gangadhara mahi retired from active service after making his son Narasimharayamahi the minister to king Ekoji. Like his father Narasimharaya mahi also discharged his duties and endeared himself to the king.

After Ekoji. Shahaji II ruled over Thanjavur from 1684—1711. By birth he was a poet and a musician. It is no exaggeration to say that he had competence in many languages and the scholars of his era called him 'Abinava Bhoja.' Triyambakaraya mahi, the second son of Ganga-dhara mahi became a minister in the court of this ruler. He too was interested in spiritual pursuits besides the material, and retired from service

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

after making Anandaraya mahi, the son of his brother Narasimharaya mahi, who was still a boy, a minister to King Shahaji. The author of this book, Baghawantharaya mahi, though not a minister to any king earned through his scholarship a reputation what his brothers earned through the office of a minister and shone as a brilliant star in the literary firmament. The details given above are all stated by the author in his preface to his play.

Though man can attain eternal bliss in various ways it is easier to attain it through a study of the Epics and Dramas. As a literary form drama is superior to the Epic because of its ability to attract and to have an immediate impact on the common man. That explains why the great writers exploited this art form to convey in a simple way the abstract and the complex. Drama, as a literary form has the power to appeal to the heart through the senses and explain difficult concepts in an easy way.

There is an ancient Sanskrit saying that 'Drama is the touchstone of a great poet.' Our PURANAS, ALANKARA SASTRAS and BHARATA SASTRA reaffirm this view point. Again, scholars like Baghavantharaya mahi though proficient in the Vedas and pursued the Vedic Marga through performing yagas, recognised the importance of drama as an art form and wrote many plays. RAGHAVABYUDHAM is one such play written by Baghavantharaya mahi.

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

In Sanskrit Literature, rules have been laid down for the structure of a play, the traits of a hero, the qualities of a heroine, the number of Acts, the dominant motif, characterisation, permissible descriptions, the style of the dialogue the rhythm of the slokas etc. Following the great tradition of keeping THE RAMAYANA and THE MAHABHARATHA as the nucleus, it has become customary to write plays centred around the characters of these epics. For example, Bhasan, Bhavabhuthi, Murari, Raja-sekharan, Ramabadhra Dikshit, Chudamani Dikshit, Jayadeva, Sakthibadhra are some of the poets who have successfully exploited the story material of THE RAMAYANA, the reason being that Rama was a perfect hero and Sita a perfect heroine. Following this tradition Baghavantha-raya mahi has writteu the play Raghavabyudha-yam with the Ramayana story as its nucleus.

Valmiki's RAMAYANA is an epic of renoun. Hence the dramatist handles the theme in a different way by abandoning the traditional way of story telling and seeks to alter the progression of events to suit the varying emotive states. This could be seen in the synopsis of the play.

The author, born in BHARADWAJA GOTHRA has to his credit a poem 'Mukhunda Vilasam' and a 'Champu Kavya entitled "Uttara Champu". I had the privilege of publishing the Champu Kavya in the journal of the Library. Now I consider myself singularly fortunate to be able to publish this play.

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

There is only one palmleaf script of this play extant in this library. This could be easily understood only if the author stands by and interprets. This play could not be understood for a long time because of the lack of Sanskrit equivalents for the Prakruta script in which the dialogues are written. That explains why the play was not published all these years.

I hope the reading public will easily understand the play now that the Prakrit dialogues have been set in sanskrit equivalents.

I am deeply indebted to the authorities of the library who have entrusted me with this work, in particular to Sri T. R. Ramaswamy, I. A. S., Collector of Thanjavur District, and to Sri A. Panchanathan, M. A., B Lib. Sc., the Administrative Officer i/c who gave me all support and help. I am also thankful to the printers for their neat execution and their co-operation in bringing out an error-free edition. I appeal to the reading public to enjoy reading this play and I crave their pardon if errors have crept in unwittingly.

P. M. PADMANABHA SARMA,
Retired Sanskrit Pandit,
T. M. S. S. M. Library, Thanjavur.

Thanjavur,
2—12—85

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

NOTE

The prices quoted are all net. Packing and postage will be charged Extra.

Purchasers of books, sending the cost in advance must include the value of sufficient stamps for Postage and Registration.

A discount of 20% will be allowed on all orders for 5 copies and more of the same Publication as also on all orders for the value of Rs. 50/- and upwards. No discount will be allowed for purchase of Journals and Catalogues.

All orders for Books, Journals, Catalogues and other communications must be addressed to

The Administrative Officer,
T.M.S.S.M. LIBRARY THANJAVUR-613 009.
TAMILNADU, INDIA,

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

முகவுரை

ரசிகப்பெருமக்களே !

வணக்கம்.

தமிழில் இயல், இசை, நாடகம் என்ற துறைகளில் எழுந்த பல இலக்கியங்களைப் போல, ஸம்ஸ்கிருதமொழியில் கத்யம், பத்யம், சம்பூ, நாடகம் போன்ற வகைகளாகப் பற்பல இலக்கியங்கள் தோன்றின. அங்ஙனம் தோன்றிய இலக்கியங்களில் நாடக இலக்கியங்கள், படித்தவர்கள், பாமரர்களின் மத்தியில் புகழ் பெற்றன. அங்ஙனம் புகழ் பெற்ற நாடகங்களில் "ராகவாப்யுதயம்" என்ற இந்த நாடகமுமொன்று. இந்த நாடகக்கதை ராமாயணமா யிருப்பினும் ரச பாவங்களுக்குத் தக்கபடி ஆங்காங்கு கல்பனையை அடிப்படையாகக் கொண்டும் புனையப் பெற்றுள்ளது.

தொன்னெடுங்காலமாகவே தஞ்சைக்குத் தனிச் சிறப்பும், சரித்திரமுக்கியத்துவமுண்டு. ராஜராஜசோழன் எழுப்பிய பெரியகோயிலும், நாயக்கமன்னர்களால் எழுப் பப் பட்ட அரண்மனையும், மராட்டியர் காலத்தில் மறு மலர்ச்சியுடன் விளங்கிய சரஸ்வதிமஹால் நூல்நிலையமும் சரித்திர சான்றுகளாகவும், நமது கலை பண்பாடுகளைப் பாரெங்கும் பறைசாற்றும் சின்னங்களாகவும் திகழ்கின்றன.

காவிரி என்று அழைக்கப்பெறும் பொன்னியின் வளங் கொழிக்கும் அரவணைப்போல் சோழநாட்டைசோறுடைத்த நாடாக மாற்றுகிறாள். ஆற்றுப் பெருக்கால் நிலவளத் துடன் கலைவளத்தையும், கல்வி வளத்தையும் ஊட்டுகிறாள். இவளது இருமருங்கிலும் எண்ணற்ற கவிஞர்களும்,அறிஞர். களும், சாஸ்திர விற்பன்னர்களும் தோன்றினர். வட நாட்டிலிருந்தும் அறிஞர்களை அழைத்து ஆதரவளித்துப் போற்றினர் இங்கு அரசாண்ட மன்னர்கள்.

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

அவர்களில் கி. பி. 1676 முதல் 1855 வரை பத்து மராட்டிய மன்னர்கள் 179 ஆண்டுகள் தஞ்சையை அரசாண்டனர். இவர்களில் முதலாவதாக "ஏகோஜி" அல்லது வெங்கோஜி என்ற மன்னர் கி. பி. 1676 முதல் 1683 வரை தஞ்சையில் அரசாண்டார். இம் மன்னனின் அவையில் தான் இந்நூலாசிரியரின் தந்தையார் அமைச்சராகப் பணியாற்றியுள்ளார்.

இந்த நாடகத்தை இயற்றியவர் "பகவந்தராய மகி" என்னும் புலவர் பெருமான். இவருடைய தந்தையார், கங்காதரமகி என்னும் பெரியார் ஏகோஜி மன்னனின் அவையில் அமைச்சராக இருந்தார். இவர் வேதங்களிலும் சாஸ்திரங்களிலும் கரைகண்டவர். இவர் பாரத்வாஜ கோத்திரத்திலுதித்தவர். இவருக்கு "நரசிம்மராய மகி" "திரியம்பகராய மகி" "பகவந்தராய மகி" என்று மும்மணிகள் போல் மூன்று புதல்வர்கள் உண்டு. இவர்களின் பெயர்களின் கடைசியில் "மகி" என்ற சொல் அடைமொழியாயிருப்பதால் வேதங்களிலும் சாத்திரங்களிலும் இவர்கள் புலமைப் பெற்றதோடு, வேதங்களில் கூறப்பட்ட ஸோம யாகம் முதலிய யாகங்களையும் செய்துள்ளார்கள் என்று புலனுகிறது. இதற்குச் சான்றுகளும் உள. தந்தை, கங்காதரமகி, சிறிது காலத்திற்குப் பிறகு, கர்ம மார்க்கத்தில் ஈடுபட்டதன் காரணமாக, தன் முதல் புதல்வன் "நரசிம்மராயமகியை" ஏகோஜி மன்னனுக்கு அமைச்சராக்கி விட்டு, தான் ஓய்வு பெற்ருர். அமைச்சரான நரசிம்மராய மகியும், தன் தந்தையைப் போலவே ஏகோஜி மன்னனுக்குப் பிரியமானுர்.

ஏகோஜிக்குப் பிறகு கி. பி. 1684 முதல் 1711 வரை இரண்டாம் ஷாஹஜி என்ற மன்னன் தஞ்சையில் அரசு செய்தார். இம்மன்னன் பிறவியிலேயே கவியாகவும் இசைப் புலவனுகவும் திகழ்ந்தார். சிறந்த வாக்கேயக் காரர். பன்மொழிப் புலவர் எனில் மிகையிலே. இவரை, அக்காலத்திய புலவர்கள் "அபிநவ போஜன்" எனப்

CC-0. SaraTvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

போற்றிப் புகழ்ந்தனர். இம்மன்னனுடைய அவைக்கு கங்காதரமகியின் இரண்டாவது புதல்வர் "திரியம்பகராய மகி" அமைச்சரானர்.

இவரும். கர்ம மார்க்கத்துடன் ஞான மார்க்கத்தில் ஈடுபாடு உடையவராய், தன் மூத்த சகோதரரான நரசிம்ம ராய மகியின் புதல்வன், ஆனந்தராயமகி, சிறுவனுக இருக்கும்பொழுதே ஷாஜி மன்னருக்கு 'அமைச்சராக்கிவிட்டு தான் ஓய்வு பெற்ருர். நம் நூலாசிரியர் பகவந்தராய மகியோ எந்த அரசனுக்கும் அமைச்சராக இல்லாவிடினும், அமைச்சர்களாக இருந்த தன் சகோதரர்களின் புகழை, புலமையால் சம்பாதித்து இலக்கிய உலகில் நக்ஷத்திரமாகத் திகழ்ந்தார் என்ருல் மிகையாகாது. ஷெ கூறிய விஷயங்களெல்லாம் இந் நூலாசிரியரால் இந்நூலின் முகவுரையில் கூறப்பட்டுள்ளன.

மனிதன் பேரின்பத்தை அடைய பல வழிகள் வகுப்பட்டிருந்தாலும், காப்பிய மூலமாகவோ, நாடக மூலமாகவோ அதை அடைவது மிகச்சுலபமென்பது யாவரும் அறிந்ததே. நாடகம், காப்பியத்தை விட சிறந்ததாகக் கருதப்படுகிறது. அது பாமர மக்களேயும் கவரவல்லது அதனுல்தான் முன்ஞேர்கள் அரிய விஷயங்களேயும் சுலபமாகத் தெரிவிப்பதற்கு நாடகத்தைக் கையாண்டனர். நாடகம் பல புலன்களின் மூலம் மக்களின் மனதில் கடினமான விஷயங்களேயும் நல்ல முறையில் எளிதாகப் பதிய வைக்கும் தன்மையுடையது.

"சிறந்த கவி என்பதற்கு நாடகம் ஓர் உரைகல்" என்பது வடமொழியில் ஓர் பழமொழியாகும். நம் புராணங்களும் அலங்கார சாத்திரங்களும், பரதசாத்திரமும் இக்கருத்தினே உறுதிப்படுத்துகின்றன. இத்துடன் "பகவந்தராயமகி" போன்ற புலவர்களும் வேத வேதாந்தங்களில் சிறந்த புலமை பெற்றவர்களாக இருப்பினும், வேள்விகள் மூலம்

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

வைதிக மார்க்கத்தைக் கடைபிடிப்பவர்களாக இருப்பினும் நாடகத்திற்கும் சிறந்த இடம் தந்து நாடகங்களை இயற்றியுள்ளார்கள். நம் நூலாசிரியர் பகவந்தராயமகியும் "ராகவாப்யுதயம்" என்ற இந்த நாடகத்தை இயற்றியுள்ளார்.

வடமொழியில் நாடகத்திற்குரிய கதையமைப்பு, கதாநாயகனின் குணச் சிறப்புகள், கதாநாயகியின் பண்புகள், அங்கங்களின் எண்ணிக்கை, கதையின் முக்கிய 'ரசம்' ஏனைய ரசங்களின் அமைப்பு, பாத்திரங்களின், படைப்பு, அனுமதிக்கப்பட்ட வர்ணனைகள், வசனங்களின் நடை, சுலோகங்களின் சந்தங்கள், முதலிய பற்பல விஷயங்கள் இலக்கணக்காரர்களால் வழி வகுக்கப்பட்டிருக்கின்றன. அம்மரபைப் பின்பற்றி இராமாயணம், மகாபாரதம் போன்ற சிறந்த இதிகாசங்களை முதல் நூலாகக் கொண்டு அவைகளில் உள்ள சிறந்த பாத்திரங்களை வைத்துக் கதையைச் சிறப்புறச் சித்தரித்து நாடகத்தை இயற்றுதல் பரம்பரையாக வந்த கவிகளின் மரபு. உதாரணமாக, வடமொழியில் இராமாயணக் கதைப்பொருளை நாடகமாக இயற்றியப் பெரும் புகழ்பெற்ற கவிகளுள், பாசன் பவபூதி, முராரி, இராசசேகரன், இராமபத்ர தீக்ஷிதர், சூடாமணி தீக்ஷிதர், ஜயதேவர், சக்திபத்ரர், முதலியோர் சிலராவர். ஏனெனில் இராமனைப் போன்று சிறந்த கதாநாயகனும், சீதையைப் போன்று சிறந்த கதாநாயகியும் கிடைப்பதற்கரியவர்கள். இவ்வழியைப் பின்பற்றியே, பகவந்தராயமகியும் இராமாயணக் கதையை மூலதனமாகக் கொண்டு ராகவாப்யுதயம் என்ற நாடகத்தை இயற்றியுள்ளார்.

வால்மீகி ராமாயணம் உலகப் பிரசித்தமானபடியால் அக்கதையை அவ்வாறே கையாள்வதை விடுத்து இந்த நாடகத்தில் ரசங்களுக்குத் தக்கவாறு கதைப்போக்கை இக்கவி எவ்வாறு மாற்றியமைத்துள்ளார் என்பதைக் "கதைச் சுருக்கம்" என்ற தலைப்பில் காணலாம்.

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

இந்நூலாசிரியர் பாரத்வாஜ கோத்திரத்தில் உதித்தவர். இவர், ''முகுந்த விலாசம்'' என்ற பத்ய காவ்யத்தையும்'', உத்தரசம்பூ'' என்ற சம்பு காவ்யத்தையும் இயற்றியுள்ளார். சம்பூ காவ்யம் இந்நூலக ஜர்னலில் அடியேனால் வெளியிடப்பட்டது. இப்பொழுது இந்த நாடகத்தை வெளியிடுவது மூலம் என்னை ''தன்யனாக''க் கருதுகிறேன்.

''ராகவாப்யுதயம்'' என்னும் இந்த நாடகத்தின் மூலச்சுவடி ஒன்றே ஒன்றுதான் இந்த நூலகத்தில் உள்ளது. அதை எழுதியவர். அவரே பக்கத்தில் இருந்து விளக்கினால் தான் எளிதில் புரிந்துகொள்ள முடியும். இந்த சுவடியில் பிராகிருதமொழியில் எழுதப்பட்ட வசனங்களுக்கு உரிய ஸம்ஸ்கிருத விளக்கமின்மையால் யாவரும் எளிதில் புரிந்துகொள்ள முடியாமல் இருந்தது. இதன் காரணமாகவே பல்லாண்டுகளாகியும் இந்நூல் அச்சாகாமல் இருந்திருக்கிறது.

ஆகவே பிராகிருத வசனங்களுக்கு உரிய ஸம்ஸ்கிருதச் சொற்களை அமைத்து, தற்போது இந்நூல் வெளியிடப்படுவதால் யாவரும் எளிதில் அறிந்துகொள்ள முடியும் என்று நம்புகிறேன்.

இந்நூலை வெளியிடுவதற்குரிய பணியை எனக்கு அளித்த இந்த நூலகத்தின் நிர்வாக இயக்குனரும், மாவட்ட ஆட்சியருமான திரு. T. R. ராமசாமி, I. A. S., அவர்களுக்கும், இந்நூல் சிறப்பாக வெளிவர அனைத்து உதவிகளையும் செய்த இந்நூலக நிர்வாக அதிகாரி, திரு. A. பஞ்சநாதன், M. A., B. Lib. Sc. அவர்களுக்கும் எனது நன்றியைத் தெரிவித்துக் கொள்கிறேன். பிழையின்றி இந்நூல் வெளிவர என்னுடன் ஒத்துழைத்த நூலகத்தின் அச்சகப் பிரிவினர்களுக்கும் என் நன்றி உரித்தாகுக.

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

இந்நூலைப் படித்துச் சிறிதளவேனும் பயன்பெறும் ரசிகப் பெருமக்களுக்கு எனது நன்றியைத் தெரிவிப்பதுடன் “பிழையிருப்பின் பொருத்தருள்க” என்ற வேண்டுகோளுடன் உரையை முடிக்கின்றேன்.

வணக்கம்.

[illegible] சர்மா,
முன்னாள் ஸம்ஸ்கிருதப் பண்டிதர்
சரஸ்வதி மஹால் நூலகம், தஞ்சாவூர்,

தஞ்சாவூர்,
25—10—85

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

॥ श्रीः ॥

॥ प्रस्तावना ॥

गङ्गाधरेन्द्रमखिराजसुतं वरेण्यं
श्रीत्र्यम्बकार्यनरसिंहसहोदरं तम् ।
चोलावनीश्वरशाहजिमाननीयं
ईडे महाकविनुतं भगवन्तरायम् ॥

अयि भोः, निखिलभुवलयतिलकायमानकविकुलसङ्कलितविविध-साहितीततिविनिष्यन्दमानपीयूषवर्षाप्लावितहृष्टपुष्टमतयः ! रसिकतल्लजाः !!

इदमिदानीमुपहारीक्रियते, सरसकवितारसास्वादमेदुराणां सहृदयानां तत्रभवतां करकमलयोः, यत् श्रुतपूर्वमपि, न दृष्टचरमेतावदवधि, रसिक-जनमोदावहं राघवाभ्युदयं नाम नाटकं निर्यत्ननिर्यन्माध्वीकभरितं महाकवेः भगवन्तरायस्य कृतिवरम् ।

" कोऽयं कविः, कदासीच्च "

सुविदितमेवैतत् तत्रभवतां, यत्तञ्जपुरीयसरस्वतीमहालयः, विजय-नगरीयनायकभूनायकैः संस्थापितोऽपि तदनन्तरं सिंहासनमधिरूढैः भोसल-कुलजन्यैः निर्जितविविधजन्यैः महाराष्ट्रीयराजन्यमूर्धन्यैः परिपालितः, पोषितश्च, तन्नाम्नैव विलसतितरामिति ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

1675 to 1855 तञ्जपुरीमधिष्ठाय, शासत्सु दशरथभगीरथ भरतप्रतिमेषु महाराष्ट्रीयेषु भोसलकुलजन्यराजेषु, 1676 प्रभृति 1683 पर्यन्ते समये, प्रथम इव पाण्डवेषु, प्रकटितधर्मैकरतिः, शासने पाकशासन-इवोत्तमः, पुण्यसञ्चय इव प्रजानां, मूलस्तम्भ इव भोसलवंशीयानां, भूपो बभूव वेङ्काजी अथवा एकोजी नाम ।

आसीत्तस्य च राज्ञः, वसिष्ठ इव दशरथस्य, प्रकटितब्रह्मतेजाः, बृहस्पतिरिव महेन्द्रस्य, वश्यवाक् कालिदास इव भोजस्य, कविकुलकोकिलः, भृगुरिव वदान्यवरेण्यस्य बलेः, सर्वज्ञः, सुचरितः, दिगन्तविश्रान्तकीर्तिः भारद्वाजगोत्रः बाबाजीयज्वात्मजः, गङ्गाधराध्वरीन्द्रो नाम सचिवोत्तमः ।

तस्य चाध्वरीन्द्रस्य, त्रयीव, त्रयः पुत्रा अभूवन् नृसिंहाध्वरी, त्र्यम्बकरायमखी, भगवन्तरायमखी इति । ते त्रयोऽपि, यज्ञेन दीक्षिताः यजनयाजनादिकर्मसु शिक्षिताः मातृवाण्या महाराष्ट्रीया अपि गीर्वाणवाण्याम-प्रतिमपण्डिताः भारतीयाश्च, भ्रातृसम्पत्त्या सद्वितीया अपि श्रुतिस्मृति-पुराणेतिहासेषु अद्वितीयाः, स्वकुलदैवतेन भगवता महादेवेन परतन्त्रा अपि सर्वतन्त्रमन्त्रेषु स्वतन्त्राः आसन् ।

नृसिंहरायमखी, स्वपितुरनन्तरं एकोजिमहीपालस्य अमात्यपद-मलङ्कुर्वाणः स्वपितेव रराज । तदनन्तरजः त्र्यम्बकरायमखी, एकोजि-महीपालेन स्वबालक इव लालितः, श्रुतिस्मृतीतिहासपुराणादिषु नितान्तं प्रावीण्यमुपगतः, एकोजिक्ष्मापतेरनन्तरं 1684 प्रभृति 1711 पर्यन्ते समये सिंहासनमधिरूढेन एकोजीदीपाम्बागर्भसम्भवेन "अभिनवभोज" इति

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

तत्कालकविकुलप्रशंसिनेन जन्मना महाकविना सुगृहीतनामधेयेन शाहजी महाराजेनामात्यपदवीमध्यारोपितः, तञ्जपुरीमण्डलान्तर्गते "स्वामिमलै" क्षेत्रे महान्तं यज्ञं ततानेति श्रूयते। एवं स्वेन विबुधानामपि बुधानाह्लादयन्, सर्वजनहिताय श्रीमद्वाल्मीकिरामायणस्य "धर्माकूतं" नाम व्याख्यां विरच्य निरतिशयं यशो लेभे। किं बहुना, षड्दर्शनपारङ्गतोऽयं, स्वपूर्वजस्य नृसिंहरायमखिनः सुपुत्रे कुमारे आनन्दरायमखिनि, साचिव्यधुरं निक्षिप्य, स्वयं वार्धकान्निष्ठः अभवदिति नाटकस्यास्य प्रस्तावनायां तदनन्तरजः भगवन्तरायमखयेव प्रस्तौति।

भगवन्तरायमखी पूर्वं प्रस्तापितस्य त्र्यम्बकरायमखिनस्सोदर एवेति निर्दिष्टपूर्वमेतत्। अयमेव महाकविः, इदानीमस्माभिः इदम्प्रथमतया प्रकटीक्रियमाणस्य नाटकस्यास्य ग्रन्थकर्ता। यथा वा, स्वभ्रातरौ नृसिंहरायत्र्यम्बकरायमखिनौ, राजामात्यपदमावहन्तौ महतीं यशःपरम्परां आपतुः, तथैव, कविकुल चक्रवर्तिपदमधिरूढोऽयं कविः बहूनि ग्रन्थरत्नानि निर्माय, स्वकीर्तिपताकां गगनचुम्बीचकारेति नातिशयोक्तिः। न केवलमिदं, अपितु, शाहजीमहाराजसभामलङ्कुर्वाणेन प्रत्यग्रपतञ्जलिना द्वितीयप्राचेतसेन जानकीपरिणयादिनानाविधग्रन्थनिर्मात्रा कुण्डिनकुलमण्डनेन श्रीरामभद्रदीक्षितेन्द्रेण सशिरःकम्पं नाटकमिदं अस्मत्कविप्रणीतं नितान्तं श्लाघितमित्यहो देशः परमामोदः। प्रस्तुतस्यास्य विषयजातस्य एतन्नाटकस्था प्रस्तावनैव प्रमाणम्।

ग्रन्थाश्च कति वा कृताः

प्रातस्स्मरणीयेन भगवन्तरायेन कृतानि ग्रन्थरत्नानि त्रीण्येवात्र महालये समुपलभ्यन्ते। मुकुन्दविलासाख्यं पद्यकाव्यं, उत्तरकाण्डचम्पूः,

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

राघवाभ्युदयं नाम नाटकमिति । एषु चम्पूरामायणपूरकत्वेन कृता राजचूडामणिदीक्षितस्य युद्धकाण्डचम्पूः, भगवन्तरायस्य उत्तरकाण्डचम्पूः इति ग्रन्थद्वयमस्माभिरेव प्रकटीकृतम् । इदानीं नाटकस्यास्य प्रकटीकरणेन अनन्यधन्यमात्मानं मन्यामहे ।

कवेरस्य वंशवृक्षः

बाबाजीयज्वा

|

गङ्गाधरमखी

|

नरसिंहरायमखी — त्र्यम्बकरायमखी — भगवन्तरायमखी

नरसिंहरायमखी

|

आनन्दरायमखी

काव्येषु नाटकं रम्यम्

सहृदयाः, यद्यपि काव्यादीनामपि पुमर्थसाधकत्वं प्रतिपादितमेव यतः, “निर्दोषं गुणवत्काव्य”मित्यादिना सरस्वतीकण्ठाभरणे भोजेन, “धर्मार्थकाममोक्षेषु” इत्यादिना रसप्रकाशकारेण, “काव्यं यशसेऽर्थकृते” इत्यादिना काव्यप्रकाशकारेण, एवमन्यान्यैश्च विशिष्टकाव्यकरणादपि प्रयोजनमभिप्रेतमापद्यत एवेति प्रपञ्चितत्वात्, तथापि, तत्काव्यं श्रव्यदृश्यात्मना द्विधा विभक्तं सत्, प्रथमाद्द्वितीयस्यैव सर्वजनरञ्जकत्वात् सुखेन पुरुषार्थप्रदत्वं सम्भवतीति अहो नाटकस्य सर्वश्रेष्ठता न तिरोहिता ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

ये सुकुमारमतयः राजकुमारप्रभृतयः "निसर्गदुर्बोधं अतिनीरसं खल्वेतत् । कथमिवात्मानं निष्फलमत्रावसादयामः" इति सन्ततमालोचयन्तः, शास्त्रे न प्रवर्तन्ते, तेऽपि स्वादुकाव्यरससंमिश्रं शास्त्रमपि, "प्रथमं लीढमधवः पिबन्ति कटुकौषधं" इति न्यायेनोपयुञ्जते । तेऽपि चतुर्वर्गोपायेषु अवश्यं व्युत्पादनीया इति नाटकस्य गाम्भीर्यं न केनापि तिरोहितुं शक्यते ।

नाटकस्य वेदस्वरूपत्वमेव प्रतिपादयति कश्चित् - "जग्राह पाठ्यमृग्वेदा"दित्यादिना । "देवानामिदमामनन्ति मुनयः कान्तं क्रतुं चाक्षुष"मिति कविकुलतिलकस्य कालिदासस्योक्तिं को न जानाति । मुरारिर्नाम महाकविः, "शास्त्रामृतमपि काव्यात्मनैव परिणमते" इति कुसुमसुकुमारस्य नाटकस्य शास्त्रगाम्भीर्यं प्रस्तौति —

चेतश्शुक्तिकया निपीय शतशः शास्त्रामृतानि क्रमात्
वान्तैरक्षरमूर्तिभिः सुकविना मुक्ताफलैर्गुम्भिताः ।
उन्मीलन्कमनीयनायकगुणग्रामोपसंवल्गन-
प्रौढाहङ्कृतयः लुठन्ति सुहृदां कण्ठेषु हारस्रजः ॥

इति । युक्तं चैतत् । यतः —

लीलेयं धनिनां, धृतिस्तु सुखिनां, शिक्षा प्रमत्तात्मनां,
संसारस्थितिरीदृशीति विरतिः नानाविधा योगिनाम् ।
प्रीतिः काव्यरसाशिनां, नवनवा कीर्तिः कवीनामियं
विद्या, नाटकसंज्ञिता भगवती विश्वोपकारक्षमा ॥

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

अग्निवाय्वादिपुराणेष्वपि नाटकस्य महिमा गीयत इति द्रढयति अमु-मेवार्थम्। एवं चतुर्विधपुरुषार्थप्रदत्वान्नाटकस्य तन्निर्माणे वैदिकप्रतिष्ठापकानां दीक्षितेन्द्राणामपि नैसर्गिकी प्रवृत्तिः दरीदृश्यत इति पश्यामः। किमुत, कालिदासादिकवियशःप्रार्थिनां कवीनामित्यत्र न काप्यत्युक्तिः।

तत्राऽपि रामसत्कथा

राघवाभ्युदयं नाम नाटकरत्नमिदं सप्ताङ्कमपि मृगाङ्कमण्डलमिवासेचनकं भवति रसिकनलजानाम्। नाटकस्यास्य नाम्नैव विशदीभवति मूलकथा केति। प्राचेतसोपज्ञं रामायणं सार्वजनीनमिति तत्कथाप्रस्तावप्रयत्नं विहाय, प्रस्तावान्तरे क्रियते प्रवृत्तिः। यद्यपि रसैकतत्परेण कविना प्राचेतसोपज्ञाद्रामायणात् अन्यथाभावेन तत्र तत्र कथाप्रस्तावः सङ्घटितः, तथापि पश्चात् "प्रत्यङ्ककथासङ्ग्रहप्रस्तावावसरे" नाटकस्य कथासङ्ग्रहः कथयिष्यत-एव।

यदि कश्चित्कविः नाटकं चिकीर्षति, कीर्तिं च महतीं प्राप्तुमिच्छति चेत्तस्य विना रामचरितं किमन्यदस्ति। गर्जितं किल कविकुलकेसरिणा मुरारिणा

"यदि क्षुण्णं पूर्वैरिति जहति रामस्य चरितं
गुणैरेतावद्भिः जगति पुनरन्यो जयति कः" ॥ इति।

युक्तमुक्तमभियुक्तेन – "विश्रामस्थानमेकं कविकुलवचसामिति।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

रामायणकथां मूलधनं प्राप्याढ्यै: बहुभि: कविभि: बहुविधानि नाटकानि निर्मितानि । यथा, मुरारि: अनर्घराघवं, भवभूति: महावीरोत्तर-रामचरिते, भास: प्रतिमाभिषेकनाटके, रामभद्रदीक्षित: जानकीपरिणयं, राजचूडामणिदीक्षित: आनन्दराघवं, जयदेव: प्रसन्नराघवं, शक्तिभद्र: आश्चर्यचूडामणिं, कश्चिदुन्मत्तराघवं, एवमादय: कवय: एवमादीनि नाटकानि विरचयामासुरिति चेत्तस्य किं वा कारणं भवितुमर्हति ?

प्रख्यातवंशो राजर्षि: धीरोदात्त: प्रतापवान् ।
दिव्योऽथ दिव्यादिव्यो वा गुणवान्नायको मत: ।।

इत्युक्तलक्षण: नायक: राममन्तरा को वा भवितुमर्हति ? अतोऽस्माकं कवि: भगवन्तरायोऽपि रामायणमेव शरणमगादित्यत्र न कापि संशीति: ।

राघवाभ्युदयस्यास्य वैशिष्ट्यं च विचिन्त्यते

"सूत्रधार: पठेत्तत्र मध्यमं स्वरमाश्रित: ।
नान्दीं पठेद्द्वादशभि: अष्टाभिर्वाप्यलङ्कृताम् ।।

इति लक्षणानुसारमत्र नाटकेऽष्टपदां नान्दीं, विघ्नविघातशान्तये स्वेष्ट-देवताया: अर्धनारीश्वरस्याशीर्वादात्मिकां प्रस्तौति । नाटकेऽस्मिन् श्रीरामभद्र-एव नायक: । स च पूर्वोक्तलक्षणप्रकारेण, धीरोदात्तो, दिव्यादिव्यश्च । रसश्च शृङ्गार: । "एक एव भवेदङ्गी शृङ्गारो वीर एव वा" इति लक्षणेन स चाङ्गी । अङ्गमन्ये रसास्सर्वे ।

CC-0.TSarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

स च शृङ्गारः ग्रन्थादारभ्य आन्तमविच्छेदेन वर्तमानः, विच्छिन्नोऽपि मुखप्रतिमुखप्रमुखैस्सन्ध्यङ्गैः सन्धितः, आनन्दरूपतया परिणमत इति नाटकस्यास्य नामापि सार्थकं भवति । रसान्तराणि नायकाश्रयत्वेन अथवा तदन्याश्रयत्वेन वर्ण्यमानान्यपि शृङ्गारस्य प्राधान्यं न घ्नन्त्येव ।

यथाऽर्थवादात्मकानि वाक्यानि भिन्नत्वेन वर्तमानान्यपि विधिप्रतिपादित-यागादिवाक्येन एकतां नीतानि, यागादिगुणोत्कर्षमेव प्रतिपादयन्ति इति मीमांसका मन्यन्ते, यथा वा जीवब्रह्मप्रतिपादकानि वाक्यानि भिन्नत्वेन वर्तमानान्यपि तत्त्वमस्यादिप्रतिपादकाभेदवाक्येन एकतां नीतानि, अभेदमेव द्रढयन्ति इति औपनिषदमतावलम्बिनः अभिप्रयन्ति, तथैव नायकाश्रयत्वेन तदितराश्रयत्वेन वा तत्तत्कथाविशेषेषु वर्तमानान्यपि रसान्तराणि प्रधान-रसस्यैवोपकार्योपकारकभावमेव प्राप्नुवन्ति, प्रधानस्य प्राधान्यं पोषयन्त्येवेति आलङ्कारिकाणां राद्धान्तः । तथा च प्रधानस्य शृङ्गारस्य प्राधान्यं, तदितरेषां अप्राधान्यं च सिद्धम् ।

नायिका जनकराजपुत्री सीतैव । साऽवस्थाभेदेन क्रमशः मुग्धा, मध्या, प्रौढा चेति त्रिधेत्युच्यते । कविरेव तत्र तत्र नायिकाया अवस्था-भेदं वर्णयति । सोदाहरणैः कविवचोभिः यद्यपि प्रतिपादयितुं शक्यते, तथापि विस्तरभयाद्रसिकानां पक्षे निक्षिप्यते । नाटकेऽस्मिन् , सन्धि-निर्वहणं कथं जातं ? सन्ध्यङ्गानि तत्र तत्र कथं प्रस्तापितानि ? के के रसाः कविना प्रतिपादिताः, तदर्थं कथं कथापरिवर्तनं कृतं ? अन्तर्नाटिकायाः प्रयोजनं किं ? प्रतिपात्रं चरित्रचित्रणं कथं ? इत्येवमादयो बहवो विषयाः

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

प्रतिपादनीया वर्तन्त इति जानीमः, तथापि कालस्थितिमनुसृत्य विस्तरभयात्तत्सर्वं परित्यजामः. प्रार्थयामश्च प्रियपाठकान् "क्षन्यतामयं जन" इति ।

" मातृकाया विवरणम् "

विदितमेवैतत्सर्वेषां सङ्ख्यावतां, यत्तञ्जपुरीयसरस्वतीमहालयः भोसलकुलमन्येन धन्यधन्येन शरभोजिमहाराजेन स्थापितः पोषितश्च विलसतितरामिति । तत्र राघवाभ्युदयं नाम नाटकं कागदपत्रात्मिकमातृकारूपेण एकमेव वर्तते । मातृकाया अक्षराणि प्रमादबहुलानि दुरूहाणि च । तल्लेखक एव पठितुं प्रभवति, नान्यः । नाटकस्यास्य प्राकृतवचनानां सर्वथा संस्कृतमयी च्छाया न दृश्यते । अत एव एतावत्कालपर्यन्तं न केनापि प्रकाशितं नाटकमित्यत्र न सत्यता नास्ति । **संस्कृतमयी च्छाया जनोपकारायास्माभिरेव व्युत्पादिता मुद्रिता च** । यदि तत्र तत्र विप्रतिपत्तिः स्याच्चेत्तर्हि पाठकाः सूचयन्तु, स्वीकुर्वन्तु च धन्यवादानिति विज्ञापयामः । आपरितोषाद्विदुषां न साधु मन्ये प्राकृतविज्ञानम् ।

कातज्ञ्यं च निवेद्यते

ग्रन्थस्यास्य सम्पादने मामर्ह इति नियुज्य, महद्गौरवं दत्तवद्भ्यः, सरस्वतीमहालयनिर्वाहकसमित्या अध्यक्षेभ्यः, तञ्जावूर् - मण्डलाधिकारिभ्यः T. R. **रामस्वामी** I. A. S.. महाशयेभ्यः, साञ्जलिबन्धं कातज्ञ्यं निवेदयामः । तथैव कापीकरणात्प्रभृति मुद्रणपर्यन्तं साहाय्यं कृतवते, सरस्वतीमहालयाध्यक्षाय A. **पञ्चनादं** M.A., B. Lib.Sc., महाशयाय

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

कृतज्ञतां निवेदयामः । निर्दोषं सुन्दरं च ग्रन्थमिमं मुद्राप्य प्रकाशने परमोपकारं कृतवन्तः, सरस्वतीमहालयमुद्राक्षरशालाकर्मचारिणः सर्वेऽपि धन्यवादार्हा भवन्ति । अन्ततः प्रियपाठकानभ्यर्थयामहे – नाटकमिदं पाठं पाठं नित्यं निरतिशयं निरवधिकमानन्दमनुभवन्तु, प्रोत्साहयन्तु च मामुत्तरोत्तरकर्मणि इति सूक्त्याऽनया समापयामश्च प्रस्तावनामिमां –

सन्तस्स्वभावमधुरास्सुजनोपहार-
सम्भारमात्रशरणाः करुणारसार्द्राः ।
अभ्यर्थये कृतिमिमां कृतिनो वहन्तः
प्रेमस्पृशा ननु दृशा परिशीलयन्तु ॥

सरस्वतीमहाल्
तञ्जपुरी
5—12—85

इत्थं, विद्वद्विधेयः,
P. M. पद्मनाभशर्मा,
भूतपूर्वसरस्वतीमहालयपण्डितः

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

॥ श्रीः ॥

॥ कथासङ्ग्रहः ॥

बालानां सुखबोधाय व्युत्पित्सूनां विशेषतः ।
राघवाभ्युदयस्यास्य कथा सङ्गृह्यते मया ॥

॥ प्रथमेऽङ्के ॥

कविरयं स्वेष्टदेवताप्रार्थनापुरस्सरं स्वपरिचयं ददाति, तस्मिन्नवसरे चोलभूपालस्य एकोजिमहाराजस्य, तत्सुपुत्रस्य शाहजीमहाराजस्य च गुणगणान्वर्णयति । यतः, तयोरेव शासनसमये, स्वपिता, स्वभ्रातरौ चामात्यपदमलमकुर्वन् ।

कोसलाधिपतिः राजा दशरथः, स्वपुत्राभ्यां रामलक्ष्मणाभ्यां सह सिंहासने विराजमान आसीत् । तदानीं चिन्तयति, स्वपुत्राणां विशेषतश्च रामभद्रस्य गुणगणान्निर्वर्ण्य, मनसि तुष्यति, इच्छति "वातीतकुमारभावस्य तस्य पट्टाभिषेकं कर्तुं, तदर्थं विवाहं च निर्वर्तयतुं, यतः, अकृतोद्वाहः कथमर्हति राज्यस्ये"ति । एतदन्तरे मिथिलाधिपस्य जनकस्य पुरोधाः शतानन्दः सीतायाः प्रतिकृतिं गृहीत्वाऽऽगच्छति, निवेदयति च "राजा जनकः स्वसुतां जानकीं वीर्यशुल्कामकल्पयत् । शैवं चापमारोपयितुं बहवो राजानः बहुधा प्रायतन्त । परन्तु न किमपि प्रयोजनमभूत् । अतः कन्याया अस्याः आकृतिरेखाविन्यासान् दृष्ट्वा वसिष्ठो ब्रवीतु अस्याः

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

विवाहो भविष्यति वा नवे''ति। समयेऽस्मिन्, समीपे वर्तमानो रामः सीतायाः प्रतिकृतिं वीक्ष्य मनसि चिन्तामभिनिवेशं लभते । तस्य शरीरेऽपि भवति रोमाञ्चः । "चक्षुःप्रीतिः मनस्सङ्गः" इत्युक्तरीत्या कविरत्र नायकस्य मनसि नायिकां प्रति, समुद्भूतस्याभिनिवेशस्य बीजक्षेपं करोतीति प्रतिभाति । एवं रामस्य शरीरं पुलकाङ्कितं दृष्ट्वा लक्ष्मणोऽपि शङ्कते । रामस्य वयस्योऽष्टावक्रोऽपि परिहसति । दशरथेनाहूतः मैत्रावरुणिः वसिष्ठः सीतायाश्चित्रफलकं वीक्ष्य चिन्तयति – "भगवान्विष्णुः रामात्मना परिणतोऽभूत्। लक्ष्मीः सीतात्मना परिणता । तयोर्विवाहे वयं के? तथापि भगवतोऽवतारस्य, प्रयोजनमुद्भावयितुं वयं घटका भवामः । सीता-विवहः नूनं रामचन्द्रेण सह भविष्यत्येव। अस्यां रक्षःपरिभवसूचिका रेखा दृश्यते । तथैव तत्परिहारस्यापि । भवतु । एवं वदामी"ति विचिन्त्य ब्रवीति – "शतानन्द, नूनमस्या विवाहः केनचिच्छक्रवर्तिना सह भविष्यत्येव । आकृतिरूपरेखाविन्यासा विषयममुं द्रढयन्ती"ति ।

तुष्टश्शतानन्दः मिथिलां प्रति गन्तुमिच्छति । तस्मिन्नवसरे भगवान्विश्वामित्रः प्रविश्य, दशरथं रामं याचते – "राजन्, जेता लोकपालानां, कन्दुकस्येव कैलासस्योद्धर्ता रावणः, सर्वानपि विबुधान् हिनस्ति । अहमपि कंचन यज्ञं कर्तुं प्रयते । तत्र रावणप्रहिताः मारीच-सुबाहुप्रभृतयो राक्षसाः रुन्धन्ति तम् । अतो याचेऽहं, "रामभद्रः मया सह प्रेष्यतामि"ति । दशरथोऽपि वसिष्ठवचनाद्रामं सलक्ष्मणं प्रेषयति । शतानन्दः रामवयस्येनाष्टावक्रेण सह मिथिलां प्रस्थितः । विश्वामित्रः तौ रामलक्ष्मणौ नीत्वा सिद्धाश्रमं प्रति निवर्तते इति प्रथमोऽङ्कः ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

॥ द्वितीयेऽङ्के ॥

अङ्केऽस्मिन् गौतमशिष्यः दाल्भ्यायनः, शतानन्दशिष्यः नाडायनश्च परस्परं मिलतः, भाषेते च। तेनेदं ज्ञायते – यदा रामः विश्वामित्रेण सह सिद्धाश्रमगच्छत्, तदा ताटका शूर्पणखया सह मार्गं रुणद्धि स्म। रामः ताटकामवधीत्। लक्ष्मणः शूर्पणखां कर्णनासाच्छेदेन विकृतामकरोत्। विश्वामित्रोऽपि सिद्धाश्रमं प्राप्य यदा यियक्षमाणोऽभवत्, तदानीं मारीच-सुबाहुप्रभृतयो राक्षसाः प्रत्यूहमुत्पादयन्ति स्म। तदा रामभद्रः एकेनैव बाणेन सुबाहुं गतासुमकरोत्, मारीचमपि वार्धौ पातयामास। ताभ्यां सहागतान्सर्वानपि निशाचराल्ँलक्ष्मणः अविध्यत्। एवं रामलक्ष्मणाभ्यां भगवतो विश्वामित्रस्य सप्ततन्तुस्समापितः निष्प्रत्यूहम्। तेन तुष्टः कौशिकः ताभ्यां सह मिथिलां प्रति प्रतस्थे। मध्येमार्गमस्मद्गुरोः गौतमस्य धर्मदाराः अहल्या, पूर्वं शापवशाच्छिलाभावं गता सती, रामपादरजसा स्वभाव प्राप्ता रामस्य वरिवस्यां चक्रे। गौतमोऽपि विरहितयाऽहल्यया सह रममाणः रामायाशिषमदात्। वृत्तान्तमिमं शतानन्दाय कथयितुं तदाश्रम· गच्छामीति दाल्भ्यायनः वदति। शतानन्दशिष्यः नाडायनः अभ्यागतस्य मिथिलामागतस्य विश्वामित्रस्य परिचर्यां कर्तुं तत्प्रबन्धार्थमाश्रमं गच्छामीति कथयति। अनयोर्भाषणेन ज्ञायते – विश्वामित्रः जनकप्रवर्तितं यज्ञं द्रष्टुं अनाहूतोऽपि रामलक्ष्मणाभ्यां समं मिथिलामाजगामेति। मिथिलायां प्रासादोपरि स्थिता जानकी, स्वसख्या चन्द्रलेखया सह जनकपुर्याः मिथिलाया रामणीयकं पश्यन्ती आस्त। तदानीं रमणीया अपि जनकपुरी पतिसंयोगयोग्ये वयसि वर्तमानायै जानक्यै न रोचते। रामवयस्येनाष्टावक्रेण

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

वर्णितैर्गुणगणैः राममेव स्वपतिं मन्यमाना, शिवशरासनारोपणं स्वशुल्कं मत्वा शङ्कमाना, स्वसख्या चन्द्रलेखया सह तदधिकृत्य सल्लपति । तदानीं वीथ्यां गच्छतः मुनिजनान् वीक्ष्य पृच्छति "को वायमि"ति । चन्द्रलेखा च प्रतिवदति, "जानकि, अस्माकं स्वामी राजा जनकः यियक्षते किल । भगवान्विश्वामित्रः अनाहूतोऽपि तमध्वरं द्रष्टुं दशरथपुत्राभ्यां रामलक्ष्मणाभ्यां सार्धं आगतः । स एवायमि"ति ।

जानकी कुतूहलमापन्ना स्वोद्याने प्रविशन्तं नीलमेघश्यामलं रामभद्रं पश्यति । तेन तस्या मनसि नवनवोन्मेषशाली अनुरागः प्रवर्धते । रामश्च तदुद्याने स्ववयस्यमष्टावक्रं दृष्ट्वा पृच्छति "वयस्य, मयोदितं सीताप्राप्त्यै यं कमपि प्रबन्धं कृतवानसी"ति । सोऽपि प्रतिब्रूते, "वयस्य, किं बहुना, यथा सीता त्वामन्तरा नान्यं मनसाऽपि स्मरेत्तथा कृतवानि"ति । तत्रोद्याने विमलसलिलं किंचन सरोऽवर्तत । तत्र प्रासादस्थायाः सीतायाः प्रतिबिम्बोऽदृश्यत । तं दृष्ट्वा विरहतप्तः रामोऽपि चित्रे तां सीतां विलिख्य, रमते । तथैव सीतापि प्रासादस्थिता सती चित्रे रामं विलिख्य विरहकातरतां व्यपोहति । अकस्मात् सीताचित्रितं चित्रं आकाशे उड्डीय रामहस्तं प्राप्नोति । तद्दृष्ट्वा सीता लज्जते । तदानीं मात्रा विश्वामित्र-दर्शनायाहूता सीता, रामं पश्यन्त्येव प्रसादादवरुरोह, अगच्छत् च । रामोऽपि सीतामेव स्मरन्, तच्चित्रितं चित्रमेव पश्यन्, अष्टावक्रेण सह स्वगुरोर्विश्वामित्रस्यान्तिकं जगाम । एवं नायिकानायकयोः प्रेमातिशयः सुदृढो भवतीति ज्ञायत इति द्वितीयोऽङ्कः ।

CC-0.TSarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

॥ तृतीयेऽङ्के ॥

अङ्केऽस्मिन् रावणप्रहितौ शुकसारणौ रन्ध्रान्वेषिणौ भवतः, "कदा वा सीतैकाकिनी भविष्यती"ति । तयोस्सँल्लापेन ज्ञायते रावणः जनकं सीतामयाचत । जनकस्तु तां वीर्यशुल्कां विज्ञाप्य पाशुपतधनुरानमनं कर्तुं आदिदेश । रावणस्तु, "परमेश्वरभक्तोऽहम् । धनुरानमनेन तस्यावज्ञां कर्तुं नेच्छामी"ति निराचकार । अगत्या सीतापहरणमेव वरं मत्वा शुकसारणौ रन्ध्रमन्वेष्टुं प्रेषयामास । मारीचश्च स्वमायाजालेन मृगरूपेण सीतायाः पुरतः सञ्चरितव्यः इति स्वामिना आदिष्टम् । एवं जगदेकवीरस्य रामस्य पराभवं कृत्वा पतिव्रतायास्सीताया अपहरणेन किं वा प्रयोजनं भविष्यति । स्वयंकृतोऽनर्थ एवेति ।

शुकश्च, पञ्जरस्थः सीतायाः शुक इव तत्र तत्र सञ्चरमाणः, सीतोद्यानमागच्छति । तदानीं रामोऽपि विरहतप्तहृदयः स्ववयस्येन अष्टावक्रेण सार्धं तदेवोद्यानमाजगाम । अष्टावक्रः, "सीतायाः प्रतिकृतिं दृष्ट्वा मनः आह्लादये"ति उपदिशति । रामस्तु साक्षाद्दर्शनमेव वरमिति मन्वानः, "उद्याने सीता कुत्र वर्तत" इत्यन्विष्यति । शुकवेषधारिणं शुकं दृष्ट्वा, "अयं यत्र गच्छति, तत्रैव सा भवेदि"ति तमनुसरन् गच्छति । तत्रैव सीता विरहातपतप्ता तत्र वर्तते । तत्सखी चन्द्रलेखापि शैत्योपचारं कुर्वती आसीत् । रामः अष्टावक्रेण सह तत्र गत्वा तयो- र्विस्रम्भालापं श्रोतुं विटपान्तरितो भवति । शुकः सीतामुपेत्य नमस्करोति, निवेदयति च, "सीते, इयं चन्द्रलेखा, मां पञ्जरे बद्ध्वा निवारयति । अहं तु त्वां द्रष्टुकामः, हस्तपादाभ्यां पञ्जरान्विमुच्य तव सकाश-

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

मागतोऽस्मी"ति । सीताऽपि, तं शुकं स्वशुकमेव मन्यमाना अस्य विस्रम्भालापश्रवणेन न कोऽपि दोष इति समाधत्ते । सीताचन्द्रलेखयोः भाषणेन ज्ञायते – "जनकः किमर्थमेतादृशं शुल्कमकल्पयत्? रामः शैवधनुरारोपणं करिष्यति वा न वे"ति सीताया मनसि शङ्का समुदेति चन्द्रलेखा च "तादृशस्य महानुभावस्य नैतत् दुष्करं मन्ये" इति समाधानं दत्ते । विरहतापमसहमाना सीता, चन्द्रलेखाकृतं शैत्योपचारमपि नालं मन्यमाना, रामस्य साक्षाद्दर्शनमेव वरमिति यज्ञवाटं जिगमिषति । तदानीं विटपान्तरितः रामः, तत्र प्रविश्य साक्षाद्दर्शनं ददाति ।

रामं दृष्ट्वा सीता लज्जते, सख्यन्तरिता च भवति । चन्द्रलेखा वदति -- "रामस्यासन्निधाने तप्तहृदया भवसि, तत्सन्निधाने लज्जसे का गतिः । इदानीमेव यत्कर्तव्यं तत्कुर्वि"ति । सोत्कण्ठाऽपि सीता पितुः प्रतिज्ञां स्मारयित्वा "तत्पूर्तावेव स्वीकरिष्यामी"ति भारतीयनारीत्वं प्रकटयति । एतस्मिन्नन्तरे चित्रमृगवेषधारी मारीचः उत्प्लुत्योत्प्लुत्य सीतायाः पुरतो धावति । सीता तं दृष्ट्वा ग्रहीतुं कामयते प्रेयसीप्रीत्यै तं ग्रहीतुकामः रामः तमनुसरति । अतिदूरं गतो रामः लक्ष्मणेन सङ्गच्छते । लक्ष्मणः ब्रवीति – "अस्माकं गुरोः विश्वामित्रस्यादेशेन जनकः पाशुपतं धनुरानाययामास । तत् सज्यं कर्तुं कौशिकः भवन्तं प्रतीक्षते"-इति । रामः प्रतिब्रूते, "लक्ष्मण, मृगोऽयं न साधारणो दृश्यते । अतश्शैवं धनुः सज्यं कृत्वा, तस्मिन्नेव धनुषि बाणमेकं संयोज्य व्यापादयिष्यामि मृगमेनम् । त्वं सीतायाः प्रत्यनन्तरीभव । यतः सोद्याने स्वसख्या चन्द्ररेखया एकाकिनी वर्तते । सा मां स्निह्यति । तदर्थमेव मृगमेनमनुधावामि" इति निष्क्रान्तः ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

लक्ष्मणोऽपि तथैव कुरुते । एतस्मिन्तरे रामबाणेन विद्धो नारीचः, "हा सीते, हा लक्ष्मण", इति आक्रोशन्नेव ममार ।

इममार्तनादं श्रुत्वा जानकी, "स्वार्यपुत्रस्यैवापत्तिरापतिते"ति मत्वा च लक्ष्मणं त्वरयति । पाशुपतधनुर्भङ्गेन परमक्रोधनः क्षत्रियकुलध्वंसको भगवान् जामदग्न्यः, रावणेन प्रचोदितः रामेण सह योद्धुमागच्छति । तत्क्रोधवचनं श्रुत्वा सीता शङ्कमाना, चन्द्रलेखां प्रेषयति, "जानीहि किमेतदि"ति । एवमन्यान्यकारणैः सर्वेषु गतेषु, शुकेन निवेदितो रावणः गृहीतभिक्षुवेषः तत्राजगाम, यत्र सीतैकाकिनी वर्तते । सीता रावणं भिक्षुं मन्यमाना तदुपचरणाय यज्ञवाटं गन्तुं इच्छति । मध्येमार्गमेव रावणः सीतामपजहारेति तृतीयोऽङ्कः ।

॥ चतुर्थेऽङ्के ॥

अङ्केऽस्मिन् रामचन्द्रस्य हरशरासनानमनप्रयुक्तविक्रमातिशयेन परं प्रहृष्टः भगवानत्रिः, रावणपराभूतान् जनस्थानवासिनो मुनिजनान् अभिरक्षितुं स्वशिष्यं शाकटायनं मिथिलानगरस्थस्य विश्वामित्रस्य सकाशं प्रेषयति । सः मध्येमार्गं रामस्य प्रियवयस्यं, अतीव विषण्णं चाष्टावक्रं पश्यति । विषादस्य कारणे पृष्टे, अष्टावक्रः भणति, "रामः मिथिलां प्राप्य हरशरासनानमने प्रवृत्तः । तदानीं पङ्क्तिमुखः एकाकिनीं जानकीं अपहृत्य पलायितः । तेन क्रुद्धो भगवान्कौशिकः, राममादिशत् 'रावणं पराजित्या-नीयतां सीते'ति । तेन गुरुवचनेन रामभद्रः शरासनमात्रमित्रः जनस्थानं प्रविवेश । अहं तु तदादेशेन, 'लक्ष्मणं साकेतं प्रेष्य तातपादाः जनन्यश्च

CC-0.TSarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

समाश्वास्यन्ता'मिति कथयितुं गच्छामि । रामरहितः कथमहं जीवेय''मिति । शाकटायनः. "त्वगुरोरत्वेः अभ्यर्थना दैववशादेव फलिष्यति । अलं तत्र गमनेने''ति प्रतिनिवृत्तः । अष्टावक्रोऽपि विन्दुनामधेये मुहूर्ते सीतापहृता, अतो नूनं रामः तां लप्स्यत इति प्रहृष्टो जगाम ।

साकेतं गत्वा तातपादाः जनन्यश्च समाश्वास्यन्तामिति रामेण आदिष्टोऽपि, लक्ष्मणः, तत्कार्यं, मातुलकुलादागतं भरतं नियुज्य पत्रमुखेन, स्वयं जनस्थानप्रविष्टं राममेवानुसरति । तत्र तत्र जनस्थानप्रवृत्तं खरदूषणादि-वधं, आर्यस्य रामस्य साहसातिक्रमं च श्रुत्वा दृष्ट्वा च रामेण सङ्गच्छते । अध्वश्रमेण, सीताहरणेन, तत्र तत्र राक्षसादिभिस्सह महायुद्धेन चातीव क्लिन्नमार्यं रामं दृष्ट्वा परं खिद्यति । लक्ष्मणं दृष्ट्वा रामः अतीव शोचति, "वत्स, अस्माकं मनोः कुले बहवो राजानः उद्भूवन् । तेषां चरित्रेषु न कस्यापि एतादृशः पराभवः अभवत् । यथा मम सञ्जातः । स्वस्य प्रेयसीमपि रक्षितुं नाशकम् । अस्याः दुष्कीर्तेरालयोऽभव''मिति । समाधत्ते लक्ष्मणः, "आर्य, तव पादरजसा शिलापि सुशीलाहल्या संवृत्ता । संसारेऽस्मिन् न केनापि गृहीतं शाङ्करं धनुः भिन्नमकरोः । केनापि क्षत्रेण एतावत्पर्यन्तं न नामितोऽयं भगवाञ्जामदग्न्यः नामितो भवता । तादृशस्य महामहिमवतो भवतः कथं वा दुष्कीर्तेरालयत्वं सिद्धयति?" इति । रामः सीताया रूपलावण्यं तस्याश्चारित्र्यविशेषं, तस्या मनसि स्वं प्रति अभिनिवेशातिशयं, तस्या वार्तालापकौशलं इत्यादिविषयान् स्मारं स्मारं विषीदति, प्रलपति च । लक्ष्मणोऽपि तन्मनोऽन्यथयितुं वनस्थानि दृश्यानि दर्शयन् अगस्त्यस्य प्रियशिष्यं मैत्रायणं पश्यति, पृच्छति च

CC-0.TSarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

"भगवानगस्त्य: कुत्र वर्तत" इति । सोऽपि कर्मानुष्ठाननिरतं तं दर्शयति । रामलक्ष्मणौ तत्र गत्वा, तं प्रणम्य, तस्याशिषं गृहीतः । तदानीमगस्त्यः, सीताविरहवेदनया विवर्णमपि मनोभिरामं रामं दृष्ट्वा मनसि हृष्टः, महेन्द्रदत्तं नारायणीयं धनुः, अक्षय्यबाणपूरितौ निषङ्गौ, खड्गं च तस्मैं यच्छति, ददाति आशिषं, "त्वं पङ्क्तिमुखं निहत्य स्वभार्यामवाप्स्यसि शीघ्रमेवे"ति ।

तदनुमतः रामः सहानुजः, तत्र तत्र सीतामन्विष्यन्, तत्र वने सीतायाः साध्वससम्पातविप्लुतरेखामपि पदपङ्क्तिं दृष्ट्वा निश्चिनोति इयं सीतायाः पदपङ्क्तिरेव । सा केनाप्यपहृतेति । तत्र भग्नं धनुः, विशीर्णं कवचं, ध्वस्तं रथं, प्रतिहतान्खरांश्च वीक्ष्य सन्दिदिहे, अत्र द्वाभ्यां वीराभ्यां महद्युद्धं कृतमिति । तदा जटायुराक्रोशति, "उपरून्धन्त्यमी प्राणाः कण्ठभागं, तदितो न पारयामि वक्तुम्, तव भार्यां रावणोऽहरदि"ति । सलक्ष्मणः रामोऽपि द्रुततरं गत्वा मृतं शकुनिराजमपश्यत् । आहिताग्नीनां या गतिर्भवेत् तामपुनरावर्तिं तस्मै जटायुषेऽदात् । तदनु सीतां अन्वेष्टुं गच्छन् रामः कबन्धं नाम राक्षसमवधीत् । तस्मिन् गर्ते पातिते गन्धर्वभावं प्राप्तस्सः रामपादयोः पतति, प्रार्थयते च, सीताप्राप्त्यै महत्साहाय्यं करिष्यामि राघव, सतीं सीतां तूर्णमेव प्राप्स्यसि । अत्रेर्धर्मदारैः अनसूयया हनूमन्मुखेन सीतायै दुकूलद्वितयं प्रेषितम् । यद्धारणेन तां न कोऽपि स्प्रष्टुमपि शक्नोति । नलकूबरेण शप्तः स रावणः, स्वयमकामां नारीं न स्प्रक्ष्यते । अतस्त्वं शबरीं वरिवस्याग्रहणेन सम्भावयित्वा पम्पासरः प्राप्नुहि । तत्राहं हनूमन्तं प्रेषयिष्यामि । तन्मुखेन सर्वं सुसाधं भविष्यती-त्युक्त्वा तिरोहितः । तदुक्त्या रामोऽपि शबरीं दिवं प्रेषयित्वा पम्पां जगामेति चतुर्थोऽङ्कः ।

CC-0.TSarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

॥ पञ्चमेऽङ्के ॥

अङ्केऽस्मिन् सुग्रीवेण सीतान्वेषणाय प्रहितेषु वानरभटेषु, समुद्रं लङ्घयितुं समर्थः हनूमान् लङ्काधिदेवतां लङ्कामपि पराजित्य लङ्कां प्रविशति पराजिता लङ्का ब्रह्मलोकं गन्तुकामा मध्ये रावणचारं करालं पश्यति पृच्छति च, "त्वं परिश्रान्त इव दृश्यसे? किं वा कारणमि" ति। सोऽवदत्, "रामस्य गतिं निरोद्धुं, अस्मत्स्वामिना रावणेन वाली निक्षिप्तः। रामस्तु स्वमित्रस्य सुग्रीवस्य कृते वानरराज्यं दातुं, समराभिमुखं वालिनं जघान। सुग्रीवं च वानरराजमकरोत्। सुग्रीवः प्रत्युपकारं चिकीर्षुरिव, सीतामन्वेष्टुं जाम्बवदङ्गदप्रमुखान्कपीशान् प्रैषयत्। तेषु हनूमान्नाम कश्चित् वानरः, सिंहिकां हत्वा, सुरसां प्रतार्य, मैनाकं सम्भावयित्वा, अत्रागतः। तं विचेतुमहमपि तत्र तत्र परिबभ्राम। सूर्येऽस्तमिते, गाढे च तमसि. स निलीनोऽभूत्। कुत्रेति न ज्ञायते। विषयमिमं स्वामिने निवेदयितुं गच्छामी" ति निष्क्रान्तः। लङ्कापि "अयं वानरः स एव, यो मां पराजितवान्। इतःपरं रावणस्य पराभवः एव भविष्यती" ति मन्वमाना ब्रह्मलोकं जगाम।

लङ्कां प्रविष्टो हनूमान्, चन्द्रोदये तत्र तत्र सीतामन्विष्यन् अन्ततः अशोकवनिकां अलभत। तत्र शिंशुपातरोरधस्तात् सखीसमेतां सीतामद्राक्षीत्। इयं सीतैव वेति निर्णेतुं पत्रान्तरितो भूत्वा तयोः सँल्लापमशृणोत्। "रामः अवश्यं अत्रागमिष्यति, त्वां च नेष्यती" ति त्रिजटा सीतां सान्त्वयति। हनूमांश्च "सीतैवेयमि" ति निश्चित्य प्रवेशाय समयं प्रतीक्षते। सीता तु, रावणस्य प्रतापं, तत्प्रहितान् रामगत्यवरोधकांश्च श्रुत्वा मुह्यति।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

अत्रान्तरे दनुना प्रहितौ द्वौ विद्याधरौ आगत्य, सीतां च प्रणम्य, "सीतानन्दनं" नाम रूपकमेकं दर्शयतः। अशोकवनिकां परितः, मोहन-चूर्णस्य प्रक्षिप्तत्वात्, यथा रामाहिता जना न पश्येयुः तथा कुरुतः। त्रिजटया प्रबोधिता सीता रूपकमिदं द्रष्टुं कुतूहलिनी भवति। कविरत्र, अन्तर्नाटिका-दर्शनेन, नायिकायाः तापशमनेन, किष्किन्धाकाण्डकथां च ब्रवीति। अस्य फलद्वयं भवितुमर्हति। सीता रूपकदर्शनेन जानीयात्, रामः स्वप्राप्त्यर्थं कीदृशमुद्योगं करोति, तदर्थं किं किं करोति इति। तेन नायिकानायकयोः, "मूर्च्छनं चैव" इत्युक्तरीत्या तादृशीं गतां अवस्थां, शमयति च। रूपकेऽस्मिन् सीताविरहितः रामः, वने विद्यमानान् द्रुमान्, लताश्च दृष्ट्वा भ्रांतिं गतः, तांश्चान्यथा मत्वा पृच्छति प्रिया कुत्रेति। पार्श्वे स्थितः लक्ष्मणश्च यथार्थस्वरूपं निरूप्य धैर्यं चोत्पादयति। इत्येवं कविरत्र "चक्षुःप्रीतिः" इत्यादिलक्षणोक्तां उन्मादावस्थां सम्यक्तया प्रतिपादयति। एतदन्तरे सुग्रीवेण प्रहितः हनूमान्, रामं द्रष्टुं तत्रागतं गुहं भीषयति। स चाक्रोशति। तस्याक्रोशं श्रुत्वा स्वरेणैव तं गुहं मन्यमानः धनुर्धनुरिति धनुर्गृह्णाति। प्रथमं गुहः, तत्पश्चाद्धनूमांश्च तत्रागत्य रामं प्रणमतः। तदा हनूमानवदत्, "राघव, त्वं शोकाक्रान्तः अदृश्यथाः तच्छोकं अन्यथयितुं तव मित्रं गुहं अभीषयम्। अतः प्रार्थये, "क्रोधोऽयं शत्रुषु निक्षिप्यतामि"ति। हनूमन्तं क्षमयित्वा, रामोऽपि गुहमुखाद्वार्तामिमां शृणोति, "रामस्य तातः दशरथः, रामविरहेण दुःखितः, महेन्द्रस्य साहाय्यं कर्तुं स्वर्गं गतः। भरतस्तु रामपादुकेऽभिषिच्य नन्दिग्रामे स्थितः राज्यं शास्ति" इति। भरताय स्वावस्थां निवेदयितुं साकेतं गुहं प्रेषयित्वा, हनूमन्तं पृच्छति आगमनकारणं किमिति। सः सुग्रीवस्याभीष्टं निवेदयति। रामः, दुन्दुभिं स्वपादेन प्रक्षिप्य, सप्तसालांश्च शरेणैकेन

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

विभिद्य स्वपराक्रमातिशयं निरूपयति। वदति च, "सुग्रीवः वालिना सह युध्यतु। अहं पर्वतेऽस्मिन्वर्तमान एव तं हनिष्यामी"ति। तथैव सुग्रीवेण कृते, रामः वालिनं नाविध्यत्। वाली सः सुग्रीवं पराजित्य, यदा रामेण सह सङ्ग्रामं कर्तुमयतत, तदा रामः तं भूमौ पातयामास। सुग्रीवे च वानरराज्येऽभिषिक्ते, सः सीतामन्वेष्टुं वानरान् प्रेषयामास। दक्षिणदिशं प्रति प्रहितेषु कपिषु रामः हनूमतेऽङ्गुलीयकं दत्वा प्रेषयति। स चेदानीं पवनसुतः लङ्कां प्रविष्टः। इत्येतावत्पर्यन्तां कथां सीता रूपकविधया दृष्ट्वा हनूमन्तं प्रतीक्षते। शिंशुपावृक्षस्य पत्रान्तरे निलीनः हनूमानपि समयोऽयं प्रवेशस्येति ज्ञात्वाऽवतरति, सीतां च प्रणमति। शङ्कितायै सीतायै ददाति अङ्गुलीयकं च। सीतापि, "चिरकालं जीवितुं न शक्नोमि" इत्यभिधाय, चूडामणिं च दत्वा मारुतिं प्रेषयति। अत्रान्तरे रावणः तत्रागच्छति इति बुद्ध्वा हनूमान्वृक्षपत्रान्तरितो भवति। रावणः सीतां भार्यां भवितुं याचते। तया धिक्कृतः सः क्रुद्धस्सन्, तां खड्गेन हन्तुं यतते। हनूमान् तत्र गत्वा तं वारयति। निवेदयति चात्मानं रामदूतमिति। रावणे तं मारयितुमुद्युक्ते, विभीषणः तं निवारयति "दूतो न वध्यः" इति। तदा रावणः वानरं बद्धुं प्रहस्ताक्षप्रमुखान् राक्षसान् प्रहिणोति। हनूमता, तेषु हतेषु, मेघनादः ब्रह्मास्त्रेण तं बध्नाति, लाङ्गूलं च दापयति सीताप्रार्थनयाऽनले शीते सति, हनूमान् लङ्कामभितः अग्निना दापयति प्रतिनिवर्तते च। विद्याधरमुखेनाग्निनादग्धं हनूमन्तं श्रुत्वा सीता निर्वृता सती स्वकुलगुरुं सप्तसप्तिं नमश्चाकारेति पञ्चमोऽङ्कः।

CC-0.TSarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

॥ षष्ठेऽङ्के ॥

अङ्केऽस्मिन्, लङ्कादाहानन्तरं, अतीव क्रुद्धो रावणः शिंशुपातरुमभितः प्राकारं निर्माय तन्मध्ये सीतामेकाकिनीमेवास्थापयत्। तामाश्वासयितुं महेन्द्रेण प्रहिता शची, अदृश्या सती, तत्र तत्र लङ्कायां दग्धानि गृहाणि, महान्ति उद्यानानि च पश्यन्ती, विभीषणादीनामदग्धानि भवनानि दृष्ट्वाश्चर्यं प्रकटयन्ती, सीतान्तिकमाजगाम। सीता तां वीक्ष्य हर्षं प्रकटीकरोति, पृच्छति च, "हनूमानार्यपुत्रस्य सकाशं प्राप्तो वा नवे"ति शची, दिव्याञ्जनमेकं सीतायै दत्वा निवेदयति, धृतेत्रेदमञ्जनं, त्वमेव सर्वमपि विषयं स्वचक्षुर्भ्यामेव द्रक्ष्यसीति। सापि तथैव करोति। इदानीं सीताशच्यौ तत्रत्यं वृत्तान्तं दृष्ट्वा परस्परं संलापतः। तेनेदं ज्ञायते।

रामः हनूमन्निवेदितं प्रियावृत्तान्तं श्रुत्वा, चूडामणिं च दृष्ट्वातीव शोचति। लक्ष्मणेन समाश्वस्तः सः, सुग्रीवचोदितैः पृतनाम्बरवारिधीन् व्याप्तैः वानरभटैस्समेतः समुद्रतीरं प्राप। तत्र विभीषणः स्वाग्रजेन निष्कासितः रामं शरणं ययौ। तत्र दर्भशयने शयानेन रामेण प्रार्थितः समुद्रराजः आगत्य न्यवेदयत्: "राम, वानरभटैर्नीयमान् शैलान् नलः स्पर्शं स्पर्शं सेतुं बध्नातु" इति। तेन तथैव कृते, रामः सेतुमार्गेण सर्वैस्सार्धं लङ्कां प्राप।

रावणः शुकसारणाभ्यां दर्शितान्वानरभटान् पश्यति। तदा सुग्रीवेण, तस्य किरीटहरणेन पराभवः कृतः। क्रोधेन रक्ताक्षः पङ्क्तिमुखः परश्शतान्निशाचरान् युद्धाय प्रेषयति। परन्तु, तस्य यत्नः विफलोऽभवत्।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

रामस्य सैनिकाः कपीशाः, रावणस्य सैन्याः निशाचराश्च समेत्य महत्तुमुलं युद्धमकुर्वन् । तत्र युद्धे अतिकायकुम्भकर्णादयः बहवस्सेनानायकाश्च मारिताः । एतन्मध्ये इन्द्रजित् निकुम्भिलायां यज्ञं कर्तुं यतते । तज्ज्ञात्वा विभीषणः लक्ष्मणहनूमदादिवानरसङ्घैः गत्वा, असमाप्ते सप्ततन्तौ, समराय मेघनादमाजुहाव । स च मेघनादः महति सङ्ग्रामे लक्ष्मणेन हतः । एवं पुत्रानुजवधेन नितान्तं विषण्णः क्रुद्धश्च दशमुखः, परिमितया सेनया परिवृतः स्वयमेव युद्धाय प्रतस्थे । इन्द्रप्रहितं रथमधिष्ठाय, रामोऽपि रावणेन सह योद्धुमुदयुङ्क्त । रामरावणयोः, तुमुलं, अनन्वयालङ्कारलक्ष्यभूतं, परस्परजयावहं मुक्तप्रतिमुक्तास्त्रशस्त्रनिवहं, दर्शकाश्चर्यजनकं च युद्धमभूत् ।

अन्ततः राघवेण च्छिन्ना अपि लङ्काधिपतेर्मस्तकाः, भूमौ पेतुः, पुनःपुनरुद्भूवंश्च । मातलिना चोदितो रामः ब्राह्ममस्त्रं प्रयुज्य तस्य शिरांसि चिच्छेद । आकाशे विद्यमानाः महेन्द्रादयः देवाः हृष्टाः पुष्पवर्षं ववर्षुः, दुन्दुभीन्वादयामासुः, जय, विजयीभवेति चुक्रुशुः इत्येवं महद्युद्धमिदं दृष्ट्वा, शची सीता च परं ननन्दतुः । रावणवधानन्तरं रामदर्शनाय हनूमताहूता, जानकी, स्वयमेवात्मानमशुचिं मन्यमाना जनप्रत्ययार्थं रामसन्निधौ हनूमत्प्रदीपितं पावकं प्रविवेश । रामस्तु परं सन्तुष्टः पावकदत्तां तां सीतां स्वीचकार । तदानीं विधातृमहेन्द्रादिबर्हिर्मुखैस्संवृतः भगवान्भवानीपतिः रामं प्रशंसति, ददात्याशिषम् । महेन्द्रस्यार्धासने समुपविष्टः राजा दशरथः, स्वयमपि सीतारामविवाहं, पट्टाभिषेकं च द्रष्टुं रामेण सहायोध्यां गन्तुमुत्सहते । राघवः परं मुमुदे । दशरथाधिष्ठितं विभीषणेनानीतं पुष्पकमारुह्य

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

ससीतः रामः लक्ष्मणेन, सुग्रीवादिकपिगणैः, विभीषणादिनिशाचरैः, हनूमता च साकं साकेतं प्रति प्रतस्थे इति षष्ठोऽङ्कः ।

॥ सप्तमेऽङ्के ॥

अङ्केऽस्मिन् राजा दशरथः, स्वसुतैः रामलक्ष्मणभरतशत्रुघ्नैः परिवृतः कल्याणमण्टपे सन्निधत्ते । मिथिलाधिपः सीरध्वजोऽपि स्वानुजेन कुशध्वजेन साकं, सीतोर्मिलामाण्डवीश्रुतकीर्तीनां विवाहाय स्वपुरोधसा शतानन्देन कल्याणविधिं कारयति । वसिष्ठविश्वामित्रौ "स्वाभीष्टसिद्धिरभवदि"ति हृष्टौ तद्वैभवं पश्यन्तावास्ताम् । सम्बन्धिनौ दशरथजनकौ वसिष्ठवामदेवप्रभृतिभिर्महर्षिभिः परिवृतौ शुभे दिने, शुभे मुहूर्ते स्वसुतानां स्वसुताभिस्सह कल्याणमहोत्सवं निरवर्तयताम् । आकाशे स्थित्वा महोत्सवमिमं पश्यन्तः महेन्द्रादिदेवाः पुष्पवर्षं वर्षन्ति, दुन्दुभीन्नादयन्ति, जयजयकारं च कुर्वन्ति । विवाहानन्तरं, रामः तत्सभायां, सुग्रीवं, विभीषणं, हनूमन्तं इत्येवं कृतोपकारान् सर्वानधिकृत्य प्रशंसति । तदानीं विश्वामित्रः, रामाभिषेकस्य शोभनो लग्नः सञ्जातः इति सर्वानपि त्वरयति । वसिष्ठः, रामभद्रं सीतया सह सिंहासने समुपवेश्य, सुग्रीवादिभिरानीतान् पवित्रतीर्थघटानावर्ज्य अभिषिञ्चति, किरीटं च धारयति ।

लक्ष्मणभरतशत्रुघ्नाः ननन्दुः, सुग्रीवादयः मुमुदुः, विभीषणादयः जहृषुः, किं बहुना, सर्वेऽपि तुतुषुः । इत्थं पट्टाभिषेकमहोत्सवोऽपि सम्पूर्णः । दशरथः, तान्सर्वानपि परिचर्ययोपचरितुं राममादिशति । रामोऽपि

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

भूषणादिभिस्सर्वानपि तोषयति । तत्समये सीता हृष्टा, स्वकण्ठान्मुक्ताहारं गृहीत्वा विशेषतः हनूमतेऽर्पयति । पवनः, पावनं परमेष्ठिनं रामं सम्भावयितुं हारमेकमर्पयति । सः हारः, आकाशात् उड्डीय रामस्य कण्ठमलङ्करोति । तदानीं विश्वामित्रो ब्रवीति – **"राघवाभ्युदय एषः, चेतसा याद्दगध्यवसितः चिरान्मया । वीक्षितस्समधिकस्ततोप्यहो कौशलं हि घटनाविधौ विधेः"** इति । विश्वामित्रमुखात् कविरेव "स्वग्रन्थनिर्माणे कथं कथं व्यवसितं, तच्चेदानीमेव वाञ्छितादधिकतयैव सफलमभवदि"ति तुष्यति । अस्तु नाम । एवं रामराज्ये सर्वे सुखिनः निरामयाश्च अवसन्, राजा च धर्मेण नीत्या च पृतनामपालयत् । काले पर्जन्योऽवर्षत्, पृथिवी च सस्यशालिनी अभूत् इति शम् ।

॥ नाटके इयान्विशेषः ॥

वरद्वययाचनतिरोधानेन कैकेयी संरक्षिता । "साक्षादेव सङ्ग्रामे रामो वालिनमवधीत्" इत्यनेन इदानीतनकाले शङ्क्यमानः रामस्य दोषोऽपि निराकृतः । सीताविवाहात्पूर्वमेव रावणः रामं विरोधिनं मत्वा सीतां जहार । तदानयनाय, रामः तं मारयामास । दण्ड्यो दण्डितः । सीता स्वयमेवाग्निप्रवेशं करोति प्रत्ययार्थं, नत्वन्येन प्रचोदिता । रामो रक्षितः । "कबन्धः, यदा दनुरभवत्, तदाप्रभृति नायिकानायकयोश्शोकं प्रशमयितुं प्रवृत्तः": इत्यनेन वाल्मीकेः कठिनचित्तत्वं न दर्शितम् । गुरोर्विश्वामित्रस्यानुग्रहादेव सर्वं कष्टं नष्टं भवति, अभ्युदयश्च वर्धते । अतः एतन्नाटकस्य नामापि सार्थकं भवतीत्यलं पल्लवितेन । शिवम् ।

CC-0.TSarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

॥ श्रीः ॥

॥ एतन्नाटकस्थानां पात्राणां नामानि ॥

(पुरुषाः)

1) सूत्रधारः
2) पारिपार्श्विकः
3) दशरथः (नायकस्य रामस्य पिता)
4) कञ्चुकी (दशरथस्य)
5) शतानन्दः (जनकस्य पुरोधाः)
6) रामः (दशरथपुत्रः नायकश्च)
7) लक्ष्मणः (रामस्य कनीयान् भ्राता)
8) वसिष्ठः (दशरथस्य पुरोधाः)
9) अष्टावक्रः (रामस्य वयस्यः, विदूषकश्च)
10) विश्वामित्रः (नायकस्य सूत्रधारः)
11) दाल्भ्यायनः (गौतमशिष्यः)
12) नाडायनः (शतानन्दशिष्यः)
13) शुकः (प्रतिनायकस्य रावणस्य चारः)
14) सारणः („ „ „)
15) मारीचः (रावणस्य सहायकः)
16) रावणः (लङ्काधिपः प्रतिनायकश्च)
17) शाकटायनः (अत्रिशिष्यः)
18) मैत्रायणः (अगस्त्यशिष्यः)
19) अगस्त्यः (कश्चन महर्षिः)

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

20) *जटायु: (दशरथमित्रं, शकुनिराज:)

21) दनु: (पूर्वाश्रमे कबन्ध:, पश्चाद्विद्याधर:)

22) कराल: (रावणचार:)

23) हनूमान् (सुग्रीवमित्रं नायकभक्तश्च)

24) विद्याधरौ (दनो: अनुचरौ)

25) गुह: (रामस्य मित्रं निषादराज:)

26) सुग्रीव: (रामस्य मित्रं कपिराज:)

27) *वाली (सुग्रीवस्य ज्येष्ठ:, प्रतिनायकोपकर्ता)

28) विभीषण: (रावणस्य भ्राता, रामस्य मित्रं च)

29) जनक: (मिथिलाधिप:, नायिकाया: जनकश्च)

30) भरतशत्रुघ्नौ (नायकस्य भ्रातरौ)

(स्त्रिय:)

1) सीता (जनकस्य पुत्री, नायिका च)

2) चन्द्रलेखा (सीताया: सखी)

3) चेटी (जनकपत्न्या:)

4) लङ्का (लङ्काधिदेवता)

5) त्रिजटा (राक्षसी, सीताया: सखी)

6) शची (इन्द्रस्य पत्नी, सीताया: सहाया)

*एतच्चिह्नाङ्कितानि पात्राणि रङ्गमनधिरूढानि

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

|| श्रीः ||

॥ *श्रीराघवाभ्युदयं नाम नाटकम् ॥

॥ श्रीगणेशाय नमः ॥

विद्युद्वेल्लितवारिवाहपटलीराजज्जटाकुन्तलं
कालिन्दीकलितप्रसिन्धुविलसत्कालाहिमुक्तास्रजम् ।
ध्वान्तोर्म्मिस्मितकौमुदीलसदिभत्वङ्नद्धकौशेयकं
सम्पृक्तं भवपूर्वरेण्यपुरतोर्धं यादवपुर्भूतये ।। –१

(नान्द्यन्ते)

सूत्रधारः :- अलमतिविस्तरेण । (परितः पुष्पाञ्जलिं विकीर्य, परितोऽवलोक्य)

अहो ! समुज्जृम्भितः खल्वयं ऋतूनामग्रणीः वसन्तः !! तथाहि –

शिशिरश्लिष्टां भ्रमरीं
विरहैः परिसान्त्वयन्भ्रमरः ।
क्रीडति तथा निकामं
सुखितः सहकारतरुशिखरे ।। –२

(नेपथ्याभिमुखमवलोक्य)

मारिष ! इतस्तावत् ।

(प्रविश्य)

---

* B 5259 D 4492 T. M. S. S. M. Library, Thanjavur

॥ नाटकेऽस्मिन् सर्वत्र, प्राकृतस्य "छाया" सम्पादकेनैव समुत्पादिता, मुद्रिता च ॥

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

पारिपार्श्विक :- भाव ! एषोऽस्मि ।

सूत्रधार :- अद्य खलु भरद्वाजकुलजलधिकौस्तुभेन त्र्यम्बकरायमखिना समारब्धस्य क्रतोर्दिदृक्षयाऽऽगतेन नानादिगन्तवासिना विद्वज्जन-समाजेन सबहुमानमाहूय समादिष्टोऽस्मि ।

पारिपार्श्विक :- वैदेशिकोऽस्मीति पृच्छामि - कः पुनरयं त्र्यम्बकमखी नाम ?

सूत्रधार :- किं न जानासि निजगुणगणकुसुमसुरभीकृतदिगन्तमेतमपि ? तथाहि –

कुर्वाणस्सकलान् यदीयधिषणामालम्ब्य राज्यक्रमान्
आलोक्याऽनुदिनं निजामुपचितामामोदमानः श्रियम् ।
नित्यं भोसलवंशवारिधिविधुश्शाहावनीवासवो
यस्मिन्नेव गुणोज्ज्वले कलयते वाचस्पतेर्गौरवम् ।। -३

अपि च –

यस्यैवाचारगाम्भीर्यशौर्यौदार्यादिभिर्गुणैः ।
वसिष्ठवार्द्धिविजयकर्णाद्याः पुनरुक्तयः ।। –४

अन्यच्च –

नियन्त्रितात्मा निगमान्तविद्यां
अधीत्य धीमानमलप्रसूतिः ।
ध्यायन्नसौ ब्रह्म निजात्मरूपं
तदात्मना भावयति प्रपञ्चम् ।। –५

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

पारिपार्श्विक :- (सप्रत्यभिज्ञं)

एकक्ष्माधिपतेरिदंविधगुणः साचिव्यधुर्यः श्रुतः
प्राज्ञः कश्चिदजातशत्रुसदृशो गङ्गाधरार्याभिधः ।
तैस्तैर्येन निजैरनन्यसुलभैरावर्ज्यमानो गुणैः
आचार्यप्रतिपत्तिमेव कलयन्नासीदमुष्मिन्नृपः ।। –६

सूत्रधार :- दिष्ट्या जानासि तं महाभागम् ! तर्हि तस्याऽऽत्मसम्भवं नृसिंहरायमखीति सुगृहीतनामधेयं महानुभावमपि भवान् जानीयात् !!

पारिपार्श्विक :- बाढं, जाने । यस्य किल

कृतः पित्रा बाल्ये निरुपमगुणाढ्यो निजपदे
निजैरेकक्षोणीपतिहृदयमाराध्य चरितैः ।
तदेवाऽयं भूत्वा चरति नियतं मूर्तिमदिति
प्रपञ्चे विख्यातिस्तदितरदुरापा विजयते ।। –७

सूत्रधार :- तस्यैवाऽयमनुजन्मा ।

पारिपार्श्विक :- सम्प्रति, यज्ञवाटं प्रविष्टोऽहं शालान्तरप्रविष्टमनतीतकौमारमन्यं कमपि यजमानमद्राक्षम् । तं पुनर्जानासि ?

सूत्रधार :- कथं न जानामि ? ।

CC-0.TSarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

साम्राज्यधुर्यो विहितः विधृव्ये-
णाऽऽदृत्य शाहक्षितिपालमौलेः ।
आनन्दनाम्ना विमलप्रसूतिः
पुत्रो नृसिंहाध्वरिणः स एषः ॥ —८

पारिपार्श्विक :- भाव, कीदृशः परिषदादेशः ?

सूत्रधार :- "तस्यैव त्र्यम्बकरायमखिनः समनन्तरानुजेन भगवन्तराय-नामधेयेन सत्कविसार्वभौमेन सम्प्रति प्रणीतं राघवाभ्युदयं नाम नाटकमभिनेतव्यमि" ति ।

पारिपार्श्विक :- विद्यमानेषु प्राचामपि रूपकेषु कथं नूतनप्रणीते तस्मिन्नेवं परिषदो बहुमानः ?

सूत्रधार :- तदेतत् प्रत्यग्रपतञ्जलिना द्वितीयप्राचेतसेन कुण्डिनकुल-मण्डनेन रामभद्राध्वरीन्द्रेण विमृश्य, सशिरःश्लाघमनुमोदितमिति । तथा चोक्तं तेनैव –

मिलदलिकलभालीधूतमल्लीमतल्ली-
गलितनवमधूलीधूलिकेलीसखीभिः ।
भणितिभिरनघाभिर्भारतीकर्णपूरं
श्लथयति भगवन्तस्त्र्यम्बकार्यानुजन्मा ॥ —९

पारिपार्श्विक :- (सहर्षं) तदादिश्यन्तां वर्णिकापरिग्रहाय सर्वे कुशीलवाः ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

सूत्रधार :- किं न पश्यसि ? ममाऽयमग्रजन्मा दशरथभूमिकामादाय गृहीतरामलक्ष्मणभूमिकाभ्यां निजकुमाराभ्यां, इत एवाऽभिवर्तते । तदावामप्यनन्तरकरणीयाय सज्जीभवावः । (इति निष्क्रान्तौ)

(प्रस्तावना)

[ततः प्रविशति यथानिर्दिष्टो दशरथो, विभवतश्च परिवारः]

दशरथ :- (रामं निर्वर्ण्य) (स्वगतं)

सम्भूतोऽयमिति प्रहर्षमसमं तत्तादृशं शैशव-
व्यापारैश्च, भजामि यौवनसमुन्मेषेण चास्याधुना ।
दिष्ट्या भूभरणादहं चिरतरं श्रान्तो गुणानां निधा-
वस्मिन्नस्य भरं कदाऽनुमुदितः पश्यामि ऋष्याश्रमान् ।। -१०

(सवितर्कं)

अकृतोद्वाहः कथमयमर्हः स्याद्राज्यस्य ? (विचिन्त्य)

अभिनवघनकोमलाङ्गभासः
समुचितमस्य वयो नवं गृहाय ।
तदिह विधिरमुष्य तुल्यरूपां
क्व नु घटयिष्यति वा वधूं न जाने ।। –११

(प्रविश्य कञ्चुकी)

कञ्चुकी :- विजयतां देवः । देव, मिथिलानगराज्जनकपुरोधाः शतानन्दः प्राप्तः ।

दशरथः - सत्वरं प्रवेशय ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

कञ्चुकी :- यदाज्ञापयति देवः । (इति निष्क्रम्य, शतानन्देन सह प्रविश्य)

इत इतो भगवान् ।

शतानन्द :- (राजानं निर्वर्ण्य, सबहुमानं)

ऋणतस्त्रिदिवौकसामृषीणां
यजनैरध्ययनैश्च मुक्तपूर्वः ।
उचितैस्तनयैश्चिरात्पितॄणां
अपि, मुक्तः प्रचकास्ति निर्वृतोऽसौ ॥ -१२

दशरथ :- (उपसृत्य) भगवन्नभिवादये ।

शतानन्द :- स्वस्ति भवते ।

कुमारौ :- (उपसृत्य) दाशरथी रामलक्ष्मणावभिवादयावहे ।

शतानन्द :- वत्सौ, आयुष्मन्तौ भूयास्तम् ।

दशरथ :- भगवन्, इत आस्यताम् ।

[सर्वे नाटयेन यथोचितमुपविशन्ति]

शतानन्द :- (रामं विवर्ण्य, दशरथं प्रति)

निवसद्भिर्गुणैरस्मिन् पुञ्जीभूय, तवात्मजे ।
मिथो विश्लेषजं दुःखमपनीतं निजं चिरात् ॥ -१३

दशरथ :- आर्य, सख्युर्मे कुशलं जनकस्य ?

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

शतानन्द :- अथ किम् ।

दशरथ :- किं फलमुद्दिशतस्तत्रभवत: तावत् , आगमनप्रसादः ?

शतानन्द :- राजन् ,

विदेहकन्यकां वेत्सि वीर्यशुल्कामयोनिजाम् ।
शरासनं च जानासि शाम्भवं तद्दुरासदम् ।। -१४

दशरथ :- आर्य, कथं न ज्ञायते ? श्रुतं चैतत् ।

जिज्ञासया तस्य शरासनस्य
परस्सहस्रा मिलिता नरेन्द्राः ।
एकोऽपि तेषामिदमानमय्य
सज्यं विधातुं बत नाक्षमिष्ट ।। -१५

लक्ष्मण :- (जनान्तिकम्) आर्य, किमीदृशमद्भुतसारं तत्कार्मुकम् ?

राम :- कस्सन्देहः । (विचिन्त्य)

दैवात्क्षत्रकुलेषु सम्भवममी लब्ध्वापि भूमीभुजः
कर्तुं नानमनं बलेन धनुषः शक्ता भवन्तीति यत् ।
माहात्म्यं दुरतिक्रमं हि गिरिजानाथस्य तत्सर्वथा
नो जाने कृतिनस्स एव भगवान् कस्य प्रसीदेदिति ।। -१६

(शतानन्दः "तवैवे"ति पवनव्याधिं नाटयति)

लक्ष्मण :- (सहर्षं, जनान्तिकं) आर्य, कथमाह "तवैवे"ति ?

CC-0.TSarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

कञ्चुकी :- यदाज्ञापयति देवः । (इति निष्क्रम्य, शतानन्देन सह प्रविश्य)

इत इतो भगवान् ।

शतानन्द :- (राजानं निर्वर्ण्य, सबहुमानं)

ऋणतस्त्रिदिवौकसामृषीणां
यजनैरध्ययनैश्च मुक्तपूर्वः ।
उचितैस्तनयैश्चिरात्पितॄणां
अपि, मुक्तः प्रचकास्ति निर्वृतोऽसौ ॥ -१२

दशरथ :- (उपसृत्य) भगवन्नभिवादये ।

शतानन्द :- स्वस्ति भवते ।

कुमारौ :- (उपसृत्य) दाशरथी रामलक्ष्मणावभिवादयावहे ।

शतानन्द :- वत्सौ, आयुष्मन्तौ भूयास्तम् ।

दशरथ :- भगवन्, इत आस्यताम् ।

[सर्वे नाट्येन यथोचितमुपविशन्ति]

शतानन्द :- (रामं विवर्ण्य, दशरथं प्रति)

निवसद्भिर्गुणैरस्मिन् पुञ्जीभूय, तवात्मजे ।
मिथो विश्लेषजं दुःखमपनीतं निजं चिरात् ॥ -१३

दशरथ :- आर्य, सद्युमें कुशलं जनकस्य ?

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

शतानन्द :- अथ किम् ।

दशरथ :- किं फलमुद्दिशतस्तत्रभवतः तावत्, आगमनप्रसादः ?

शतानन्द :- राजन्,

विदेहकन्यकां वेत्सि वीर्यशुल्कामयोनिजाम् ।
शरासनं च जानासि शाम्भवं तद्दुरासदम् ॥ -१४

दशरथ :- आर्य, कथं न ज्ञायते ? श्रुतं चैतत् ।

जिज्ञासया तस्य शरासनस्य
परस्सहस्रा मिलिता नरेन्द्राः ।
एकोऽपि तेषामिदमानमय्य
सज्यं विधातुं बत नाक्षमिष्ट ॥ -१५

लक्ष्मण :- (जनान्तिकम्) आर्य, किमीदृशमद्भुतसारं तत्कार्मुकम् ?

राम :- कस्सन्देहः । (विचिन्त्य)

दैवात्क्षत्रकुलेषु सम्भवममी लब्ध्वापि भूमीभुजः
कर्तुं नानमनं बलेन धनुषः शक्ता भवन्तीति यत् ।
माहात्म्यं दुरतिक्रमं हि गिरिजानाथस्य तत्सर्वथा
नो जाने कृतिनस्स एव भगवान् कस्य प्रसीदेदिति ॥ -१६

(शतानन्दः "तवैवे"ति पवनव्याधिं नाटयति)

लक्ष्मण :- (सहर्षं, जनान्तिकं) आर्य, कथमाह "तवैवे"ति !

CC-0TSarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

राम :- वत्स, नन्वयं तातमधिकृत्य ब्रवीति ।

शतानन्द :-

तवैव राजन्, निखिलागमज्ञात्
गुरोर्वसिष्ठान्मिथिलाधिपेन ।
ज्ञातुं सुतायाः खलु भागधेयं
भवत्सकाशं प्रहितोऽस्मि तेन ॥ -१७

तदद्य, भगवन्तमरुन्धतीजानिमानीय, तस्मै प्रदर्श्यतामिदम् ।

(इत्यालेख्यगतां सीताप्रतिकृतिं अर्पयति)

दशरथ :- (गृहीत्वा, निर्वर्ण्य) स्थाने खलु यत्नः । रैवतक, मद्वचनादमुं प्रस्तावं निवेद्य, तत्रभवन्तं प्रवेशय ।

कञ्चुकी - यदाज्ञापयति देवः (इति निष्क्रान्तः)

राम :- (चित्रफलकं निर्वर्ण्य, सहर्षमात्मगतं) अहो, अत्यद्भुतमिदमनवद्यं रूपम् !

प्राङ्निर्माय तिलोत्तमारतिशचीरम्भोर्वशीमेनकाः
सुन्दर्यप्सरसीः सरोजभवनोऽयं प्राप गर्वोच्छ्रयम् ।
तं तस्माद्व्यपनेतुमेव नियतं सौन्दर्यसारस्सवं
राज्ञस्तस्य सुतात्मना परिणतो, नेयं विधेश्चातुरी ॥ -१८

(ततः प्रविशति वसिष्ठः)

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

वसिष्ठ :- (राजानं निर्वर्ण्य, सानन्दं) अहो महद्भागधेयमस्य राजर्षेः ।

सम्भूतमखिलं यस्माज्जगदेतच्चराचरम् ।
स एव भगवानत्र चतुर्मूर्तिरवातरत् ॥ —१९

(दशरथः ससंभ्रमं उत्थाय, कुमाराभ्यां सह प्रणमति)

वसिष्ठ :- स्वस्ति भवते सहकुमाराय ।

शतानन्द :- आङ्गिरसः शतानन्दोऽहमभिवादये ।

वसिष्ठ :- अभिमतसिद्धिस्ते भूयात् ।

(सर्वे यथोचितमुपविशन्ति)

वसिष्ठ : वत्स शतानन्द, अपि कुशलं ब्रह्मविद्याविदे जनकाय ?

शतानन्द :-

ननु भवद्विषया स्मृतिरेकदा
तनुभृतामुदयस्य हि कारणम् ।
स्मरति यस्य भवानसकृन्मुदे
स कुशली नृपतिर्न कथं भवेत् ॥ —२०

राम :- (स्वगतं)

प्रतिकृतिमेतामधुना
पश्यामि पुरो यथा यथा तन्व्याः ।
सज्जति मामकमेतत्
मानसमस्यां तथा तथा किमिदम् ? ॥ —२१

लक्ष्मण :- (रामं निर्वर्ण्य, स्वगतं) अहो कथमिदमार्यस्य चित्रफलकं पश्यतः, चेतोगतं कमपि विकारं प्रथयति पुलकोद्भेदः !!

CC-0TSarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

शतानन्द :- राजन्, मदागमनप्रयोजनमावेदय गुरवे ।

वसिष्ठ :- निवेदितमेवेदं कञ्चुकिना रैवतकेन । तच्चित्रपटमर्पय ।

(इति राज्ञो हस्ताच्चित्रपटमादाय सादरं पश्यति)

राम :- (सविमर्शं, स्वगतं)

वीर्यात्कार्मुकमैशं
भङ्क्त्वा योऽस्याः करग्रहं कुर्यात् ।
धन्यः स एव लोके
व्यर्था सूतिस्तदन्यस्य ।। —२२

(विचिन्त्य) तदिदानीमननुमतस्तातचरणैः, इह कथं प्रवर्तिष्ये ? (सनिश्वासं) कथमयं अकाण्ड एव तां प्रति प्रवर्तयति मां मकरकेतनः ? दिष्ट्या साम्प्रतमसन्निहितो मे वयस्यस्तावत् अष्टावक्रः । यः प्रकटयेदेव जाल्मतया मदीयमिदं चापलम्

(ततः प्रविशति विदूषकः)

विदूषक :- सुदं मए महाराअस्स सिम्हाणे एव्व वट्टई मे वअस्सोत्ति । जाव णं उपसप्पेमि । [श्रुतं मया महाराजस्य सिंहासन एव वर्तते मे प्रियवयस्य इति । यावदेनं उपसर्पामि]

(उपसृत्य यथोचितमुपविशति)

वसिष्ठ :- (विमृश्य. स्वगतं) किमत्र वक्तव्यम् ?

अस्मिन्कुले भगवतो दिवसेश्वरस्य
रामात्मना परिणतः पुरुषः पुराणः ।
एषा विदेहधरणीरमणस्य गेहे
सीतात्मना परिणता स्वयमेव लक्ष्मीः ।। —२३

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

तदनयोरचिरादेव भविता समुद्राहः । भवतु ।

(प्रकाशं)

रेखास्वस्तिकशङ्खचक्रशफरच्छत्रध्वजाम्भोजवत्
पादेऽस्या मुखमिन्दुदीधिति रुचा वक्राः कुचौ संहतौ ।
नासा चम्पकमेव बिम्बमधरो नीलोत्पले लोचने
तद्राजन्, ननु सार्वभौमगृहिणी सत्यं भविष्यत्यसौ ॥ -२४

दशरथ :- (शतानन्दं प्रति) ब्रह्मन्, श्रुतमेतत्कर्णामृतम् ?

शतानन्द :- दिष्ट्या शृणोमि ।

वसिष्ठ :- (हस्तौ निर्वर्ण्य, स्वगतं) हन्त, समग्रेऽपि शुभलक्षणे किमप्यत्र चिह्नमवगम्यते । तन्नूनं रक्षोऽभिभवसूचकम् । (पुनर्निर्वर्ण्य, सहर्षं) कथं, तत्परिहारलक्षणमप्यत्रैव । (प्रकाशं)

अथ पतिव्रताग्रणीरियमिति मे निश्चयः ।
यतः पादनखास्स्निग्धाः ताम्रा वृत्तास्समुन्नताः ।
रोम चैकैकमेवास्या रोमकूपेषु दृश्यते ॥ -२५

दशरथ :- एतदेव मण्डनमङ्गनानाम् ।

(वसिष्ठः चित्रफलकं राज्ञः पुरः स्थापयति)

लक्ष्मण :- (जनान्तिकं) आर्य,

लिखता प्रतिकृतिमस्याः
व्यक्तान्यङ्गानि सन्तु लिखितानि ।
करपदरेखा विशदाः
कथमिव तेन प्रदर्शिताश्चित्रम् ॥ -२६

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

राम :- वत्स, सत्यमत्यद्भुतं चित्रकौशलम् ।

विदूषक :- (चित्रफलकं पश्यन्) साहु विहे साहु। ईदिसी दे सिद्दिविअ ट्ठिदा। [साधु विधे साधु। ईदृशी ते सिद्धिरिव स्थिता]

राम :- [विमृश्य, स्वगतं]

समुद्वाहः श्लाघ्यो भवति गुरुभिर्यः सुघटितः
तदेतस्मिन्नेषामभिमतमविज्ञाय सहसा ।
विधातुं न स्थाने प्रयतनमतो वाचि नियमं
दधानस्सन्नासे, भवतु, विधिरेवात्र घटकः ।। -२७

विदूषक :- (स्वगतं) इमं पडिकिदिं पेक्खंतो वअस्सो साहिलासो विअ दीसई। ता पुच्छिस्सं दाव णं। (जनातिकं) वअस्स, काए उण एसा पडिकिदी ? कस्स वा एसा कण्णआ। किंणिमित्तं एत्थ पाविदा ? (इमां प्रतिकृतिं प्रेक्षमाणः वयस्यः साभिलाप इव दृश्यते। तस्मात् प्रक्ष्यामि तावदेनम्। (जनान्तिकं) वयस्य, कस्याः पुनः एषा प्रतिकृतिः ? कस्य वा एषा कन्यका ? किं निमित्तमत्र प्रापिता ?

राम :- (स्वगतं) चपलोऽयं वटुः। किमत्र वक्तव्यम् ?
भवतु। (प्रकाशं, जनान्तिकं)

कन्या जनकमहीन्दोः
सा विदिता जगति वीर्यशुल्केति ।
प्रतिकृतिरेषा तस्याः
भावि ज्ञातुं गुरोरिहाऽऽनीता ।। -२८

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

विदूषक :- (सहर्षमात्मगतं) ठाणे वअस्सस्स अहिलासो ।

(प्रकाशं, जनान्तिकं) जं इमं पेख्खंतो तुमं अत्तणो ण प्पहवसि तं जुज्जइ ।

(स्थाने वयस्यस्य अभिलाषः । यामिमां प्रेक्षमाणः त्वं आत्मनः न प्रभवसि तद्युज्यते)

राम :- (स्वगतं) कथं विदितमनेन चपलेन ? (प्रकाशं)

मूर्ख, कोऽयमस्थाने प्रलापः ?

विदूषक :- णहि णहि (नहि नहि)

राम :- कथं ?

विदूषक :- पुछ्छ दाव अत्तणो अंगेसु पप्फुरिदाणं पुलआणं ।

(पृच्छ तावत् आत्मनः अङ्गेषु प्रस्फुटितान् पुलकान्)

राम :- (अङ्गं निरूप्य) सखे,

अन्तर्नियमितमेतत्

तैस्तैराकारगोपनैर्वृत्तम् ।

प्रथयति किं वा करवै

पापः पुलकस्तु दुर्निवारोऽयम् ॥ -२९

तदेतत् मनस्येवास्ताम् ।

(नेपथ्ये)

सदः सम्प्रत्येव त्रिदशपतिमित्रं दशरथः

सुताभ्यामध्यास्ते सममपि वसिष्ठेन गुरुणा ।

अतो मे सम्पन्नं ध्रुवमभिमतं, सत्वरमहं

व्रजिष्यामि क्षोणीपतिसविधमस्मिन्नवसरे ॥ -३०

(सर्वे ससंभ्रमं कर्णं ददति)

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

दशरथ :- भगवन्, कस्यायममृतनिष्यन्दमधुरो वाग्विलासः ?

वसिष्ठ :- (सप्रत्यभिज्ञं) मन्ये, भगवान्विश्वामित्रो व्याहरति ।

(ततः प्रविशति विश्वामित्रः)

विश्वामित्र :- (राजानं, निर्वर्ण्य)

येन, प्राप्ते दानवैस्सम्प्रहारे
कृच्छ्रात्तस्मात्त्रायते पाकशत्रुः ।
अद्य प्राप्तः सूर्यवंशाब्धिचन्द्रः
सोऽयं दिष्ट्या दृक्पथं मे चिरेण ।। -३१

दशरथ :- (उपसृत्य) ऋषे, नमस्ते ।

विश्वामित्र :- राजन्, कुशलमस्तु । (उपसृत्य वसिष्ठं प्रति)

कौशिको विश्वामित्रोऽहमभिवादये ।

वसिष्ठ :- अक्षरं ते ज्योतिः प्रकाशताम् ।

शतानन्द :- भगवन्,

तव सञ्चारतः पूतं याभ्यामेतज्जगत्त्रयम् ।
पुनीतां ताविमौ पादौ उत्तमाङ्गं ममाऽऽनतम् ।। -३२

(इति प्रणमति)

विश्वामित्र :- आयुष्मान् भूयाः ।

राम :- (उपसृत्य) एष रामस्य शिरसा प्रणामः ।

विश्वामित्र :- वत्स, अभिमतसिद्धिस्ते भूयात् ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

विदूषक :- (जनान्तिकं) वअस्स, सिद्धं दे दाणिं मणीसिदं ।

(वयस्य, सिद्धं ते इदानीं मनीषितम्)

लक्ष्मण :- रामावरजो लक्ष्मणोऽहमभिवादये ।

विश्वामित्र :- वत्स, रामे दृढभक्तिर्भूयाः ।

दशरथ :- भगवन् , आसनपरिग्रहः क्रियताम् ।

(सर्वे यथोचितमुपविशन्ति)

दशरथ :-

कच्चित् क्रियास्तव भवन्ति निरस्तविघ्नाः ?
कच्चिन्मुने, तव तपस्त्रिविधं समिन्धे ? ।
कच्चित्तपोवनमृगाः सुखिताश्चरन्ति ?
कच्चिद्द्रुमा वनगजैरकृतोपमर्दाः ? ॥ -३३

विश्वामित्र :-

त्वयि शासितरि क्षितिं क्षितीश,
क्व मुनीनामशुभानि संभवेयुः ।
परिजाग्रति खे तुषारभानौ
कुमुदानां भविता न किं प्रसादः ॥ -३४

(रामं निरूप्य, स्वगतं)

शयानं दुग्धाब्धौ दशवदनवीर्यप्रमथिताः
शरण्यं गीर्वाणाः शरणमगमन् यं किल पुरा ।
स एवाऽयं साक्षाद्दशरथतपोभिर्निरुपमैः
पुमान्पुत्रत्वेन स्वयमिह पुराणः परिणतः ॥ -३५

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

दशरथ :- भगवन्, कोऽयमागमनप्रयोजनानुग्रहः ?

विश्वामित्र :- राजर्षे, श्रूयताम् ।

य: कण्डूलभुजाविघूर्णितहराचलाद्रिणा कन्दुक-
क्रीडां प्रागतनिष्ट, येन विबुधाः कारागृहं प्रापिताः ।
यस्माद्भानुविधू भयेन चरतः, किंचाऽतिभीतो मरुत्
सर्वेषां स हि रक्षसामधिपतिर्वीरः श्रुतो रावणः ।। -३६

दशरथ :- अयि, कथं न ज्ञायते सः त्रिजगतीविमर्दनावलम्बितोत्कण्ठो दशकण्ठः ?

विश्वामित्र :-

साम्प्रतं यियक्षमाणः
तदनुचराभ्यां मारीचसुबाहुभ्यां ।
मूर्तिमद्भ्यामिव विघ्नाभ्यां
क्रियाः परित्रातुं रामभद्रमभिलषामि ।। -३७

दशरथ :- (वसिष्ठं प्रति जनान्तिकं) भगवन्, कथं महत्या सेनयाऽऽवृतमपि मामविभाव्य क्षीरकण्ठं राममेवाभिलषति ?

वसिष्ठ :- राजन्, माननीये मुनौ, नात्र किञ्चिद्विप्रतीपं ब्रूहि ।

दशरथ :- (प्रकाशं) कौशिक, शिरसा ते निदेशो गृहीतः ।

विश्वामित्र :- तदाज्ञापयतु भवान् रामभद्रम् ।

दशरथ :- वत्स, सानुजस्त्वं महर्षिमनुयाहि ।

[रामलक्ष्मणौ सप्रणामं परिक्रम्य मुनिपार्श्वगौ भवतः]

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

विदूषक :- (जनान्तिकं) वअस्स, मह उण कों णिओओ ?

[वयस्य, मम पुन: को नियोग:]

राम :- वयस्य, त्वमप्यनेन शतानन्देन सह गत्वा प्रियाप्रवृत्तिं अवगमयस्व ।

शतानन्द :- राजन्, मामनुजानीहि मिथिलागमनाय ।

दशरथ :- यदभिरूचितं भवते ।

(शतानन्द: निष्क्रान्त:, विदूषकश्च)

राम :- (सनिश्वासं)

क्षणपरिचयलाभान्मानसं तत्र सक्तं
बहुभिरपि निरुद्धं सर्वथैवाऽभ्युपायै: ।
चिरपरिचयवन्तं मां कथं वा विहाय
प्रतिकृतिमनुयाति त्यक्तदाक्षिण्यमेतत् ॥ —३८

विश्वामित्र :- राजन्, स्वस्त्यस्तु ते, साधयामो वयम्

(इति कुमाराभ्यां सह निष्क्रान्त:)

(नेपथ्ये वैतालिकौ)

एक :—

शीतीकृत्य मधु स्वयन्मधुकर: स्वां पाययत्यङ्गनां
पक्षाभ्यामुपगूहतेऽधिवलभि प्रीत्या कपोत: प्रियाम् ।
चञ्चूकृतगृहीतनालनलिनीपत्रातपत्रस्य च
च्छायायां वरटां निवेश्य सुखित: शेते मराल: स्वयम् ॥
—३९

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

द्वितीय :-

उद्दामाभिर्निजमणिगणश्रीमतीभ्यः स्थलीभ्यः
सम्पर्केण स्वकरनिकरैरुत्थिताभिश्शिखाभिः ।
लोकालोकक्षितिधरमतिक्रम्य विद्योतमानं
राजन्नीराजयति सपदि त्वत्प्रतापं दिनेशः ॥ —४०

दशरथ :- भगवन्, माध्यन्दिनीं सन्ध्यामुपासीत तत्रभवान् । अहमपि समयोचितं आचरामि । (इति निष्क्रान्तास्सर्वे)

॥ इति प्रथमोऽङ्कः ॥

*

॥ अथ द्वितीयोऽङ्कः ॥

[ततः प्रविशति गौतमशिष्यः]

गौतमशिष्य :-

रामस्य पावनतयापि च विक्रमेण
जानामि तं पुनरमानुषमेव कंचित् ।
तत्कार्मुकं नियतमैशमसौ विभज्य
कुर्यात्करग्रहविधिं जनकात्मजायाः ॥ —४१

(इति सहर्षं परिक्रामन्, पुरो विलोक्य)

कथमयं शतानन्दशिष्यो नाडायन इत एवाऽभिवर्तते ।

नाडायन :- (प्रविश्य) अय्य दब्भायण, कहिं पत्थिदोसि ?

[आर्य दार्भ्यायन, कुत्र प्रस्थितोऽसि]

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

दाल्भ्यायन :- गुरोराश्रमाच्छतानन्दसकाशम् ।

नाडायन :- किं णिमित्तं ? [किं निमित्तम्]

दाल्भ्यायन :-

शिलाभावं नीता चिरतरमहल्या स्वदुरितैः
समं प्राप्तस्यैवा कुशिकतनयेनाऽऽश्रमपदम् ।
पदस्पर्शात्सद्यो दशरथतनूजस्य सहसा
प्रपन्ना स्वं भावं प्रियतममुपेत्य प्रमुदिता ॥ –४२

तमचिरप्राप्तमानन्दं शतानन्दाय निवेदयितुं गच्छामि ।

नाडायन :- अहो पावणत्तणं विकत्तणकुलकुमारस्स ।

[अहो पावनत्वं विकर्तनकुलकुमारस्य]

दाल्भ्यायन :- न केवलं पावनत्वं, वीर्यमप्यनितरसाधारणमस्य ।
तथाहि –

बीभत्सामतिभीषणप्रहरणां घोरस्वनां ताटकां
रुध्वाऽध्वानमवस्थितां स कलयन्स्त्रैणाद्वधाच्छङ्कितः ।
हेलाकृष्टधनुर्गुणो गुणनिधिर्धीरो गुरोराज्ञया
तूर्णं प्रापयदन्तकान्तिकमिमामेकेषुणा राघवः ॥ –४३

नाडायन :- जा खु सुप्पणहीए समं णिअपुत्तवहप्पवुत्तं दासरहिं भक्खिदुकामा मग्गं निरुद्धवदित्ति सुदं आसी ।

[या खलु शूर्पणखया समं निजपुत्रवधप्रवृत्तं दाशरथिं भक्षयितुकामा मार्गं निरुद्धवतीति श्रुतमासीत्]

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

दाल्भ्यायन :- सापि शूर्पणखा नाम राक्षसी तदनुजेन लक्ष्मणेन हृतकर्णनासापुटा विस्वरं नदन्ती भ्रातरं शरणं प्रयाता ।

नाडायन :- (सातङ्कं) अय्य, एसो सुप्पणहावुत्तंतो अणत्थोत्ति संभावेमि । तदो वरं तस्स खत्तिअकुमारस्स का पउत्ती ? ।

[आर्य, एषः शूर्पणखावृत्तान्तः अनर्थ इति सम्भावयामि । ततः परं तस्य क्षत्रियकुमारस्य का प्रवृत्तिः]

दाल्भ्यायन :- प्रविश्य सिद्धाश्रमपदं, वियक्षमाणस्य तस्य मुनेर्विघ्नमाचरितुं प्राप्तयोः सुबाहुमारीचयोः दाशरथिना तूर्णं ईदृशी गतिरनुष्ठिता ।

नाडायन :- कीरिसी ? [कीदृशी]

दाल्भ्यायन :-

सुबाहुरिषुणैकेन प्राणैरेव वियोजितः ।
द्वितीयेन तु मारीचः प्रापितस्तेन वारिधिम् ॥ --४४

तदनु कौशिकेन सह गुरोराश्रमं प्रविष्टः । चरणरज :- परिपूतया सम्भावितश्चाहल्यया, धनुरवजिगमिषया मिथिलां प्रस्थितश्च । त्वं पुनः क्व गच्छसि ?

नाडायन :- संपदं अभ्भाअदस्स भअवदो कोसिअस्स सपज्जोवाअणाणि सज्जीकादुं राअदुआरं गच्छेमि ।

[साम्प्रतं अभ्यागतस्य भगवतः कौशिकस्य सपर्योपायनानि सज्जीकर्तुं राजद्वारं गच्छामि]

(नेपथ्ये)

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

इदो इदो पिअसही [इतः इतः प्रियसखि]

नाडायन :- (कर्णं दत्वा, ऊर्ध्वमवलोक्य) अए, एसा णअररामणीअअं दट्ठुकामा जाणई, पासादसिहरे दीसई । ता एत्थ अम्हेहिं न ठादव्वं । एहि, गच्छम्ह । [अये, एषा नगररामणीयकं द्रष्टुकामा जानकी प्रासादशिखरे दृश्यते । तस्मादत्र आवाभ्यां न स्थातव्यम् । एहि, गच्छावः]

(इति निष्क्रान्तौ)

॥ मिश्रविष्कम्भः ॥

[ततः प्रविशति यथानिर्दिष्टा सीता सखी च]

सीता :- अहो, चंदलेखे, परिदो परिभूसिदविविहापणरमणिज्जा मिलिदणरिंदसमहिट्ठिदकमणिज्जोपकरिज्जा समंतदो संगदभूसुरसमीरिदब्रंहघोसमुहरिदा अमंदाणंदभरिदसअललोअसंकुला अज्ज सविसेसं विभाइ मिहिलाणअरी । [हला, चन्द्रलेखे, परितः परिभूषितविविधापणरमणीया मिलितनरेन्द्रसमधिष्ठितकमनीयोपकार्या समन्ततः सङ्गतभूसुरसमीरितब्रह्मघोषमुखरिता अमन्दानन्दभरितसकललोकसङ्कुला अद्य सविशेषं विभाति मिथिलानगरी]

चन्द्रलेखा :- भट्टिदारिए, तुह किदे खु एसा सोहा णअरस्स । [भर्तृदारिके, तव कृते खलु एषा शोभा नगरस्य]

सीता :- (सनिश्वासं, स्वगतं) ईरिसे वि पदिसंजोअजोग्गे वयम्मि अलद्धमणरहाए मह विडंबणा एसा । [ईदृशेऽपि पतिसंयोगयोग्ये वयसि, अलब्धमनोरथायाः मम विडम्बना एषा]

CC-0.TSarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

(निमित्तं सूचयन्ती, प्रकाशं) अंहो, किंति पफ्फुरइ मे वामओ अपंगो । [अहो, किमिति प्रस्फुरति मे वामः अपाङ्गः]

चन्द्रलेखा :- सहि, सुहसूअअं खु एदं (सखि, शुभसूचकं खलु एतत्)

सीता :- (समन्ताद्विलोक्य) को उण एसो महंतेण सिस्ससंघेण परिवुदो महेसी, महिदतित्थस्स पुव्वुत्तरे दीसइ ? । [कः पुनः एषः महता शिष्यसङ्घेन परिवृतः, महर्षिः, महिततीर्थस्य पूर्वोत्तरे दृश्यते ?]

चन्द्रलेखा :- अज्ज मए जण्णसालं पविट्ठाए कोसिओ आयदोत्ति सुदं । सो एसो हविस्सदि । [अद्य मया यज्ञशालां प्रविश्य कौशिक आगत इति श्रुतम् । स एषः भविष्यति]

सीता :- (पुरोऽवलोक्य, सहर्षविस्मयं) हला, पेक्ख पेक्ख । एदं उज्जाणं पविसंतो को उण एसो णीलुप्पलसामलो, विसालवक्खत्थलो पुण्णिमाचंदसरिसवअणो, पप्फुल्लपुंडरीअलोअणो, वामकरकलिदविअडकोदंडो, अण्णकरधारिदपिप्पलदंडो, अंसणिअंतिदतूणीरजुअलचुंबिमुद्धसिहंडमंडणो आजाणुबाहु खत्तिअकुमारो विअ दीसइ । [हला, पश्य, पश्य, एतदुद्यानं प्रविशन् कः पुनरेषः नीलोत्पलश्यामलः, विशालवक्षस्स्थलः, पूर्णिमाचन्द्रसदृशवदनः, प्रफुल्लपुण्डरीकलोचनः, वामकरकलितविकटकोदण्डः, अन्यकरधारितपिप्पलदण्डः, अंसनियन्त्रितनूणीरयुगलचुंबिमुग्धशिखरमण्डनः, आजानुबाहुः क्षत्रियकुमारः इव दृश्यते ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

चन्द्रलेखा :- सुदं मए वीसामित्तेण सह दसरहपुत्तो रामभद्दो णाम आयदोत्ति। सो एसो भवे। [श्रुतं मया विश्वामित्रेण सह दशरथपुत्रः रामभद्रः नाम आगत इति। स एषः भवेत्]

(ततः प्रविशति रामः)

राम :- अहो मम मानससरसोऽपि प्रकृष्टमिदं सरः। तदस्य तीरोद्याने विविधकुसुमसौरभ्यलुभ्यदलिकुलमन्दानिलमासेवमानः प्रियोत्कलिकाकुलितमात्मानं विनोदयामि। (इति परिक्रामन्, पुरो विलोक्य) कः पुनरयं माधवीलताप्रच्छाये निद्राति? (निपुणं, निरूप्य, सहर्षं) अये, वयस्य एवायं अष्टावक्रः।

[ततः प्रविशति यथानिर्दिष्टोऽष्टावक्रः]

अष्टावक्र :- वअस्स, अवगमिदा मए तुह पिआपवुत्ती। दिट्ठिआ, तुमं वि एत्थ सण्णिहिदोसि। [वयस्य, अवगमिता मया, तव प्रियाप्रवृत्तिः दिष्ट्या, त्वमपि अत्र सन्निहितोऽसि]

राम :- अये, कथमेष मामेवोद्दिश्य उत्स्वप्नायते।
(उपसृत्य, प्रबोधयति)

अष्टावक्र :- (उत्थाय ससंभ्रमम्) कहं सिविणअदिट्ठो एसो पच्चक्खो एव्व संवुत्तो। वअस्स, सोत्थि होदे। [कथं स्वप्नदृष्टः एषः प्रत्यक्ष एव संवृत्तः। वयस्य, स्वस्ति भवते]

राम :- अपि कुशलं वयस्यस्य?

CC-0.TSarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

अष्टावक्र :- विसेसदो अज्ज एत्थ वअस्सदंसणेण, कहं उण तुमं एत्थ पत्तो ? कहं अ एआई इदं ऊज्जाणं पविट्ठो ?
[विशेषतः अद्यात्र वयस्यदर्शनेन, कथं पुनः त्वमत्र प्राप्तः ? कथं च एतस्याः इदमुद्यानं प्रविष्टः ?]

राम :- वयस्य, सम्प्रति मिथिलाधिपमखदिदृक्षया समागतेन गुरूणा कौशिकेन समभिहागतः । आदिष्टश्च तेनात्र –

अम्भः प्रसन्नसलिलावनमित्यमुष्मिन्
माध्यन्दिनं नियममाचरितुं यतिष्ये ।
तैस्तैः क्रमं, त्वमपि वत्स मनोज्ञभावैः
अध्वश्रमं प्रशमयन् प्रमदं भजेति ॥ –४५

अष्टावक्र :- लक्खणो उण कहिं ? [लक्ष्मणः पुनः कुत्र]

राम :- स्थापितः गुरोरन्तिके ।

सीता :- (स्वगतं) अम्हो, एसो अट्ठावक्केण उववण्णिदगुणो मह हिअअचोरो महाणुहाओ दिट्ठिआ णअणपहं पत्तो ।
(अहो, एष: अष्टावक्रेण उपवर्णितगुणः मम हृदयचोरः महानुभावः दिष्ट्या । नयनपथं प्राप्तः]

राम :- किमाचरितस्त्वया वयस्यनिदेशः ?

अष्टावक्र :- ण केवलं आअरितो, किं दु तह विकिदं, जह जाणई तुह गुणगणं सुणिअ, "कदा तुमं पेक्खामित्ति" उक्कंठाए अत्तणो ण प्पहवदि । [न केवलमाचरितः, किन्तु

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

तथा विकृतं, यथा जानकी तव गुणगणं श्रुत्वा, "कदा त्वां प्रेक्षिष्ये" इति उत्कण्ठया आत्मनः न प्रभवति]

राम :- साधु वयस्य साधु । अपि पश्यामि तां हृदयहारिणीं प्रियाम् ।

अष्टावक्र :- वअस्स, तुमं एत्थ आणअंतेण दइवेण सव्वं एदं सुविहिदं करियदित्ति तक्केमि । ता, मा उत्तम, पेक्खंम दाव ईमस्स तडाअस्स रमणीअत्तणं । [वयस्य, त्वामत्र आनयता देवेन सर्वमेतत्सुविहितं कुर्यादिति तर्कयामि । तस्मात्, मा उत्ताम्य, प्रेक्षावहे तावदस्य तटाकस्य रामणीयकम्]

राम :- तथा (इति परिक्रम्य, सरस्तीरे तेन सहोपविश्य,)] अहो, रामणीयकमस्य सरसः -

आमूलप्रकटाब्जनालनिकरं ज्योत्स्नातमिस्राकुलां
श्वेताम्भोरुहनीलनीरजरुचा नैशीं दधानं श्रियम् ।
शश्वन्मञ्जुलमल्लिकाक्षविरुतापूर्णप्रतीरान्तरं
मध्याह्नानिलमन्दचङ्क्रमपरिक्षीणोर्मिकोलाहलम् ॥ –४६

अष्टावक्र :- (सरोऽवलोक्य, स्वगतं) कहं एत्थ सलिले सीदाए एव्व पडिबिंबो दीसई । दाणिं सा पासादसिहरं आरूढेत्ति तक्केमि । दिट्ठिआ, एदं संघडिदं । (प्रकाशं) वअस्स, पेक्ख पेक्ख, किं वि एदं सलिले दीसइ ।

[कथमत्र सलिले सीतायाः एव प्रतिबिम्बः दृश्यते । इदानीं सा प्रसादशिखरमारूढेति तर्कयामि । दिष्ट्या एतत्सङ्घटितम् । वयस्य, पश्य पश्य, किमपि एतत् सलिले दृश्यते]

CC-0TSarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

राम :- (निरूप्य, सहर्षं)

निरुपमरुचिरूपां यां समालोक्य चित्ते
भृशतरमहमासं साभिलाषस्तदादि ।
सरसि नियतमस्मिन्बिम्बिता सैव दिष्ट्या
सफलयति मृगाक्षी लोचने साम्प्रतं मे ॥ —४७

सीता :- (स्वगतं) अम्हो, इमं पेक्खंतीए मह चेदो जादुअण हिण्णादपुव्वं कंवि विआरं पडिवज्जइ । [अहो, इमं प्रेक्षमाणाया मम चेतः जातुचिदपि अस्मादपूर्वं कमपि विकारं प्रतिपद्यते]

चन्द्ररेखा :- (सीतां निरूप्य, स्वगतं) कहं एसा इमं पेक्खंती पत्तविआरं वि अत्ताणं लज्जाए मह गोवावेइ । (प्रकाशं) सहि जाणइ, पेक्ख, पेक्ख, एसो दंसणिज्जो वट्टइ । [कथमेषा इमं प्रेक्षमाणा पत्रविकारमिव आत्मानं लज्जया मे गोपायति (प्र) सखि, जानकि, पश्य पश्य, एष दर्शनीयो वर्तते]

सीता :- (स्वगतं) निउणा खु एसा जं विण्णादो मह चित्तगदो अत्थो । होदु । अण्णदो दंसेमि (इति पुरतः विहरन्तं कलहंसं अपदिश्य ब्रवीति) (प्रकाशं) हला माणसविहारिणो कमणीयो खु सम्भवो एदस्स । [निपुणा खलु एषा, यया विज्ञातः मम चित्तगतोऽर्थः । भवतु । अन्यतः दर्शयामि । हला, मानसविहारिणः कमनीयः खलु सम्भव एतस्य]

चन्द्ररेखा :- जो उण तुए पुणो पुणो पेक्खीअदि, सो कहं कमणीओ ण हवे । [यः पुनः, त्वां पुनः पुनः प्रेक्षते सः कथं कमनीयो न भवेत्]

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

सीता :- दंसणीअं वत्थु दंसणकुडूहलं उप्पदेइ एव्व । किमत्थ अच्चरिअं । [दर्शनीयं वस्तु दर्शनकुतूहलं उत्पादयत्येव । किमत्राश्चर्यम्]

चन्द्ररेखा :- (स्वगतं) कहं, गोविदाणिआसआ अण्णदो एव्व वाहरदि (प्रकाशं) सहि, अब्भुदो खु एसो तुह सिणेहपदं राअहंसो । [कथं, गोपितनिजाशया अन्यतः एव व्यवहारति । सखि, अद्भुतः खलु एष तव स्नेहपदं राजहंसः]

सीता :- कहं विअ ? [कथमिव]

चन्द्ररेखा :- जस्स णिहिलाइं वि अंगाइं सामलाइं ।
[यस्य निखिलान्यपि अङ्गानि श्यामलानि]

(सीता सासूयं पश्यति)

चन्द्ररेखा :- तुह आसआणुरोहि वि जणे कहं कुप्पसि ?
[तव आशयानुरोधिवचनायापि जनाय कथं कुप्यसि]

(सीता सलज्जमधोमुखी तिष्ठति)

राम :- वयस्य,

किमपि किमपि सख्या व्याहरन्ती मृगाक्षी
तदभिहितवचोभिः सर्वथाऽनुत्तरैव ।
ध्रुवमधिगतलज्जाभोगनम्राननाब्जा
शबलयति दृशैषा पश्य वक्षोजयुग्मम् ॥ —४८

अपि नाम मनोरथो मे सम्पद्येत ?

CC-0.TSarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

विदूषकः :- जं हरसरासणभंजणे वि समत्थो तुमं एत्थ विसए उज्जोअमाकरेसि ता किंति भणिदव्वं ? [यदा हरशरासनभञ्जने समर्थस्त्वं अत्र विषये उद्योगमाकरोषि तदा किमिति भणितव्यम्]

राम :- (निःश्वस्य) शृणु सखे,

यन्नः प्रतिकृतिविषये
मिथिलागमने च केन वा विहितः ।
घटयति भवितव्यार्थं
नियतं नियतिः क्रमेणैव ।। —४९

चन्द्रेखा :- सहि, अगोवणिज्जो खु एसो अत्थो ता किं ति गोवाएसि ?

[सखि, अगोपनीयः खलु एषोऽर्थः, तस्मात् किमिति गोपायसि]

सीता :- (सस्मितं) सहि, हिअअस्स वि किं गोपणिज्जं अत्थि ? किंदु, लज्जापरवसा अत्तणो ण प्पहवेमि ।

[सखि, हृदयस्यापि किं गोपनीयमस्ति ? किन्तु, लज्जापरवशा आत्मनः न प्रभवामि]

चन्द्रेखा :- वितिण्णपुरंदराभअदक्खिणस्स णिहिलखत्तिअमुउटमणिप्पभाइदचलणजुअलस्स विअत्तणकुलजलहिकोत्थुहस्स दशरहणरिंदस्स अणुरूवगुणे तणए ठाणे दे अहिलासो । [वितीर्णपुरन्दराभयदक्षिणस्य निखिलक्षत्रियमकुटमणिप्रभावितचरणयुगलस्य विकर्तनकुलजलधिकौस्तुभस्य दशरथनरेन्द्रस्य अनुरूपगुणे तनये स्थाने तेऽभिलाषः]

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

सीता :- (सनिःश्वासं) सहि, सच्चं एदं जुज्जइ। किंदु, कुंढिदत्तिज्जवण-भूवलयस्स हरधनुसो णिअमणे मह संसओ वट्टइ। [सखि, सत्यमेत-द्युज्यते। किन्तु, कुण्ठितत्रियोजनभूवलयस्य हरधनुषो नियमने मम संशयो वर्तते]

चन्द्ररेखा :- इदिशस्स महाभाअस्स तं वि ण दुक्करंत्ति मण्णेमि। [ईदृशस्य महाभागस्य तदपि न दुष्करमिति मन्ये]

सीता :- अण्णो वि मह अत्थि एदस्सिं वितक्को। [अन्योऽपि ममास्ति एतस्मिन्वितर्कः]

चन्द्ररेखा :- को विअ [क इव]

सीता :- एसो खु ईरिसपरिपंडुरकपोलेहिं अवहीरिदचंदमंडलो पडिक्खा-मधूसरदेहो सोहग्गो मम्मह वि हेओ विअ दीसइ। ता तक्केमि कहिं वि इत्थियम्मि बद्धाहिलासोत्ति। [एष खलु ईदृशपरिपाण्डुर-कपोलाभ्यां अवधीरितचन्द्रमण्डलः परिक्षामधूसरदेहः शोकार्तः मन्मथोऽपि हेय इव दृश्यते। तस्मात्तर्कयामि कस्यामपि स्त्रियां बद्धाभिलाप इति]

चन्द्ररेखा :- (रामं निर्वर्ण्य स्वगतं) सच्चं, णिउणा खु एसा (प्रकाशं) सहि, तुइ एव्वेत्ति तक्केमि। [सत्यं, निपुणा खलु एषा। सखि, त्वय्येवेति तर्कयामि]

सीता :- कहं विअ [कथमिव]

चन्द्ररेखा :- सुदं मए अट्ठावक्कमुहादो, सदाणंदणीदाए तुह पडिकिदीए दंसणेण तुइ अणुरत्तोत्ति। [श्रुतं मया अष्टावक्रमुखात्, शतानन्दनीतायाः तव प्रतिकृत्याः दर्शनेन त्वयि अनुरक्त इति]

CC-0.TSarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

सीता :- दिट्ठिआ, किदत्थम्हि । [दिष्ट्या, कृतार्थास्मि]

विदूषक :- हा, वअस्स, तुमं एव्व उद्दिसिअ वाहरेदि, पेक्ख ।
[हा, वयस्य, त्वामेवोद्दिश्य व्यवहरति, पश्य]

राम :-

अस्यामजस्रपरिबद्धमनोरथस्य
मां पश्यतीति मम चेतसि निश्चयोऽसौ ।
तस्याः कटाक्षविसरस्य परार्थजन्मा
पात्रं पुनर्भवति कस्तदहं न जाने ।। -५०

(सविषादं) कथमत्र सहसा जलचापल्यान्न दृश्यते प्रियाप्रतिबिम्बम् ।

विदूषक :- एसो दुट्ठकलहंसो जलं ओलोडेइ । [एषः दुष्टकलहंसः जलं आलोडयति] ता एणं पहरिस्सं । [तस्मात् एनं प्रहरिष्यामि]
(इति दण्डकाष्ठं उद्यच्छति)

राम :- प्रियाचङ्क्रमणानुकारी नायमुचितोऽवमानयितुम् । तदेनमहमनुनयामि । भो राजहंस,

गुरुजनसविधे पुरा मृगाक्षीं
अभवदनीश्वर एव वीक्षितुं यः ।
पुनरिह किमु वञ्च्यते जनोऽयं
कथमपि सम्प्रति तां समीक्षमाणः ।। -५१

विदूषक :- किं एतस्सिं जलचरे मुहा इमिणा अणुणएण । ता प्पासादवादाअणे एव्व दिट्ठिं कदुअ सादरं पेक्ख । [किमेतस्मिन् जलचरे मुधाऽनेनानुनयेन । तस्मात् प्रासादवातायने एव दृष्टिं कृत्वा सादरं पश्य]

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

राम :- मूर्ख, किं वदसि ?

निसर्गभीरवः पुंसामाभिमुख्यं कुलाङ्गनाः ।
न सहन्ते दृश इव प्रसरं रवितेजसाम् ।। -५२

विदूषक :- ता ताए आलेक्खं णिम्माअ खणं णिव्वण्णअंतो णिव्वुदो होहि ।
[तस्मात् तस्या आलेख्यं निर्माय क्षणं निर्वर्णयन्निर्वृतो भव]

राम :- उदारः कल्पः । कः पुनरत्र चित्रसम्भारः ?

विदूषक :- एसो संपदेमि (इति निष्क्रम्य, पुनः प्रविश्य) वअस्स, अअं चित्तसंभारो । [एषः सम्पादयामि । वयस्य, अयं चित्रसम्भारः]

राम :- (निर्वर्ण्य) वयस्य, साधु सम्पादितम् ।

मकरन्दरसो मषी
सरोजच्छदनं चित्रपटोऽथ तूलिका च ।
नवचम्पककुड्मलः
तदेतत्त्रयमस्याः सुकुमारतानुरूपम् ।। -५३

विदूषक :- विस्सद्दं लिहदु भवं [विस्रब्धं लिखतु भवान्]

राम :- (तथा कुर्वन्) सखे, पश्य, पश्य

तिरयति बाष्पश्चक्षुः
दृग्दोषो मा भवत्विति वाऽस्याः ।
भवति मदङ्गस्पर्श-
प्लोषं हर्तुं करे च घर्माम्बु ।। -५४

सीता :- सहि, पेक्ख दाव एसो काए वि पडिकिदिं चित्ते आलिहदि ।
[सखि, पश्य तावत् एषः कस्या अपि प्रतिकृतिं चित्रे आलिखति]

CC-0TSarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

चन्द्ररेखा :- (निपुणं निर्वर्ण्य)सहि, एदं आलेक्खं तुह रूवं एव्व संवदइ । (सखि, एतदालेख्यं तव रूपमेव संवदति) (सीता सलज्जस्मितं तामवेक्षते)

राम :- (सरोऽवलोक्य) सम्प्रति, निर्वृत्तकलहंसव्यापारतया जलेऽपि बिम्बमस्याः स्फुटमवलोक्यते ।

तैस्तैर्भावविशेषैस्सकृदालेख्ये सकृद्विम्बे ।
विनिहितमन्तःकरणं पारिप्लवतामिदं याति ।। -५५

चन्द्ररेखा :- सहि, तुमं वि एतस्सिं चित्तफलए इमस्स पडिकिदिं लिह, पेक्खिस्सं दाव तुह णिवुणत्तणं । [सखि, त्वमपि एतस्मिन् चित्रफलके अस्य प्रतिकृतिं लिख, प्रेक्ष्ये तावत्तव निपुणत्वम्]

सीता :- तुह पिअं करेमि [तव प्रियं करोमि] (इति तथा करोति)

विदूषक :- वअस्स, किं अत्तणो एव्व सिप्पकोसलं पेक्खसि । एसा उण चित्तफलए किं वि लिहदि । ता, जलगदं पडिबिंबं पेक्ख । [वयस्य, किमात्मन एव शिल्पकौशलं प्रेक्षसे ? एषा पुनः चित्रफलके किमपि लिखति । तस्माज्जलगतं प्रतिबिम्बं पश्य]

राम :- (विलोक्य) सखे साधु दर्शितम् ।

यद्धर्माम्भःकणगणसमुत्फुल्लगल्लाभिरामं
व्याकुर्वाणा मनसि निभृतां प्रीतिमत्यादरेण ।
स्मारं स्मारं लिखति यमियं यामिनीनाथवक्त्रा
धन्यं मन्ये जगति पुरुषं श्लाघ्यमूर्तिं तमेव ।। -५६

विदूषक :- वअस्स, तुमं विणा को अवरो लिहिस्सदि ? ता अत्ताणं एव्व धण्णं मण्णेहि । [वयस्य, त्वां विना कोऽन्यः लिखिष्यते ? तस्मादात्मानमेव धन्यं मन्यस्व]

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

राम :- सखे, प्रणय एवं व्याहरति ।

सीता :- सहि, संजादसेदेहिं अंगुलीहिं ण सक्कुणोमि लेहिदुं । ता अंसुअंतरिदंगुलि आलिहिस्सं । [सखि, सञ्जातस्वेदाभिः अङ्गुलीभिः न शक्नोमि लिखितुं । तस्मात् अश्रु अनन्तरिताङ्गुलिः आलिखिष्यामि] (तथा करोति)

राम :- सखे, पश्य कौतुकम् ।

सञ्जातवेपथुपरम्परिट मुहुस्स्यनेत्रं
स्तब्धं बलाद्धृतशरीरमृजूकरोति ।
सान्द्रादरा लिखसि यस्त्वकृतावगुण्ठ-
स्विन्नाङ्गुलीसमवलम्बिततूलिकेयम् ॥ -५७

सीता :- (निजहस्ताच्चित्रपटभ्रंशं नाटयन्ती) पमादो पमादो, समग्गलिहिदं एदं जाव पेक्खामि ताव सज्झसकंपितादो मह अग्गहत्थादो पब्भट्ठो एसो चित्तपडो । [प्रमादः प्रमादः, समग्रलिखितमेतत् यावत् पश्यामि, तावत् साध्वसकम्पितात् मम अग्रहस्तात् प्रभ्रष्टः एष चित्रपटः]

विदूषक :- वअस्स, लिहंतीए इमाए हत्थादो पडिदो खु एसो चित्तपडो । ता एणं गेह्णामि । [वयस्य, लिखन्त्याः अस्याः हस्तात् प्रस्थितः खलु एष चित्रपटः । तस्मादेनं गृह्णामि] (इति ऊर्ध्वं पश्यन् त्वरितं परिक्रम्य करप्रसारितकेन चित्रपटं गृहीत्वा, सादरं निर्वर्णयन् उपसृत्य) वअस्स, पेक्ख पेक्ख [वयस्य, पश्य पश्य] (इति रामहस्ते समर्पयति)

चन्द्ररेखा :- सहि, कहं एसो पडंतो एव्व एदेण अट्ठावक्केण गेह्णिअ, अत्तणो वअस्ससमीवे पाविदो । [सखि, कथं एष प्रस्थितः एव एतेन अष्टावक्रेण गृहीत्वा, आत्मनः वयस्यसमीपं प्रापितः]

CC-0.TSarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

सीता :- (सातङ्कं) कहं एदं [कथमेतत्]

चन्द्ररेखा :- सहि, मा भयाहि, दिट्टिआ सुट्ठुज्जेव संपण्णं
[सखि, मा बिभेहि, दिष्ट्या सुष्ठ्वेव सम्पन्नम्]

राम :- (चित्रं निर्वर्ण्य) (सहर्षाद्भुतं) ईदृशस्य प्रियकारिणः किमन्यत्प्रियं करोमि। एष सर्वस्वभूतः परिष्वङ्गः। (इति आलिङ्गति)

चन्द्ररेखा :- पेक्ख, पेक्ख, कीदिसो एतस्स चित्तपडलाहेण अट्ठावक्के पीदि समुक्करिसो [पश्य, पश्य, कीदृशी, एतस्य चित्रपटस्य लाभेन अष्टावक्रे प्रीतिः समुत्कारिता]

(सीता सलज्जस्मितमवलोकते)

चेटी :- (प्रविश्य पटाक्षेपेण) भट्टिदारिए, कोसिओ महेसी आयछ्इति तं पणमिदुं अज्जूए आहूदासि। [भर्तृदारिके, कौशिको महर्षिरागच्छतीति तं प्रणमितुं आर्यया आहूतासि।]

चन्द्ररेखा :- सहि, एहि, वंदणिज्जो खु महाणुहाओ महेसी।
[सखि, एहि, वन्दनीयःखलु महानुभावो महर्षिः]

[सीता तथेत्युत्थाय परिक्रामति]

राम :- कथमेषा प्रतिष्ठते। [सीता प्रासादावतरणं नाटयन्ती, सखीस्कन्धनिवेशितकरा सस्नेहं रामं पश्यन्ती निष्क्रान्ता]

राम :- हन्त, कथं गतैव। (ऊर्ध्वमवलोक्य)

कासार इव विनाब्जं
चान्द्रमसं बिम्बमिव विनाऽऽकाशः।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

नायं भाति गवाक्षः
सम्प्रति वदनं विना तस्याः ॥ -५८

(इति निःश्वसन्) सखे,

आलीजनांसविनिवेशितपाणिपद्मा
तिर्यग्विवर्तितमनोहरकन्धरा सा ।
आतन्वती मयि कटाक्षसुधायसेकं
संप्रस्थिता, मनसि हन्त, विघूर्णते मे । -५९

(नेपथ्ये)

कौशिकोऽयमनाहूत, प्रपन्नःक्रतुमीक्षितुम् ।
इति प्रहृष्टो जनकः प्रत्युद्गच्छति तं मुनिम् ॥ -६०

विदूषक :- वअस्स, सदाणंदसीसो नाडाअणो वाहरदि । ता तुरिदं गुरुणापच्चणंतरी होहि । [वयस्य, शतानन्दशिष्यो नाडायणः व्यवहरति । तस्मात्त्वरितं गुरूपचरणान्तरितौ भवावः]

राम :- तथा । (इति निष्क्रान्तास्सर्वे)

॥ इति द्वितीयोऽङ्कः ॥

॥ अथ तृतीयोऽङ्कः ॥

[ततः प्रविशति शुकः]

शुक :- (परिक्रम्य, पुरोऽवलोक्य) कथमयं सारणः इत एवाऽभिवर्तते ।

सारण :- (प्रविश्य) भोः शुक, कथं त्वमप्यत्रैव ।

CC-0.TSarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

शुक :- आदिष्टोऽस्मि, स्वामिना, जानकीप्रवृत्तिमवगन्तुं, अवगता मया सङ्केतेषु समस्तेष्वपि नरेन्द्रेषु अमितभागधेये राम एव सकृद्दर्शनेन भृशतरमनुरक्ता । परन्तु माहेश्वरं धनुः किमाचरिष्यतीति न जाने ।

सारण :- सुकरमेव, तादृशस्य धनुरानमनम् । किन्तु, अस्मत्स्वामिनि विजितत्रिभुवने, विहितवैरस्य तस्य सर्वथा सम्भावयाम्यहितम् ।

शुक :- तत्किं प्रतिकर्तुमीहते स यातुधानचक्रवर्ती ?

सारण :- अथ किम् ।

शुक :- कीदृशः प्रतीकारः ?

सारण :- सीतायामनुरक्तं दाशरथिमवगम्य चारमुखात्, तदादानमेव तस्याहितमिति, जनकं याचमानः, तेन धनुरानगनमादिष्टः, "भगवति शितिकण्ठेऽपि कथममर्यादो भवामी"ति विहितापदेशः, तामेव विगूढमयं जिहीर्षुः मारीचमेवात्र शरणं मन्यमानः, तमुपगतो राक्षसेन्द्रः ।

शुक :- मारीचः किमत्राचरिष्यति ?

सारण :- (कर्णे) एवमिव ।

शुक :- किं सिद्ध्येदयमुपायः ?

सारण :- कः सन्देहः । यत्र निखिलमायानिपुणो मारीचः सहायः । परमनेन कर्मणा रक्षसां महान्तमनर्थं तर्कयामि ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

शुक :- कुत एतत् ?

सारण :-

यत्त्रिलोकैकवीरेण वैरं रामेण रावणः ।
पतिव्रताग्र्यास्सीतायाः यच्चाभिभवमीहते ।। -६१

शुक :- युज्यते ।

(नेपथ्ये)

स्थीयतामवहितेन चेतसा
वत्स लक्ष्मण, गुरोस्त्वयान्तिके ।
दर्शनादुपवनस्य साम्प्रतं
नन्दयामि विधुरं मनस्त्वहम् ।। -६२

सारण :- (कर्णं दत्वा) कथमयं रामः इत एवाऽभिवर्तते ।

(पुनर्नेपथ्ये)

एदं उसीरणलिणीपत्तादिअं विरहतत्तहिअआए जाणईए तावोवसवण-णिमित्तं उवणइस्सं । [एतत् उशीरनलिनीपत्रादिकं विरहतप्तहृदयाया: जानक्या: तापोपशमनिमित्तं उपनेष्यामि]

शुक :- (कर्णं दत्वा) कथमयं चन्द्ररेखास्वर इवाऽवगम्यते ? तदह सीतायाः क्रीडाशुकाकारं प्रतिपद्य, सीतारामयोः विस्रम्भजल्पितानि श्रोष्यन् अन्तरान्वेषी भवामि । त्वमपि इममुदन्तं स्वामिने निवेदयितुं त्वरितमपसर ।

(इति निष्क्रान्तौ)

CC-0.TSarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

॥ शुद्धविष्कम्भः ॥

[ततः प्रविशति विरहसन्तप्तो रामः]

राम :-

पश्यन्नप्यनुरागमात्मनि दृढं तस्या विदेहेन्दुना
सद्यः कार्मुकदर्शनस्य समयं क्लृप्तं विजानन्नपि ।
सर्वत्राऽप्यमकुण्ठितस्य मम दोर्वीर्यस्य साक्षी च सन्
आत्मा संशयमेति हन्त, चपलः सीतोपलम्भे कथम् ॥ -६३

(पुरतो विलोक्य) कथमयमष्टावक्रोऽपि मामनुगच्छति ।

विदूषक :- (प्रविश्य) वअस्स, कहं मं उज्झिअ पत्थिदोसि ?
[वयस्य, कथं मां उज्झित्वा प्रस्थितोऽसि]

राम :- नहि, नहि, त्वामेव विमृशन्गच्छामि ।

विदूषक :- वअस्स, अदिहि णाव अस्सत्थसरीरो दीससि । ता, बलिअं खु दे संदावो । [वयस्य, अधिकं हि नाम अस्वस्थशरीरो दृश्यसे । तस्मात् बलवान् खलु ते सन्तापः]

राम :- सखे

सञ्जातोत्कलिकस्य चित्रफलकालोकेन यन्मे पुनः
मूर्तां तामचिरप्रभामिव मुहुः सौधे विलोक्य प्रियाम् ।
आनन्दस्तिमितं तदाजनि सुधापूरैरिवाप्लावितं
चेतस्सम्प्रति तद्वियोगतरलं दावानले पच्यते ॥ -६४

विदूषक :- वअस्स, मा उत्तम्म । किंवि धीरत्तणं ओलंबेसु ।
[वयस्य, मा उत्ताम्य । किमपि धीरत्वमवलम्बस्व]

राम :- (सनिःश्वासं) सखे, कथमवलम्ब्यतां धैर्यम् ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

स्वैरं चन्द्रच्छायं

वदनं तस्या मयि स्मरति ।

प्रहरति मामकमदयः

हृदयं कामः शरैः क्रूरैः ॥ -६५

विदूषक :- ता एत्थ को पडिआरो । [तदत्र कः परिहारः]

राम :- प्रियाया दर्शनमेव ।

विदूषक :- (विचिन्त्य) दाव सहआरवेदिअंमि उवविसदु भवं । जाव तुए लिहिदं ताए पडिकिर्दिं गेह्णिअ आअच्छामि । [तावत्सहकारवेदिकायामुपविशतु भवान् । यावत् त्वया लिखितां तस्याः प्रतिकृतिं गृहीत्वा आगच्छामि]

राम :- सखे, न साम्प्रतिकं तत् ।

तामालुलोकयिषतः सरसीरुहाक्षीं

सा मेऽधुना प्रतिकृतिः न ददीत मोदम् ।

पुंसस्सुधारसझरां मधुरां पिपासोः

तत्कव्यमप्यहह किं रुचये पयस्स्यात् ॥ -६६

विदूषक :- कहं एत्थ ताए दंसणोवाओ । [कथमत्र तस्याः दर्शनोपायः]

[ततः प्रविशति शुकवेषधारी शुकः चारः]

चार :- अन्तःपुरं विचितमद्य मया समन्तात्

आलोकिता मिथिलराजसुता न तत्र ।

किन्तु, श्रुतं विरहविह्वलितं मनस्स्वं

उद्यानसीमनि विनोदयितुं गतेति ॥ -६७

तदत्र तां विचिनोमि । (इति सलीलं परिभ्रमति)

CC-0.TSarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

राम :- (शुकं निर्वर्ण्य) वयस्य पश्य, पश्य,

निरुपमरुचिरञ्जितः शुकोऽयं
प्रियतमया परिवर्धितश्चिरेण ।
ध्रुवमिह विचिनोति तां समन्तात्
कलमधुरं विरुवन्मनुष्यवाचा ॥ –६८

तदेनमनुसृत्य प्रियोपलब्धिमवगच्छामि ।

(इति कतिचित् पदानि शुकमनुगच्छति)

शुक :- (पुरोऽवलोक्य) कथमस्मिन् सहकारकुञ्जे सख्येयमन्वास्यते जानकी ? (परितश्चक्षुः प्रसारयन् रामं विलोक्य स्वगतं) अहह,

भृशमयमनुरक्तः कन्यकायाममुष्यां
असदृशमिह वाञ्छत्युद्यमं च प्रभुर्नः ।
तदहमिह न जाने कस्य धन्यात्मनस्स्यात्
अभिमतफललाभान्सर्गजोदर्कवार्ता ॥ –६९

राम :- (पुरतोऽवलोक्य सहर्षं) अये, लब्धं नेत्रनिर्वाणम् ।

विदूषक :- कहं कहं, [कथं कथम्]

राम :-

औशीरपङ्कपरिलिप्तपयोधरैषा
नव्यैर्मृणालवलयैः कलिताङ्गभूषा ।
आपाण्डुगण्डफलकापि वियोगतप्ता
चित्तं ममाद्य तनुते कमपि प्रमोदम् ॥ –७०

तद्विटपान्तरिताविव क्षणमिमां पश्यावः । (तथा कुरुतः)

[ततः प्रविशति यथानिर्दिष्टा सीता सखी च]

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

सीता :- दुल्लहजणाहिलासेण पज्जाउलंह्मि । ता कहं मणो विणोदइस्सं । (स्मृतिमभिनीय) हला, मह लीलासुअं किं सुट्ठु पंजरे ठाविदो । [दुर्लभजनाभिलाषेण पर्याकुलास्मि । तस्मात् कथं मनः विनोदयिष्यामि । हला, मम लीलशुकः किं सुष्ठु पञ्जरे स्थापितः]

चन्द्ररेखा :- अह इं [अथ किं]

शुक :- अवसरो ममायमात्मानं दर्शयितुं (इति उपसृत्य)

त्वया विहितनामायं कल्याणि जनरञ्जकः ।
शुको नमति सिञ्चैनं करुणालोकनामृतैः ।। —७१
(इति प्रणमति)

राम :- सखे: पश्य पश्य,

विनयेनानतमौलिः
प्रोद्धृतवामेतराङ्घ्रिश्च ।
किञ्चित्कुञ्चितपक्षः
प्रणमति शुक एष मञ्जु सञ्जल्पन् ।। ७२

विदूषक :- सुट्ठु सिक्खिदो एसो [सुष्ठु शिक्षित एषः]

चन्द्ररेखा :- (सोपालम्भं) पंजरणिरुद्धो वि एसो धुत्तो कहं एत्थ आअदो ? [पञ्जरनिरुद्धोऽपि एष धूर्तः कथमत्रागतः]

शुक :- (चन्द्ररेखां सासूयं पश्यन्)

मन्दं मन्दं प्रचलितवतीं त्वामनुप्रस्थितं मां
एषा याता बत तव सखी पञ्जरान्तर्निरुध्य ।

CC-0.TSarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

पश्चाच्चञ्चूपुटविघटितद्वारदेशोऽहमार्ये
त्वामन्विष्यन् कथमपि पुनः दृष्टवानत्र दैवात् ॥ -७३

विदूषक :- (सविमर्शं) वअस्स, सुद्धंतेसु अणेअसो दिट्ठंदि णाम कीरा । ते उण सिक्खिदत्थं एव्व वाहरंदि । एसो मणसा कप्पयंतो चडुलं वाहरदि । ता, एदस्सिं संसइदो मे अप्पा । [वयस्य, शुद्धान्तेषु अनेकशः तिष्ठन्ति नाम कीराः । ते पुनः शिक्षितार्थं एव व्यवहरन्ति । एषः मनसा कल्पयन् चटुलं व्यवहरति । तस्मात् एतस्मिन् संशयितो मे आत्मा ।]

राम :- मा मैवम् । सम्भवति हि क्वचित्क्वचिदीदृशानां अपि महाद्भुतानां रत्नानां रत्नगर्भायामुद्भवः ।

सीता :- हला, ण जुत्तं एदस्सिं ईदिसं कादुं ।
[हला, न युक्तं एतस्मिन् ईदृशं कर्तुं]

चन्द्ररेखा :- णिसग्गचवलो एसो एआरिसं तुह उत्तंतं विण्णादुं णारुहदित्ति तह किदो वि संपत्तो एव्व । [निसर्गचपलः एषः एतादृशं तव उदन्तं विज्ञातुं नार्हतीति तथा कृतोऽपि सम्प्राप्त एव]

सीता :- णं अंतरंगो खु एसो अह्माणं । [एतदन्तरङ्गं खलु एषोऽस्माकम्]

राम :- वयस्य, पश्यास्मिन् अन्यादृशः प्रियायाः पक्षपातः ।
(साशंसं)

वारं वारं मधुरमधुरं दाडिमीबीजवृन्दं
दत्वा जम्बूफलरसममुं पाययित्वा च भूरि ।
श्रावं श्रावं सरलवचनान्यस्य सीतासमेतः
सौधासीनः प्रतिदिनमहं दिव्रं तस्स्यां नु किं वा ॥ -७४

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

शुक्र :- (सखेदं) (स्वगतं)

दम्पत्योर्मयि दयमानयोरिदानीं
व्यापादं कथमनयोर्बताऽऽचरामि ।
जानन्नप्यहमथवात्र किं नु कुर्यां
भृत्यानां भवति हि जीविकेव कष्टा ॥ —७५

सीता :- (स्पर्शमभिनीय:) अम्हो, एसो मलयमारुदो फणिफुक्कार किदसंपक्को विअ मह अंगाइं तावेइ ।

[अहो, एष मलयमारुतः फणिफूत्कारकृतसम्पर्क इव ममाङ्गानि तापयति]

राम :- अहह, एवमेवैतत् ।

सम्प्रत्यदभ्रं परिपीय तापं
शरीरजन्यं नियतं प्रियायाः ।
तमेव विष्वङ्मलयानिलोऽसौ
वमन्निवावाति ममापि गात्रे ॥ —७६

चन्द्ररेखा :- सहि, अवि तुमं वीएमि णलिणीपत्ततालवीतेण ? ।

[सखि, अपि त्वां वीजयामि नलिनीपत्रतालवृन्तेन]

सीता :- (सनि:श्वासं) हला, किं एदेण, संपदं तस्स महाणुभाअस्य दंसणं एव्व सरणं । [हला, किमेतेन, साम्प्रतं तस्य महानुभावस्य दर्शनमेव शरणम्]

राम :- हन्त, हन्त,

इच्छति दर्शनमेषा
मामकमत्र स्मरेषुतप्ताङ्गी ।

CC-0.TSarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

मामपि गात्रस्तम्भो
हन्त रुणद्ध्येव किं करवै ॥ —७७

चन्द्ररेखा :- सहि, को णु खु उआओ संपदं तस्स दंसणस्स ?

[सखि, को नु खलु उपायः साम्प्रतं तस्य दर्शनस्य]

सीता :- दाणिं जण्णवाडं पविट्ठस्स तस्स दंसणेण अत्तणो संदाव ओणिस्सं (इति गन्तुमिच्छति)

[इदानीं यज्ञवाटं प्रविष्टस्य तस्य दर्शनेन, आत्मनः सन्तापं अपनेष्यामि]

विदूषक :- वअस्स, अवसरो खु एसो तुह अत्ताणं दंसेदुं ।

[वयस्य, अवसरः खलु एषः, तव आत्मानं पर्शयितुम्]

राम :- (सहसोपसृत्य)

वाधापेशलमङ्गं
दिवसश्चोग्रातपस्पर्शः ।
तत्त्वं गन्तुमशक्ते-
त्यहमेवात्र प्रपन्नोऽस्मि ॥ —७८

[सीता सहर्षसम्भ्रममुत्थाय सख्यन्तरिता तिष्ठति]

चन्द्ररेखा :- अम्हो, सुमरिदप्पच्चुवट्ठिदो दे मणरहो । ता णं साअदेण सम्भावेहि ।

[अहो स्मृत एव प्रत्युपस्थितः ते मनोरथः। तस्मादेनं सादरेण सम्भावय]

राम :- अयि, हृदयनिर्विशेषेपि जने किमनया उपचारयन्त्रणया, तदुपविशतु भवती ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

चन्द्ररेखा :- महाभाओ वि एथ्थ आसणपरिग्गहं करेदु ।
[महाभागोऽपि अत्रासनपरिग्रहं करोतु]

राम :- वयस्य, एह्युपविशाव:
(इति सर्वेऽपि यथोचितमुपविशन्ति)
[सीता सलज्जमवनतमुखी उपविशति]

राम :-

अपश्यन्ती त्वं मामभिलषसि सम्प्रेक्षितुमिति
प्रपन्ने सोत्कण्ठं मयि तव समीपं प्रियतमे ! ।
नियम्याक्षिद्वन्द्वं नमयसि मुखाम्भोजमधुना
जनेऽस्मिन्विस्रब्धे किमिदमतिसन्धानमुचितम् ।। -५९

सीता :- (जनान्तिकं) सहि, अवि सुदाइं एदिणा अम्हाणं विस्संभ-जप्पिदाणि ? [सखि, अपि श्रुतानि एतेनास्माकं विस्रम्भजल्पितानि]

चन्द्ररेखा :- णं अस्स वअणं एव्व कहेहि । [नन्वस्य वचनमेव कथय]

राम :- (जनान्तिकं) सखे,

पृच्छति सखीमिदानीं
एषा नियतं ममोदन्तम् ।
यस्मान्निपुणममुष्याः
वर्णानोष्ठे तथाऽनुमिमे ।। -८०

विदूषक :- (विहस्य, स्वगतं) अम्हो, चवलत्तणरस माहप्पं जं एदाणं अण्णोण्णविस्संभजप्पिदाइँ अत्तणो विसआइं संभावेइ । [अहो, चपलत्वस्य माहात्म्यं, यदेतयोः अन्योन्यविस्रम्भजल्पितानि आत्मनो

CC-0.TSarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

विषयानधिकृत्येति सम्भावयति] (प्रकाशं) वअस्स, एव्वं एदं। [वयस्य, एवमेतत्]

चन्द्ररेखा :- सहि, जस्स दंसणणिमित्तं संपदं उक्कंठिदासि तस्सिं सअं एव्व उवणदे, किंति लज्जाए अत्ताणं वंचेसि। ता, संभावेहि णं विलोअणेण । [सखि, यस्य दर्शननिमित्तं साम्प्रतमुत्कण्ठितासि, तस्मिन् स्वयमेवोपनते, किमिति लज्जयात्मानं वञ्चयसि । तस्मात्सम्भावयैनं विलोकनेन]

विदूषक :- ण केवलं विलोअणेण, अभिमदपूरणेणेत्ति भण । [न केवलं विलोकनेन, अभिमतपूरणेनेति भण]

सीता :- (स्वगतं) जइ, लज्जाए अणुक्कंपणिज्जा होमि । [यदि लज्जया अनुकम्पनीया भवेयम्] (जनान्तिकं) सहि. जाणंती वि तुमं तादसंकप्पविआरपरंमुही भविअ कहं इमं अविणअं मं सिक्खेसि ? [सखि, जानन्त्यपि त्वं तातसङ्कल्पविचारपराङ्मुखी भूत्वा कथमिममविनयं मां शिक्षयसि] (इति सासूयं पश्यन्ती, प्रकाशं) महं तो खु कालो इमं उज्झाणं आअदाणं अदिक्कंदो । ता एहि, जण्णवाडं गच्छम्ह। [महान् खलु कालः इदमुद्यानमागतयोः अतिक्रान्तः। तस्मादेहि, यज्ञवाटं गच्छावः] (इति उत्थाय गन्तुमिच्छति)

[चन्द्ररेखा राममङ्गल्या सूचयति]

राम :- (उपसृत्य)

मयि व्यथितमर्मणि स्मरशरप्रहारैर्भृशं
चिरेण भवतीं गते शरणमिन्दुमुग्धानने ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

प्रयासि सहसा किमप्यनभिभाष्य साकं मया
तवाऽयमुचितोऽधुना कथननादरोपक्रमः ॥ -८१

(इति सीताहस्तं हस्तेनालम्बते)

सीता :- राहव, विणआदो णादिवत्तेहि । [राघव, विनयात् नातिवर्तस्व]

विदूषक :- (संस्कृतमाश्रित्य) अयं हि,

शासिता दुर्विनीतानां कुर्यादविनयं कुतः ।
अपनेता हि तापस्य तापं न तनुते घनः ॥ -८२

[सीता लज्जावनतमुखी, रामनामाङ्कितमङ्गुलीयकं निर्वर्णयति]

राम :- (स्वगतं)

यो मम दुर्लभ एषः
प्रसरस्तस्याः कटाक्षाणाम् ।
सम्प्रति तं त्वमकस्मात्
लब्ध्वा, धन्यासि मुद्रिके मुग्धे ॥ -८३

शुक :- (स्मृतिमभिनीय, स्वगतं) कथमनयोरन्योन्यानुरागदर्शनविक्षिप्तमनसा, विस्मृत एव मया स्वामिनः सन्देशः । तत्त्वरितं गत्वाऽहमिहस्थां एनां निवेदयामि ।

(विचिन्त्य)

जाग्रत्यत्र धनुर्धरे रघुवरे भास्वत्प्रभाभास्वरे
नाथो नः सफलोद्यमो न नियतं, यावद्भवत्येव सः ।
तस्मादस्य, विनिष्क्रमार्थमधुना किं वा निदानं भवेत्
आः ज्ञातं, भवित। स एव निपुणस्सुन्दात्मजस्सांप्रतम् ॥ -८४

[ततः प्रविशति चित्रमृगवेषधारी मारीचः]

CC-0.TSarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

मारीच :-

कृत्यं निन्द्यं ननु तनुभृतां भृत्यभावात्किमन्यत्
प्राप्तं दैवात्तदपि च मया स्वामिनो वाञ्छितार्थे ।
हन्त. प्राणान्तृणमिव यतस्सन्त्यजामि स्वकीयान्
धन्यंमन्यः शिव, शिव, ततः सर्वथा निर्वृणोऽस्मि ।। -८५

राम :- (मृगं निर्वर्ण्य) हन्त, कथमत्यद्भुतरूपोऽयं अदृष्टचरः ।
तथाहि —

द्रुतसुवर्णसमानतनुप्रभः
विमलराजतबिन्दुविराजितः ।
अभिनवेन्द्रमणीशकलस्फुर-
द्वदनशृङ्गखुरो वलते मृगः ।। -८६

मारीच :- (रामं निर्वर्ण्य, स्वगतं)

विष्णोर्विक्रममम्भसामधिपतेर्गाम्भीर्यमद्रीन्द्रतः
धैर्यं तिग्मरुचेः प्रतापमवनेः क्षान्ति मृडानीपतेः ।
ऐश्वर्यं शशिनः प्रसादमतनोः सौन्दर्यमत्यद्भुतं
सङ्गृह्यैष गुणोच्चयोऽम्बुजभुवा रामे प्रतिष्ठापितः ।। -८७

सीता :- (साश्चर्यं) अच्चब्भुदो चित्तरूओ एसो मिओ ।
[अत्यद्भुतश्चित्ररूपः एप मृगः ।]
(इति सादरं पश्यति)

राम :- सखे,

अन्यभावविमुखीं मुखपद्मं
प्रोन्नमय्य, समुदञ्चितहर्षा ।
विस्मयस्तिमितलोचनमेषा
पश्य, पश्यति मृगं मृगनेत्रा ।। -८८

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

सीता :- हला, इमं मिअं जीवग्गाहं गहिदुं को उवाओ ?

[हला, इमं मृगं जीवग्राहं गृहीतुं क उपायः]

चन्द्ररेखा :- णं णिओएहि तुह पिअकारिणं इमं महाभाअं ।

[ननु नियोजय तव प्रियकारिणमिमं महाभागम्]

सीता :- माणणीओ खु एसो । ण सक्कुणोमि ईदिसं अविणअं कादुं ।

[माननीयः खल्वेषः । न शक्नोमि ईदृशमविनयं कर्तुम्]

राम :- (सहर्षं) अयि, मैवं वादीः ।

स्नेहस्स्नेह इति प्रिये, न विशदः कश्चित्पदार्थो परः

किन्तु, प्राग्जनिसंगतस्य मनसः कोप्येष धर्मस्स्थिरः ।

तस्याविष्करणं तु वाञ्छितफलप्राप्त्यै नियोगो मिथः

तस्मादत्र नियोज्यतामधिगतो जाने तवानुग्रहम् ॥ -८९

तदर्थमहमेनं ग्रहीष्यामि । (इति उत्थाय परिक्रामति)

सीता :- हला, कहं पत्थिदो एव्व महाभाओ ।

[हला, कथं प्रस्थित एव महाभागः]

राम :- (कतिचित्पदानि मृगमनुसृत्य) वयस्य, पश्य पश्य ।

उत्प्लुत्योत्प्लुत्यैष वेगेन गच्छन्

भूमौ स्थैर्यं जातु नैवाश्नुवानः ।

लक्षीकर्तुं सायकेनाप्यशक्तः

शक्यः प्राणैस्स्यात्कथं वा गृहीतुम् ॥ -९०

विदूषक :- वअस्स, एव्वं एदं । [वयस्य एवमेतत्]

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

राम :- तथाप्येनं न मुञ्चामि (इति विकटं सत्वरं परिक्रामति)

शुक :- दिष्ट्या फलोन्मुखमिव संविधानकं देवस्य निशाचरपतेः ।

सीता :- कहं वेअसालिणा मिएण दूरत एव्व अतिवाहिदो ।
[कथं वेगशालिना मृगेण दूरत एव अतिवाहितः]

मृग :- (स्वगतं)
रामेण सम्प्रति जवादनुधाव्यमानो
हन्ताऽऽत्मजीवनविधौ न विशङ्कितोऽस्मि ।
किन्त्वेष राक्षसपतिर्महतीं विपत्तीं
सम्प्राप्नुयादिति भजामि महद्व्यलीकम् ॥ —८१

(प्रविश्य पटाक्षेपेण लक्ष्मणः)

लक्ष्मण :- आर्य, सन्निधापितहरकार्मुकेण जनकेन समं प्रतीक्षते भवन्तं भगवान्विश्वामित्रः ।

राम :- वत्स, इदमागम्यते । अस्य चित्रमृगस्य ग्रहणे क्षणं व्यापृतोऽस्मि ।

लक्ष्मण :- (मृगं निर्वर्ण्य, साशङ्कम्)
दृष्टाः कुरङ्गाः विविधाः परन्तु
नैतादृशं कुत्रचिदप्यदर्शम् ।
तदत्र बुध्या विमृशन्निमां तु
मरीचमायामिव तर्कयामि ॥ —८२

राम :- (विमृश्य) वत्स, एवमेतत् । तत्तस्मिन्नेव हरधनुषि विहितेषुसन्धानः संहरामि मायाविनमेनम् । (इति परावत्य,

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

विचिन्त्य) वत्स, अस्मिन्नेवोद्याने सह सख्या निकुञ्जभवनमध्यासीना जानकी, मयि भृशतरमनुरक्ता दृष्टा मिथस्स्वैरं सम्भाविता च । तदुपच्छन्देन च एनं चित्रमृगं गृहीतुमनुसृतोऽस्मि । सम्प्रत्यस्य मायां विभाव्य, तामेकाकिनीं विहाय, गन्तुमसाम्प्रतम् । तत्त्वं त्वरितं अस्याः प्रत्यनन्तरीभव, यावदहं समीहितं साधयामि

(इति विदूषकेन सह निष्क्रान्तः)

मारीच :- (स्वगतं) हन्त, कथमन्य एव समापतितः कोऽपि प्रत्यूहः । (विचिन्त्य) भवतु, एवं प्रतिविधास्यामि ।

(इति निष्क्रान्तः)

लक्ष्मण :- (परिक्रम्यावलोक्य) नन्वत्रैव कुञ्जभवने सा जानकी प्रतिवसति । यावदेनामुपसर्पामि । (इति उपसृत्य) आर्ये, रामानुजो लक्ष्मणोऽहमभिवादये ।

सीता :- (ससंभ्रमं, जनान्तिकं) सहि, अवि एसो तस्स महाभाअस्स अणुजम्मा ?

[सखि, अप्येष तस्य महाभागस्य अनुजन्मा ?]

चन्द्ररेखा :- णं, सो एसो दिट्ठपुव्वो मए जण्णवाडे । कहं अण्णहा, ईरिसे विक्कमगोरवे, विणीदत्तणं । संभावेहि णं ।

[ननु स एषः दृष्टपूर्वो मया यज्ञवाटे । कथमन्यथा, ईदृशे विक्रमगौरवे विनीतत्वम् । सम्भावयैनम् ।]

सीता :- (प्रकाशं) वत्स, दीहाऊ होहि । [वत्स, दीर्घायुर्भव]

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

चन्द्ररेखा :- किं रामभद्दं अण्णेससि ? [किं रामभद्रमनुसरसि]

लक्ष्मण :- नहि, नहि, मृगमनुसरता तेन मध्येमार्गं गुरुभिराहूतेनः

एकाकिनीमिहैनां
शीलैर्गुप्तामपि स्वीयैः ।
रक्षितुमार्यामार्ये-
णाहं प्रहितः प्रपन्नोऽस्मि –९३

सीता :- वच्छ, किं गहीदो सो चित्तमिओ ?
[वत्स, किं गृहीतः स चित्रमृगः]

लक्ष्मण :- तमात्तमायं मारीचं
विभाव्य हरधनुषि संहितेनैव ।
इषुणा चिकीर्षितं
तस्य निधनमार्येण ।। –९४

सीता :- (सत्रासं) हला, दाणिं रक्खसउत्तंतेण वेवदि विअ मे हिअअं । ता, एहि जण्णवाडं पविसिअ हरचावारोवण-महूसवं पेक्खामो । [हला, इदानीं राक्षसवृत्तान्तेन वेपते इव मे हृदयम् । तस्मादेहि । यज्ञवाटं प्रविश्य, हरचापारोहणमहोत्सव पश्यावः]

शुक :- (स्वगतं) हन्त, कथमिदानीम् ?

(नेपथ्ये)

रामे कुर्वति चन्द्रशेखरधनुर्दण्डे गुणारोपणं
दोषारोपणमेव जातमखिलक्षोणीभुजां विक्रमे ।
कौटिल्यं गमितेऽपि तत्र हृदयं सीरध्वजस्यार्जवं
प्राप्तं, भङ्गमुपागते तु सुदृढः सीतानुरागोऽजनि ।। –९५

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

(सर्वे ससंभ्रमं कर्णं ददति)

शुक :- (स्वगतं) अहो, क्षत्रियवटोः सर्वङ्कषो विक्रमातिशयः ।

लक्ष्मण :- (सहर्षाद्भुतम्) आर्ये, श्रुतमेतत् अष्टावक्रस्य हर्षातिरेकात् संस्कृतजल्पितम् ? किञ्च,

भिन्दन्नभो मुखरयन्ककुभो विलुम्पन्
अम्भोनिधीन्विदलयन्नचलेन्द्रकूटान् ।
विद्रावयन्द्विपरिपून्विधमन्द्रुमांश्च
निर्भिन्नधूर्जटिधनुर्ध्वनिरुज्जिहीते ॥ —९६

सीता :- वच्छ, सुणामि सुणामि । [वत्स, शृणोमि शृणोमि]

चन्द्ररेखा :- दाणिं संसअपरम्मुही सव्वहा णिव्वुदा होहि ।
[इदानीं संशयपराङ्मुखी, सर्वथा निर्वृता भव]

सीता :- (सलज्जं) तेण महाभाएण, चिरलग्गं मह पिदुणो हिअअसद्धसं उक्खादंति णंदामि । [तेन महाभागेन, चिरलग्नं मम पितुः हृदयसाध्वसं उत्खातमिति नन्दामि]

लक्ष्मण :- आम् आर्ये आम् ।

प्रतिलभ्य सुतां नरो नियत्या
सुचिरं ताम्यति तत्कृते विमर्शैः ।
अनुरूपवराय तां प्रयच्छन्
इह चामुत्र च निर्वृणोति पश्चात् ॥ -९७

शुक :- कष्टं, कष्टम् ! एवमनुरक्तामिमां विधिनाप्यनुमतां विघटयितुमिच्छत्ययं दशकन्धरः । सन्निहिते चात्र लक्ष्मणे तदेवास्य

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

दुष्करमिति सम्भावयामि । तत्कथमस्यापि भवेन्निष्क्रमणम् ।

(नेपथ्ये) हा सीते, हा लक्ष्मण,

(सर्वे सातङ्काः शृण्वन्ति)

शुक :- (स्वगतं) अहो, प्रत्युत्पन्नमतिता मारीचस्य ।

सीता :- (सभयोत्कम्पं) हला, किं वि अच्चाहिदं विअ अज्जउत्तस्स । हा, हदम्हि । [हला, किमपि अत्याहितमिव आर्यपुत्रस्य । हा हतास्मि ।]

लक्ष्मण :- अहो, दौरात्म्यं राक्षसहतकस्य । आर्ये मा भैषीः ।

सुरासुरैरप्यविषह्यतेजाः
शक्यो न केनापि विजेतुमार्यः ।
आर्तस्वरेणात्र विशङ्कसे चेत्
अवेहि तां सुन्दसुतस्य मायाम् ॥ -९८

सीता :- एदिणा अक्कंदणेण अदि णाम उत्तमइ मे हिअअं । ता, तुए झत्ति गदुअ अय्यउत्तपवुत्ती अधिगछीअदु । [अनेन आक्रन्दनेन अतिनाम उत्ताम्यति मे हृदयम् । तस्मात् त्वया झटिति गत्वा आर्यपुत्रप्रवृत्तिः अधिगम्यताम्]

शुक :- (स्वगतं) अपि भवेदेवम् ?

लक्ष्मण :- (विमृश्य, स्वगतं) प्रकृत्या भीरुः खल्वियम् । तन्नात्र मयापि प्रतीपं वक्तव्यम् । (प्रकाशं) आर्ये रक्षन्तु त्वामुपवनदेवताः । अहं पुनः यथानिदेशमनुतिष्ठामि । (इति निष्क्रान्तः)

शुक :- (स्वगतं) हन्त, साध्वेतदन्तरं लब्धम् । (विचिन्त्य) किं प्रापयामि दशकन्धरम् ? अत्र सत्यां सख्यां, न युक्त इव सम्प्रति

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

तत्प्रवेशः । अस्याः परैरविदितं हरणं हि साधु । तस्मादितः कथमसावपसारणीया ? ।

(नेपथ्ये)

पूर्वं त्रिस्सप्तकृत्वो निखिलनृपकुलध्वंसनं संविधाय
प्राप्तः प्राज्यानुकम्पः सुचिरमुपरतः साहसात्तादृशाद्यः ।
सोऽयं शुद्धः कुठारः सपदि हरधनुर्भञ्जनार्तिक न हन्यात्
लोकान्यद्वा किमेभिर्दशरथतनयं सागसं राममेव ॥ –९९

शुक :- (स्वगतं) हन्त, माहेश्वरप्रतिपत्त्या प्रागेवास्मत्स्वामिनाऽभ्यर्थितः प्राप्त एव भगवान् जामदग्न्यः ।

सीता :- (सातङ्कं) को एसो पाउडजलदभीसणगभीरघोसो अज्जउत्तस्स उवरि कुविदो विअ लच्छीयदि । ता जाणाहि तुरिअं गदुअ ।
[क एष प्रावृड्जलदभीषणगभीरघोषः आर्यपुत्रस्य उपरि कुपित इव लक्ष्यते तस्माज्जानीहि, त्वरितं गत्वा]

चन्द्ररेखा :- तह [तथा] (इति निष्क्रान्ता)

शुक :- दिष्टयाऽयमवसरः स्वामिनः प्रवेशस्य । तत्त्वरितं निवेदयामि ।
(इति निष्क्रान्तः)

[ततः प्रविशति भिक्षुवेषधारी दशकन्धरः]

दशकन्धर :-

त्रैलोक्ये बलशालिनो भुजबलान्निर्मथ्य निर्मथ्य च
स्त्रीरत्नानि मयाहृतानि बहुशः तेषां परन्तु क्वचित् ।
कृत्वा चौर्यमिदंदिनावधि वधूं नैबाऽहरं कस्यचित्
निन्द्यं कर्म तथाप्यरुन्तुदमिदं "शत्रो"रिति प्रार्थ्यते ॥ –१००

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

(अग्रत: सीतां विलोक्य) अहो, विधेर्वैदग्धी।

नार्यस्त्रिजगति बह्व्यः
दृष्टा नैतादृशी क्वापि।
हृष्टा यमियं वृणुते
नियतं धन्या जनिस्तस्य॥ —१०१

सीता :- (विलोक्य) को एसो भिक्खुओ विअ आअच्छइ?
[क एष भिक्षुक इवागच्छति?] (ससंभ्रममुत्थाय) भअवं णमो दे?
एदं आसणं उवविसदु अत्तभवं। [भगवन्, नमस्ते। एत-
दासनमुपविशतु अत्रभवान्]

रावण :- स्वस्ति भवत्यै। (इति उपविशति)

(नेपथ्ये)

भग्नं धनुः प्रमथितस्स च ताटकेयः
संस्तम्भितो भुजबलेन स जामदग्न्यः।
लब्धा विदेहनृपतेस्तनया स एषः
सर्वङ्कषो दशरथात्मभुवः प्रभावः॥ —१०२

सीता :- (सहर्षं, स्वगतं) दिट्ठिआ, दाणिं णिव्वुदह्मि।
[दिष्ट्या, इदानीं निर्वृताऽस्मि]

रावण :- (सक्रोधभयाश्चर्यं आत्मगतं) हन्त, दुरात्मनः क्षत्रियवटोः
विक्रमविजृम्भितं, प्रहर्षितस्य क्षत्रियब्राह्मणस्य हर्षातिरेकपरिस्खलदक्षरं
वाद्यमाकर्ण्यते। (विचिन्त्य) अहह,

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

जेतारं जगतां जिगाय बत मां यः कार्तवीर्यः पुरा
तं यो मृत्युवशं निनाय, परशुव्याकुत्तबाहावनम् ।
सोऽयं येन जडीकृतो भृगुवरः क्षत्रान्वयध्वंसकः
वैरं तेन यदद्य दाशरथिना तन्मे महत्साहसम् ।। -१०३

सीता :- भअवं, जाव जण्णसालं गदुअ, अदिहिसक्कारं गेह्णिअ, आअमिस्सं, दाव एत्थ उवविसदु भवं । [भगवन्, यावत् यज्ञशालां गत्वा, अतिथिसत्कारं गृहीत्वा, आगमिष्यामि तावदत्रोपविशतु भवान्] (इति निष्क्रान्ता)

रावण :- (विचिन्त्य)

शक्तः स्थातुं नेह, सीतामपश्यन्
तस्मादेनां सर्वथाऽनुप्रयामि ।
यावन्नैषा यज्ञवाटं प्रविष्टा
तावन्मध्येमार्गमेनां हरामि ।। –१०४

(इति निष्क्रान्तास्सर्वे)

॥ राघवाभ्युदयनाटके तृतीयोऽङ्कः ॥

*

॥ अथ चतुर्थोऽङ्कः ॥

[ततः प्रविशति अत्रिशिष्यः शाकटायनः]

शाकटायन :- प्रहितोऽस्मि, भगवता गुरुणा रामभद्रविक्रमप्रहृष्टेन, तत्र-भवतो विश्वामित्रस्य समीपे, चिरतरं निशाचरपरिभूताम् जनस्थान-वासिनो महर्षीन् परित्रातुं प्रेषणीयः कथञ्चिद्रामभद्र इति

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

कथयितुम् । तत्कुत्र वा तद्वसतिमधिगच्छामि ? (इति परिक्रामन् पुरो विलोक्य) कः पुनरयं विप्रवटुः, इत एवाभिवर्तते ? पृच्छामि तावदेनम् ।

विदूषक :- (प्रविश्य) (सकरुणं) हा, कहं वअस्सेण विणा अयोज्झाणअरं पविसेमि । [हा, कथं वयस्येन विना अयोध्यानगरम् प्रविशामि] (इति निःश्वसिति)

शाकटायन :- भोः कथं विषण्ण इव दृश्यसे ?

विदूषक :- अज्ज, अहं वअस्सो रामभद्दस्स । तेण विप्पउत्तो विसण्णोह्मि । [आर्य, अहं वयस्यो रामभद्रस्य : तेन विप्रयुक्तः विषण्णोऽस्मि]

शाकटायन :- किं कारणं विप्रयोगे ?

विदूषक :- तस्सिं किल मिहिलाणअरं पत्ते पउत्ते अ हरसरासणारोवणाअ, गहिदभिक्खुवेसो दसमुहो एआइणीं जाणइं गेह्णिअ पलाइदो । तदो असवण्णेण गुरुणा णिउत्तो तं वावादिअ जाणइं पच्चाणीदुं सरासणमेत्तमित्तो जणट्ठाणं पविट्ठो ? । [तस्मिन् किल मिथिलानगरं प्राप्ते, प्रवृत्ते च हरशरासनारोपणाय, गृहीतभिक्षुवेषो दशमुखः, एकाकिनीं जानकीं गृहीत्वा पलायितः । ततः असवर्णेन गुरुणा नियुक्तः, तं व्यापाद्य जानकीं प्रत्यानेतुं शरासनमात्रमित्रः जनस्थानं प्रविष्टः]

शाकटायन :- (स्वगतं) दिष्ट्या,, समीहितमेव नः सम्पन्नम् । (प्रकाशं) (सानुध्यानं) भवतु, मा स्म खिद्यथाः । संयुज्यसे त्वमचिराद्वयस्येन ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

विदूषक :- (सप्रत्याशं) जइवि, विंदुणामहेए मुहुत्ते ओहरिदं जाणइं अवस्सं वअस्सो लभिस्सदित्ति गुरुहिं ति भणिदं, तहवि, तणआविरहिदस्स जणअस्स तारिसेण किलेसेण महंतो सव्वस्स खेदो। [यद्यपि, विन्दुनामधेये मुहूर्ते अपहृतां जानकीं अवश्यं वयस्यः लप्स्यतीति गुरुभिः भणितम्, तथापि तनयाविहितस्य जनकस्य तादृशेन क्लेशेन महान् सर्वस्य खेदः]

शाकटायन :- क्वेदानीं प्रस्थितोऽसि ?

विदूषक :- वअस्सणिदेसेण वछ्छलक्खणं, अणुपेसिअ, दाणिं तादद्सरहं जणणीजणं अ समासासेदुं साएदणअरं गच्छेमि। तुमं उण जाणिदुं इछ्छेमि। [वयस्यनिदेशेन वत्सलक्षणमनुप्रेष्य इदानीं तातदशरथं जननीजनं च समाश्वासयितुं साकेतनगरं गच्छामि। त्वां पुनः ज्ञातुमिच्छामि]

शाकटायन :- तत्रभवतोऽत्रिमहर्षेरन्तेवासी।

विदूषक :- ता एथ्थ कहं ? [तदत्र कथम्]

शाकटायन :- किञ्चन कार्यमुद्दिश्य, आगतोऽस्मि।

विदूषक :- ता, गछ्छदु अज्जो कज्जसिद्धीए। अहं वि जहणिओअं अणुचिट्ठेमि। [तस्माद्गच्छतु आर्यः कार्यसिद्ध्यै। अहमपि यथानियोगमनुतिष्ठामि]

(इति निष्क्रान्तौ)

CC-0.TSarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

॥ मिश्रविष्कम्भः ॥

[ततः प्रविशति लक्ष्मणः]

लक्ष्मण :-

व्याहन्तुं दशकन्धरं कृतमहामन्तुं पुरः प्रस्थितः
रोषादार्य इति प्रवृत्तिमुपलभ्यान्वेष्टुमभ्युद्यतः ।
धावं धावमहं वनाद्वनमतिश्रान्तोऽस्मि हन्त, क्वचित्
तं नाऽपश्यमदःप्रवृत्तिमथवा नासादयं, का गतिः ॥ -१०५

(इति परिक्रामति)

(आकाशे)

निरुध्य पदवीं निजां निशिचरेन्द्रसन्देशतः
विराधखरदूषणत्रिशिरसः पुरोऽवस्थितान् ।
बलेन महतावृतान् रणमुखे रघुग्रामणीः
प्रभञ्जन इव क्षिपन् जलधरानितः, प्रस्थितः ॥
-१०६

लक्ष्मण :- (कर्णं दत्वा, सहर्षं) अहो, कथयत्ययमार्यप्रवृत्तिं नभसि गच्छन्विद्याधरगणः । तदग्रतः प्रसरन् अधिगच्छामि ।

(पार्श्वतो विलोक्य)

निर्मुक्तबाणगणसङ्कुलिता शिवाभिः
श्येनैश्च भिवृकैकुलैश्च वृता समन्तात् ।
छन्ना निकृत्तरजनीचरमुण्डखण्डैः
सन्दृश्यते कथमितो रणभूमिरेषा ॥ -१०७

(साश्चर्यं) कथमिदमार्येण एकाकिनैव महदनुष्ठितं साहसम् ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

(पुरतो विलोक्य, सहर्षं) कथमार्योऽपि आरादेव दृश्यते।
अयं हि –

अध्वश्रमेण शोकेन न्यक्कारेणापि रक्षसः।
गात्रे कार्श्यमवाप्तोऽपि महीयान्महसा परम्॥ -१०८

[ततः प्रविशति रामः]

राम :- (विचिन्त्य) कथमद्यापि नागतो वत्सलक्ष्मणः ?

लक्ष्मण :- (उपसृत्य) आर्य प्रणमामि (इति पादयोः पतति)

राम :- वत्स, कथमागतोऽसि ? (इत्युत्थाप्य, परिष्वज्य)
किमिति नाम विलम्बितोऽसि ?

लक्ष्मण :-
अस्मद्वियोगविधुरान्किल तातपादान्
अभ्येत्य मातुलकुलात्परिसान्त्वयेति।
आलेख्यलेखनकृते भरतस्य कश्चित्
कालस्त्वया विरहितेन मयार्य, नीतः॥ -१०९

राम :- वत्स, साधु कृतं भवता। (विमृश्य, सनिःश्वासं)
सम्भूता बहवः कुले दिनमणेर्भूमीभुजस्ते पुनः
तैस्तैस्सच्चरितैरनन्यसुलभैः ख्यातिं जगत्यां गताः।
तेष्वेको निकृतावदातकुलया हा, किंवदन्त्याऽनया
दुष्कीर्तेरहमालयः समभवं, कोऽयं विधेः प्रक्रमः॥ -११०

लक्ष्मण :- आर्य, किं वदसि ? दुष्कीर्तेरहमालय इति।
त्वत्पादाम्बुजरेणुना सपदि सा जाता शिला कामिनी
निर्भग्नं धनुरैश्वरं, स भवता विष्टम्भितो भार्गवः।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

एतत्तत्परिगीयते तव यशो गीयेत चापि क्रमात्
आर्यायाः परिभावनान्निशिचराध्यक्षस्य विध्वंसनम् ।। -१११

राम :- (सानुध्यानं) हा प्रिये,

रक्षसा भृशमधर्मवृत्तिना
छद्मनाऽपहृतया रहस्त्वया ।
रक्षितारमनवाप्य संस्मृतः
स्यामहं सकरुणं मुहुर्मुहुः ।। -११२

(सनिःश्वासं)

विवाहे निर्वृत्ते ललितमधुरैरक्रमगतैः
मिथः क्रीडालापैर्ननु गमयितव्याः खलु निशाः ।
इति प्रायः कान्ते, मम तव च यश्चेतसि पुरा
स्थितः कामः कामं विलयमपि तत्रैव स गतः -११३

(इत्यश्रूणि वर्तयति)

लक्ष्मण :- अलमेभिः परिदेवितैः । अवलम्ब्यतामार्य, धैर्यम् ।

राम :- (सकरुणं)

शत्रूनपोह्य बहुशः पथि बाहुवीर्यात्
प्राप्तस्सुदूरपदवीं विपिने प्रियायाः ।
क्वापि प्रवृत्तिमनवाप्य बताऽधुनाऽहं
धैर्यं कथं कथय वत्स, समाश्रयेऽहम् -११४

लक्ष्मण :- विचिनुमस्तावदार्याम् । तदुपसर्पत्वार्यः ।

राम : (परिक्रामन्) हन्त, हन्त,

हर्षः कार्मुकभङ्गात्
योऽसावुज्जृम्भितोऽस्माकम् ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

तस्य प्रशमनमधुना
विधिना विहितं कथं क्षणेनैव ॥ -११५

लक्ष्मण :- (स्वगतं) आर्याविप्रलब्धोऽयं आर्यः मुहुर्मुहुः क्लेशनुभवति । तदेनमन्यतः क्षिपामि । (पुरो विलोक्य, प्रकाशं) पश्येदं अविरलानोकहनिवहनिवारितातपप्रसरमनवरतपठ्यमाननिगमघोषमुखरं हूयमानहविर्धूमसुरभितहरिन्मुखमृषिकन्यकावहन्यमाननीवारमङ्घातं इङ्गुदीफलदलनस्निग्धप्रस्तरास्तृतोपान्तमार्द्रवल्कलस्यन्दरेखासंसूचितसरोमार्गं शुष्यमाणचीवराच्छादितकतिपयभूरुहं संक्षाल्यमाणकाषायपाटलिततटतटाकं अतिपावनमनतिदूर एव आश्रमपदमवलोक्यते । किञ्च ।

नैसर्गिकमपि वैरं
त्यक्त्वा निर्मुक्तसाध्वसाः पुरतः ।
लब्ध्वाऽन्योन्यव्यतिकर-
मभितः सत्वाः चरन्ति विस्रब्धाः ॥ -११६

तत्प्रविश्य, पूतमात्मानं कलयामः (इति उपसरतः) (पुरतो विलोक्य) कः पुनरयं आश्रमद्वारात्तापसः इत एवाऽभिवर्तते । तदेनं पृच्छामि

तापस :- (प्रविश्य) आदिष्टोऽस्मि भगवता समिदाहरणाय ।

लक्ष्मण :- भो ब्रह्मन्, कस्यायमाश्रमः ? कश्च भवान् ?

तापस :-

पीतो येन पयोधिः
स्फायन्विन्ध्योऽपि खर्वतां नीतः ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

तस्याऽगस्त्यमहर्षेः
आश्चर्यस्थानमाश्रमं विद्धि ॥ -११७

अहमप्यन्तेवासी तत्रभवतो मैत्रायणो नाम । त्वां पुनः अधिगन्तुमिच्छामि ।

लक्ष्मण :-

विदलितशाम्भवचापं
प्रशमितभृगुवीरपरशुधाराग्निम् ।
उद्धृतगौतमयुवतिं
रामं जानीहि दशरथापत्यम् ॥ -११८

अहमप्यस्यैवाऽनुजन्मा ।

राम :- अपि सन्निहितोऽत्र भगवान्कुलपतिः ?

मैत्रायण :- साम्प्रतमेव निर्वर्तयितुं माध्यन्दिनीं क्रियां, प्रस्थितस्सरितम् ।

उभौ :- तद्भगवन्तं तत्रैव गत्वा सम्भावयावः ।

(इति सर्वे परिक्रामन्ति)

राम :- (पुरो विलोक्य)

शैलः कोऽयमुदग्रशृङ्गनिकरैर्भिन्दन्निव स्वर्धुनीं
पादैर्विष्वगिदं धरातलमभिव्याप्य स्थितो दृश्यते ।
आरादस्य मरुन्निपातविवलद्वानीरशाखाच्युत-
व्याकोशप्रसवैः सुगन्धिसलिला कैषाऽऽवहत्यापगा ॥
-११९

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

मैत्रायण :-

एष प्रस्रवणाख्यो गज इव भूमीधरस्स्रवति ।
किञ्चैतन्मदधारेवैषा गोदावरी पुण्या ।। —१२०

राम :- (पुरो विलोक्य) वत्स, पश्य, पश्य, । अयमस्या एव तटे सरितः भगवानगस्त्यः । य एषः —

भस्मत्रिपुण्ड्राङ्कितभालपट्टः
विष्टब्धवक्षा विनिमीलिताक्षः ।
ध्यायन्परं ब्रह्म कृशाङ्गयष्टिः
तिरस्करोति द्युतिभिर्दिनेशम् ।। —१२१

तदत्रैव भगवतो नियमसमाप्तिं प्रतिपालयावः ।
(इति तथा कुर्वन्, परितो विलोक्य, जनान्तिकं) वत्स, लक्ष्मण, पश्य, रमणीयोऽयमरण्याभोगः, विस्रब्धं विहरमाणैरेभिरारण्यकैः ।
(सप्रत्याशं)

यथाऽसौ सोत्कण्ठा परभृतमुपास्ते परभृता
मृगीयं शृङ्गाग्रोल्लिखितनयना विन्दति मृगम् ।
मयूरी सानन्दा मदयति मयूरं च पुरतः
तथा प्रीता सीता रमयतु कदा मामपि रहः ।। —१२२

लक्ष्मण :- (निपुणं विवर्ण्य) आर्य, पश्यायमिदानीमेव समापितनियमस्तत्रभवान् । तदेनमुपसर्पावः । (इति उपसर्पतः)
[ततः प्रविशति यथानिर्दिष्ट उपविष्टोऽगस्त्यः]

अगस्त्यः :- (पुरो विलोक्य) (सहर्ष) हन्त, कोन्वयम् ?

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

धैर्योत्कर्षः किमिव तनुमान् किं वपुष्मान् प्रतापः
किं वा धर्मः किमिव विनयः किं नु सौन्दर्यसारः।
आः विज्ञातं, जनकतनयां सानुजोऽसौ विचिन्वन्
मामभ्येति त्वरितमधुना वन्दितुं रामभद्रः ॥ -१२३

राम :- (उपसृत्य) भगवन्नेष सानुजो दाशरथी रामोऽभिवादयते।
(इति प्रणमति)

अगस्त्य :- वत्स, अभिमतसिद्धिस्ते भूयात् ।

राम :- अनुगृहीतोऽस्मि। (इति सानुज उपविश्य, साशंसं स्वगतं)

जानुभ्यामवनिं प्रपद्य शनकैराकुञ्चिताभ्यां भृशं
मुग्धस्वस्तिकभूग्नपीनकुचया श्रीमानगस्त्यो मुनिः ।
मय्यादौ प्रणते त्वयाप्यनुनतः सम्भावयेज्जानकीं
त्वामाशीर्भिरिहोचिताभिरहह स्याच्चेन्न रक्षोहृता ॥
-१२४

(इति निरुद्धबाष्पः स्तिमितस्तिष्ठति)

अगस्त्य :- (रामं विलोक्य, स्वगतं) हन्त, सीताहरणकर्शितोऽयमतिहि नाम क्लिश्नाति। तदेनमाश्वासयामि ।
(प्रकाशं)

सीता हृतेति रघुपुङ्गव, मा शुचस्त्वं
तां लप्स्यसे सपदि पङ्क्तिमुखं निहत्य ।
ऐन्द्रं गृहाण धनुरेतदिमौ निषङ्गौ
अक्षय्यबाणभरितौ निशितं च खड्गम् ॥ -१२५

राम :- शिरसा गृहीतोऽयं भगवतः प्रसादः ।

CC-0.TSarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

अगस्त्य :- वत्स, साधय त्वं सानुजस्समीहितसाधनाय । वयमपि साधयामः (इति सशिष्यो निष्क्रान्तः)

राम :- (उत्थाय परिक्रामन्)

वत्स, गिरिपरिसरवर्तीदृश्यतामतिभैरवोऽयमरण्याभोगः ।

अत्रोदग्रमहीध्रकन्दरतटस्वैरप्रसुप्तोत्थित-
क्षुभ्यद्भूरिविवृद्धरोषविचलत्कण्ठीरवोद्गर्जितम् ।
आकर्ण्य द्विरदा भयेन सपदि क्षुभ्यन्ति निर्वर्णयं-
त्याक्रन्दन्ति परिद्रवन्ति निपतन्त्युद्यंति मुह्यन्ति च ॥
–१२६

लक्ष्मण :- इतः पश्यत्वार्यः ।

निकुञ्जभवनोत्पतत्कलितघोरगर्जाभटी-
विदारितहरिद्दरीमुखमृगादनाभ्याहताः ।
अमी सृमरकासरास्त्रुटितसक्थिमस्तव्रज-
स्त्रुतासृगरुणांगका विलुलितान्त्रमालाकुलाः ॥ -१२७

राम :- (पुरः प्रचलन्)

पश्य प्रांशुप्रपातप्रविततनिपतन्निर्झरध्वानभूरि-
क्रुध्यत्पारीन्द्रगर्जद्द्रुतकरटिघटामुक्तदानाम्बुसिक्तम् ।
भूभागं वीक्ष्य दूरादविरलविवलल्लीननीलद्विरेफं
धावं धवं पतन्ति त्वरितमिह मृगाः शाद्वलभ्रान्तिभाजः ॥
–१२८

लक्ष्मण :- (भूतलं पश्यन् सविस्मयं) आर्य पश्यार्यायाः इव पदपङ्क्तिरत्र दृश्यते ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

राम :- (निपुणं निर्वर्ण्य सहर्षं) वत्स, कृतं सन्देहेन ।

या: पूर्वं प्रसमीक्ष्य चित्रफलके हृष्टो वसिष्ठो गुरुः
दृश्यन्ते नियतं पदेष्विह पुरस्ता एव रेखास्स्फुटाः ।
प्रेयस्या मृदुसन्निवेशरुचिराण्येतानि जानीमहे
लभ्या दैववशेन सा, विचिनुमः पर्यन्तभागेष्वितः ॥ -१२९

(अग्रतः परिक्रामन्) हन्त, हन्त,

अत्रैषा पदपङ्क्तिः
साध्वससम्पातविलुप्तरेखाऽपि ।
नूनं तस्या एव
प्रेयस्या मे प्रमाणतो जाने ॥ -१३०

हा प्रिये,

इदमिह बत वर्त्मदुर्गमं क्व ?
क्व नु नवपल्लवकोमलौ तवाङ्घ्री ?
घटितमिदं असाम्प्रतं कथं वा ?
विधिहतकेन मिथो विरुद्धमेव ॥ -१३१

(इति स्वल्पाग्रतो विलोक्य)

वत्स, इत इतः पश्य ।

या मे विधुवदनायाः
मिथिलोद्याने विलोकिता कण्ठे ।
सैषा केसरमाला
विश्लथविन्यासविलुलितप्रसवा ॥ -१३२

(सबाष्पगद्गदं)

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

सरभसपरिरम्भादावयोस्तावदेषां
विकरणमनुरूपं मञ्चशय्यान्तराले ।
किमिति विधिविपाकादद्य तान्येव पुष्पा-
ण्यहह, परिविकीर्णान्यत्र कान्तारभागे ॥ १३३

लक्ष्मण :- (स्वगतं) कथमिदमवलोक्य, मुहुर्मुहुः उज्जृम्भत एवार्यस्य शोकः । तदेनमन्यतः क्षिपामि । (प्रकाशं) आर्य, सम्प्रत्यवलम्ब्य, धैर्यमितो दीयतां दृष्टिः ।

राम :- (परिक्रम्य) वत्स, किमन्यान्यपि दृश्यन्ते प्रियायाश्चिह्नानि ?

लक्ष्मण :- पश्य, पश्य,

भग्नं पुरो धनुरिदं कवचं विशीर्णं
ध्वस्तो रथः प्रणिहता विकृताः खराश्च ।
लूनो ध्वजः त्रुटितदण्डमिहातपत्रं
तत्कस्य युद्धमतिभीममिदं न विद्मः ॥ -१३४

अपि च

उन्मीलिताक्षाणि विदारितास्य-
स्फुटीभवद्दन्तवराटकानि ।
विकीर्णकेशानि विलोक्य मुण्डा-
न्यमी भयान्नाभिपतन्ति गृध्राः ॥ -१३५

(नेपथ्ये)

क्रोशन्तीं राम रामेत्यसकृदवनिजामन्तरिक्षे हरन्तं
रुद्ध्वा गृध्राधिपोऽहं दशरथनृपतेर्मित्रत्तोऽयं जटायुः ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

चञ्चुव्याकृत्तकण्ठं गरूदवदलितस्यन्दनं पङ्क्तिकण्ठं
वेगोत्कर्षादकार्षं तदनु स कुपितः मां निहत्य प्रयातः -१३६

उपरुन्धन्त्यमी कण्ठभागं मम प्राणाः, तदितो न पारयामि वक्तुम्।

राम :- (कर्णं दत्वा सकरुणं विलोक्य) वत्स, श्रूयतामयं तातमित्रं जटायुः अवसन्नया वाचा प्रियाप्रवृत्तिं कथयन्नेव उपरमति। मत्कृते महदिदमनुष्ठितं साहसं महाभागेन। तदेनमेवं सम्भावयामि। अयि भोः गृध्रराज,

या गतिर्यज्ञशीलानां आहिताग्नेश्च या गतिः।
अपरावर्तिना या च गच्छ त्वं तात तां गतिम्॥ -५३७

लक्ष्मण :- आर्य, साम्प्रतमितः प्रविश्य क्रौञ्चारण्यं, आर्याप्रवृत्तिमेव पुनरधिगच्छावः।

राम :- (तथेति परिक्रामन्, पुरो विलोक्य ससंभ्रमं) वत्स, कोऽप्ययमपरो राक्षसप्रतिबन्धः।

एष व्यायतबाहुः
भीषणवेषो महीधराकारः।
मन्ये रावणहतके-
नावां हन्तुं निवेशितो मार्गे॥ -१३८

तदेतावस्य विलूय बाहू, प्रक्षिप्यतामयमितः प्रज्वलति विपिनानले महान्कबन्धः।

लक्ष्मण :- (तथेति निष्क्रम्य, पुनः प्रविश्य) अनुष्ठितस्तावदार्यस्य आदेशः।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

दनु :- (प्रविश्य)

यः प्राक्कौणपतां समेत्य, सुचिरं शापाभिभूतो मुनेः
तैस्तैर्दुश्चरितैः अहानि सुबहून्यस्मिन्ननैषं वने ।
दिष्टया, राघव सङ्गतेन भवता सम्लुष्टगात्रोऽधुना
सम्प्राप्य प्रकृतिं निजां तव गतः सोऽहं दनुर्दासताम् ॥ -१३९

(इति रामस्य पादयोः पतति)

राम :- स्वस्ति भवते (इत्युत्थापयति)

दनु :- (उत्थाय) कथमत्रभवन्तावत्र कान्तारमार्गे ।

लक्ष्मण :- रावणेन हृतदारोऽयं आर्यः, तत्प्रवृत्तिमधिगच्छन्निह सम्प्राप्तः ।

दनु :- (सानुध्यानं) रामभद्र, महोपकारिणस्तव भार्याप्रवृत्तिविषये सत्वरमहं प्रयतिष्ये ।

राम :- (सहर्षं जनान्तिकं) वत्स, पश्य

पुरा योऽसौ घोरां तनुमधिगतो हन्त परुषैः
चरित्रैरुद्वेगं भृशमजनयन्मेऽधिविपिनम् ।
प्रपन्नः स्वं भावं जनयति स विस्रम्भमधुना
ध्रुवं जन्तुर्धत्ते जगति चरितं जात्यनुगुणम् ॥ -१४०

लक्ष्मण :- गन्धर्वराज, कीदृशः प्रयत्नः ?

दनु :- (उभयोः कर्णे एवमिवेति कथयति)

राम :- भद्र, साधु चिन्तितम् । परन्तु,

गन्धर्वप्रवर, विनिन्दनीयवृत्तेः
अत्युग्राकृतिचरितस्य रावणस्य ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

गेहेऽस्याः कथमविशङ्कितः प्रियायाः
संवासो ननु भवितेति विह्वलोऽस्मि ।। -१४१

दनु :- (स्मृतिमभिनीय)
दयितां विभाव्य तव, रावणनीतां
अनसूययाऽत्रिमुनिपाणिगृहीत्या ।
शुभमङ्गरागमपि दिव्यदुकूलं
प्रहितं तदा झटिति मारुतहस्तात् ।। -१४२

तदुपगूढायास्तस्याः न कोप्यभिभवः । शृणु, कारणान्तरमपि

त्वं चेदुपेष्यसि बलादबलामकामां
नूनं भवेत्तव शिरः शतधा विशीर्णम् ।
इत्थं पुरा रघुपते, विहितापराधः
शप्तः स राक्षसपतिर्नलकूबरेण ।। -१४३

तदत्र विषये मा भून्मनसि कालुष्यम् । तन्मामाज्ञापयतु तत्रभवान्समीहितसाधनाय ।

राम :- साधय गन्धर्वपते, पन्थानस्ते शिवास्सन्तु । अहमपि यामि श्रमणां सम्भावयितुं मतङ्गसंस्थायम् ।

दनु :- तथा (इति निष्क्रान्तः)

राम :- (परिक्रामन् पुरो विलोक्य) वत्स, पश्य पश्य,
अविरलभूरुहबृन्दैः
विष्वग्विनिवारितातपप्रसरम् ।

CC-0.TSarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

श्यामलमिदमदवीयः
तस्याऽरण्यं महर्षिवर्यस्य ॥ -१४४

तदेतत्प्रविश्य, सम्भाव्य शबरतापसीं, पम्पातीरमेव गच्छावः ।

(इति निष्क्रान्तास्सर्वे)

॥ इति चतुर्थोऽङ्कः ॥

*

॥ अथ पञ्चमोऽङ्कः ॥

[ततः प्रविशति लङ्कादेवी]

लङ्का :- (पुरो विलोक्य) कः पुनरयमेकाकी परिश्रान्तः इत एवाभिवर्तते ? (निपुणं निर्वर्ण्य) प्रायेणानेन करालेन चारेण भवितव्यम् । तदुपगम्य पृच्छामि ।

करालः :- (प्रविश्य)
हरता राघवदयितां
वालिनमादिश्य तन्निरोधार्थम् ।
निहितः सोऽहमुदन्तं
ज्ञातुं तत्रत्यमाशरेन्द्रेण ॥ -१४५

ज्ञातश्च समया ।

लङ्का :- (उपसृत्य) अपि शक्यो मया विज्ञातुम् ?

करालः :- (विमृश्य) कां पुनरत्रभवीमवगच्छामि ?

लङ्का :- नगराधिदेवता लङ्का नामाऽहम् ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

करालः :- शृणु तर्हि कथयामि ।

हत्वा शक्रसुतं, विधाय तनयं भानोः, कपीनां पतिं
तूर्णं प्रेषयता कपीननुदिशं सीताप्रवृत्त्यै ततः ।
रामेणाङ्गदजाम्बवत्पवनजा याम्यां दिशं प्रेषिताः
सम्पातेरधिगम्य, ते जनकजां प्राप्ता महेन्द्राचलम् ॥ -१४६

लंका :- ततस्ततः ।

करालः :- तदिदानीम् –

हृष्टो जाम्बवतो निशम्य वचनं, सिन्धोस्समुल्लंघनं
कुर्वाणः पवनात्मजः सहृदयं मैनाकमामोदयन्
हत्वा तां पथि सिंहिकां, च सुरसां बुध्याऽतिसन्धाय च
प्राप्तस्तीरमिदं, स भीषणवपुर्दृष्टः सुवेलाचले ॥ -१४७

अत्रान्तरे, चरमगिरिशिखरं गतश्च भगवानंशुमाली । क्रमेण, गाढे च तमसि, सन्दृश्यमान एवान्तर्हितः कुत्रेति न ज्ञायते अन्विष्यापि, परिश्रान्तः त्वां दृष्टवानस्मि । त्वं पुनः क्व प्रस्थितासि ?

लंका :- (स्वगतं) हन्त, स एव भवेत् । (प्रकाशं)

विजित्य कश्चिद्द्रुत वानरो मां
अद्य प्रविष्टः पुरमुग्रवीर्यः ।
क्लृप्तं विधात्रा समयं प्रपन्नं
विभाव्य गच्छामि तदङ्घ्रिमूलम् ॥ -१४८

करालः :- तदिमं वृत्तान्तं स्वामिने विज्ञापयामि । त्वमपि यथा-समीहितं गच्छ । (इति निष्क्रान्तौ)

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

॥ शुद्धविष्कम्भः ॥

[ततः प्रविशति हनूमान्]

हनूमान् :- दिष्ट्या, पथि सर्वानप्यन्तरायानतीत्य, कथञ्चित् सुरासुरैरपि दुष्प्रवेशमिदं पुरं प्रविष्टोऽस्मि । अपि पश्येयमत्र जानकीम् ? (प्राचीं विलोक्य, सहर्षं) अहो, महदिदं अनुकूलं संवृत्तमन्वेषणाय । यदयं भगवान्

हरितो भरितास्तमस्समूहैः
उपलिम्पन्निव कौमुदीसुधाभिः :
द्रुतमुत्पलिनीः करैर्हिमांशुः
शयितास्सम्प्रति बोधयन्नुदेति ॥ –१४९

(इति सर्वतः परिक्रामन्, सविषादं)

विचिता नगरी मया समन्तात्
विचितं राक्षसराजसद्म चैतत् ।
रघुवीरकुटुम्बिनीं न कुत्रा-
प्यधिगच्छाम्यधुना करोमि किं वा ॥ –१५०

(स्मृतिमभिनीय)

"रुद्धां राक्षसपतिना
सीतादेवीमशोकवनिकायाम् ।
जानीही" ति दनुर्मां
अवदद्गन्धर्वसार्वभौमस्सः ॥ –१५१

तत्कुत्र वा तदुपवनमधिगच्छामि ? (इति कतिचित्पदानि गत्वा, पार्श्वतोऽवलोक्य) नूनमिदमेव तत् । यतः –

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

धिक्कृतनन्दनमेतत्

विहसितकौबेरनिष्कुटश्रीकम् ।

सम्प्रत्यवलोकयतः

जनयत्यानन्दमुद्यानम् ॥ -१५२

तत्प्रविशामि (इति नाट्येन प्रविश्य, परितो विलोक्य) अहो, रामणीयकमुद्यानस्य ।

भीता राक्षसराजात्

ऋतवस्सर्वेऽपि यौगपद्येन ।

अन्वहमत्र वसन्तः

स्वैस्वैर्भावैर्विभूषयत्येनम् ॥ -१५३

(श्रुतिमभिनीय) कथमत्र शिंशुपातरुपर्यन्ते कोऽप्यालापः । भवतु, जानामि (इत्युपसृत्य, पश्यन्, सहर्षाङ्गुतं)

अश्रुस्नपितकुचाग्रा

विशिथिलविन्यासवेणिकाबन्धा ।

योषा धूसरवसना

कैषा चान्द्री कलेव तन्वङ्गी ॥ -१५४

अपि नाम सैवेयं भवेत् ? भवतु, सखी च काचिदेनां आश्वासयति । तदनयोः विस्रम्भजल्पितैरवगच्छामि ।

(इति निलीय तिष्ठति)

[ततः प्रविशति यथानिर्दिष्टा सीता]

सीता :- हला, तिअडे, तुमं इमादो संकटादो रामभद्दो एव्व उद्धरिस्सदित्ति मं कुदो आसासेसि ? [हला, त्रिजटे, अस्मात्सङ्कटात् रामभद्र एव उद्धरिष्यतीति मां कुत आश्वसयसि]

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

हनूमान् :- (सहर्षं) दिष्ट्या, सैवेयम् ।

त्रिजटा :- हला, तुए उववण्णिदेहिं गुणेहिं सो एत्थ विसए परम्मुहो ण हविस्सदित्ति मण्णेमि । (हला, त्वया उपवर्णितैर्गुणैः स अत्र विषये पराङ्मुखो न भविष्यतीति मन्ये ।)

हनूमान् :- अति हि नाम निपुणा खल्वेषा । यत्परोक्षस्यापि गुणवर्णनेनैवाऽयमीदृश इति निर्धारयति ।

सीता :- अहं रक्खसणीदत्ति कहं उण तेण जाणिदव्वम् । ["अहं राक्षसनीते"ति कथं पुनस्तेन ज्ञातव्यम्] मह उण हद-देव्वेण सो विणिहदो सउंदराओ । आहवविण्णादे वि, विणा गुरुणिओअं कहं एत्थ पवुत्तस्सदि । कहं वि पवुत्तो वि मज्झेमग्गं दसमुहेण णिहिदेहिं वलिट्ठेहिं णिलुद्धो कहं एत्थ आअमिस्सदि । ता मह मुच्चु एव्व सरणं [मम पुनः हतदैवेन स विनिहतः शकुन्तराजः । आहवविज्ञातोऽपि विना गुरुनियोगं कथमत्र प्रवर्तिष्यति । कथमपि प्रवृत्तोऽपि मध्येमार्गं दश-मुखेन निहितैर्बलिष्ठैः निरुद्धः कथमत्र आगमिष्यति । तस्मान्मम मृत्युरेव शरणम्]

हनूमान् :- शान्तं पापं, शान्तं पापम् । कथमीदृश्यप्येतादृशं दैन्यमनुभवति ।

त्रिजटा :- हला, तेहिं तेहिं मंगलेहिं णिमित्तेहिं सो तुमं अवस्सं लंभिस्सदित्ति मण्णेमि । [हला, तैस्तैर्मङ्गलैर्निमित्तैः सः त्वां अवश्यं लप्स्यते इति मन्ये]

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

सीता :- हन्त, हन्त

सुमरिअ सुमरिअ तिअडे
राहवमुहं मुद्धपुंडरीअस्स ।
तंमइ मह उण हिअअं
पिअसहि ता किं उवेक्खेसि ॥ -१५५

[स्मृत्वा स्मृत्वा त्रिजटे,
राघवमुखं पुण्डरीकमुग्धम् ।
ताम्यति मम पुनर्हृदयं
प्रियसखि, तत् किं उपेक्षसे ॥] (इति मूर्च्छति)

त्रिजटा :- हा, बलिअं खु एसा मुच्छिदा । ता को एत्थ पडिआरो ?
[हा, बलवत्खलु एषा मूर्च्छिता, तस्मात् कोऽत्र परिहारः]

हनूमान् :- किमधुना, देवीं समुपसृत्य सान्त्वयामि ?
(इति चिन्तां नाटयति)

(नेपथ्ये)

सीतां राघवविरहात्
दनुना विज्ञाय काममस्वस्थाम् ।
प्रहितावावामधुना
कर्तुं चेतोविनोदनं तस्याः ॥ -१५६

त्रिजटा :- सहि, सीते, समस्सस समस्सस, उवहिदं किंवि दे आसासणं
[सखि, सीते, समाश्वसिहि समाश्वसिहि । उपस्थितं किमपि ते आश्वासनम्]

सीता :- (समाश्वस्य) सहि, किं णु खु आसासणं ?
[सखि, किं नु खल्वाश्वासनम्]

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

हनूमान् :- किं तद्विनोदनं भवेत् ?

त्रिजटा :- कमेण जाणामो [क्रमेण जानीमः]

(प्रविश्य, विद्याधरौ सीतां प्रणमतः)

एक :- देवि, सम्प्रति दनुना गन्धर्वराजेन "सीतानन्दनं" नाम किमपि रूपकं प्रणीय, "तेन तां रञ्जयत"मित्यादिष्टौ स्वः। तदधुना प्रेक्षितुमर्हति तत्रभवती।

त्रिजटा :- किं तं भवे ? [किं तद्भवेत्]

द्वितीय :- व्याख्यातं ननु नाम्नैव। विना रघुनन्दनचरितं किमन्यदानन्दनं सीतायाः।

सीता :- सहि, जइ अज्जउत्तस्स चरिदं, ता पेक्खणिज्जं दाव। किंदु घोराहिं रक्खसीहिं परिवुदा कहं एदं पेक्खिस्सं। [सखि, यदि आर्यपुत्रस्य चरितं, तर्हि प्रेक्षणीयं तावत्। किन्तु, घोराभिः राक्षसीभिः परिवृता कथमेतत् प्रेक्ष्ये ?]

विद्याधरौ :- असत्स्वामिना दत्तं किमपि मोहनचूर्णं त्वदहितजनदर्शनश्रवणप्रतिपन्थि परितः प्रक्षिप्यावामिह प्रविष्टौ स्वः।

हनूमान् :- साधु गन्धर्वराज साधु।

त्रिजटा :- जइ सुविहिदाइं रंगमंगलाइं, ता आरहीयदु णंदी।

[यदि सुविहितानि रङ्गमङ्गलानि, तर्हि आरभ्यतां नान्दी]

एक :- अहमस्मि सूत्रधारः।

द्वितीय :- अहमस्मि पारिपार्श्विकः।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

सूत्रधार :-

क्रमात्मन्दाक्षनुत्सार्य गौर्याः प्रथमसङ्गमे ।
रभसागतया स्वैरं निर्वृतः पातु वः शिवः ॥ -१५७

(इति नान्दीं पठित्वा] मारिष, प्रवर्त्यतामातोद्यम् ।

पारिपार्श्विक :- (नेपथ्याभिमुखमवलोक्य) पश्यैतौ गृहीतरामलक्ष्मण-भूमिकौ ममानुजौ इत एवाभिवर्तेते ।

सूत्रधार :- तदेहि, आवामप्यनन्तरकरणीयाय सज्जीभवावः ।

(इति निष्क्रान्तौ)

॥ प्रस्तावना ॥

[ततः प्रविशति सलक्ष्मणो रामः]

राम :- अनुशिष्टोऽस्मि, दिवः प्रस्थितया श्रमणया, "सन्धाय सुग्रीवेण, प्रियावृत्तिमवगमयस्वे"ति । तत्कुत्र कथं वा तामासदयेयम्

सीता :- अज्जउत्त, किं एदं वि दे अत्थि मणसि ?

[आर्यपुत्र किमेतदपि तेऽस्ति मनसि ?]

त्रिजटा :- हला, णं मए भणिदं [हला, ननु मया भणितम्]

लक्ष्मण :- किं विस्मृतं तदार्येण, यदुक्तमत्रैव कार्ये यतमानेन दनुना, "यावदहं सुग्रीवसचिवं हनुमन्तं प्रेषयामि, तावदत्रैव पम्पातीरे निवसे"ति ।

हनूमान् :- (स्मृतिमभिनीय) इदं तत्संविधानकं गन्धर्वराजस्य ।

राम :- वत्स, सम्यगनुस्मारितोऽस्मि । तदस्मिन्नशोकतरूमूले क्षणमुपविशावः

(इत्युपविश्य, सनिःश्वासं)

CC-0TSarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

ऊर्ध्वं चेदवलोकये कुलगुरुर्दृश्येत भासां निधिः

श्वश्रूर्नूनमुपालभेत धरणी पश्याम्यधस्ताद्यदि ।

वीक्षे यद्यभितः सनाभिरपिहा खिद्येत नः सागरः

कष्टं किं करवाणि वज्रकठिनाः प्राणा न सीदन्त्यमी ॥

-१५८

(इति बाष्पं विसृजति)

सीता :- अम्हो, मह किदे एव्वं अदि किलिम्मदि अज्जउत्तो ।

[अहो, मम कृते एवमतिक्लिश्नाति आर्यपुत्रः]

लक्ष्मण :- ननु विज्ञापयामि ।

शोकाद्धैर्यं सर्वथा याति नाशं

नष्टे तस्मिन्नुद्यमे का प्रसक्तिः ।

मुक्तोद्योगो नाप्नुयात्कार्यसिद्धिं

तन्निश्शोको धैर्यमार्य श्रयस्व ॥ -१५९

सीता :- साहु वच्छ साहु [साधु वत्स साधु]

राम :- वत्स, सम्प्रति निरोद्धुमनुचितोऽयं शोकावेगः । यतः

शोकस्य हन्त हृदि विज्ज्वलतः प्रकामं

संरोधनात्प्रकटनं वरमेव मन्ये ।

कक्षार्पितस्य दहनस्य निगूहनाद-

प्युज्जृम्भणं हि झटिति प्रशमैकहेतुः ॥ १६०

(स्मृतिमभिनीय सकरुणं)

मर्माविद्भिः कुसुमधनुषः पीड्यमाणेन बाणैः

भूयो भूयः शशिमुखि, मया स्मर्यसे त्वं यथाद्य ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

एवं विष्वक्कृतकदनया राक्षसीभिस्त्वयापि
स्मर्ये भीरु:, प्रतिकूलमहं हन्त चेज्जीवितासि ॥
–१६१

(इति स्तिमितस्तिष्ठति)

सीता :- जीवामि अज्जउत्त, जीवामि मंदभाइणी।
[जीवामि आर्यपुत्र, जीवामि मन्दभागिनी]

लक्ष्मण :- निसर्गसिद्धं त्वयि वा हिमाद्रौ वा प्रतिष्ठितम् ।
यद्धैर्यं तस्य समयं समाप्तं विद्धि साम्प्रतम् ॥
–१६२

राम :- अयं मकरकेतनो विकिरति प्रकामं शरान्

सीता :- भअवं कुसुमाउह, देव्वेण एव्वं पडिऊलिदं, इमं तुमं वि किं पडिऊलेसि। [भगवन्कुसुमायुध, दैवेन एवं प्रतिकूलितस्य अस्य, त्वमपि किं प्रतिकूलोऽसि]

राम :- असौ कुसुमसौरभादृतमरुद्वसन्तोदयः ।

सीता :- कहं तुमं वि सण्णिहिदो ? [कथं त्वमपि सन्निहितः ?]

राम :- इदं च वलदम्बुजोत्पलविलासि पम्पासरः

सीता :- हद्धी, हद्धी, अणत्थपरंपराओ। [हा धिक्, हा धिक् अनर्थपरम्पराः]

राम :- कथं तदवधारये कथय धैर्यमस्मिन्क्षणे ॥ –१६३

सीता :- हा, संकडे पडिदह्मि। [हा, सङ्कटे पतिताऽस्मि]

CC-0.TSarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

लक्ष्मण :- आर्य, कथं विह्वलोऽसि ? ।

राम :- (अनाकर्णितकेन, पुरोऽवलोक्य)

अशोकोऽपि निसर्गेण सशोकं वीक्ष्य मामयम् ।
अनुकम्पार्द्रहृदयः मुञ्चत्यश्रूणि साम्प्रतम् ॥ –१६४

लक्ष्मण :- हन्त, तत्रभवानुन्माद्यति ।

सीता :- णूणं पच्चुदपएलिमकुसुमनिअरं वाहप्पसरोत्ति जाणादि ।
[नूनं प्रच्युतपचेलिमकुसुमनिकरं बाष्पप्रसरमिति जानाति]

राम :- कथमहमिहासीनः शांचयाम्येनम् (इति उत्थाय गच्छति)

लक्ष्मण :- अतिभूमिं गतेन शोकेन विवश इवार्यो लक्ष्यते ।
तदेनमनुसरामि (इति तथा करोति)

राम :- (विलोक्य)

विवर्तयञ्जपवटीं काषायाम्बरवेष्टितः ।
कोऽयं ध्यायन्प्रमोदाश्रु मुञ्चन्भिक्षुर्विराजते ॥ १६५

तदेनमनुसृत्य प्रियोपलब्धिमवगच्छामि ।

सीता :- हद्धी, हद्धी, सो एव्व रक्खसहदओ अज्जउत्तं पदारेदुं पवुत्तोत्ति तक्केमि । [हा, धिक्, हा धिक्, स एव राक्षसहतकः आर्यपुत्रं प्रतारयितुं प्रवृत्त इति तर्कयामि]

त्रिजटा :- सहि, मा उत्तम्म, पेक्खामो किं एदत्ति । [सखि, मा उत्ताम्य, प्रेक्षामहे किमेतदिति]

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

राम :- (उपसृत्य)

प्रत्यक्ष एव निखिलः प्रपञ्चो वीक्ष्यते त्वया ।
भगवन् मम सा सीता कथय क्व नु वर्तते ॥ –१६६

सीता :- कहं णिग्गहिदव्वे सामप्पयोओ ? [कथं निग्रहीतव्ये सामप्रयोगः]

हनूमान् :- स एवायमुन्मादः यः किल मयाऽपवाहितः ।

लक्ष्मण :- आर्य, सम्प्रत्यलमनेन व्यामोहेन ।

भृङ्गाली सा न तु जपवटी पल्लवास्ते न वासः
काषायं, ताः कुसुमकलिका नाऽक्षिसम्मीलनानि ।
माध्वीपूरः स्रवति स मुहुः न प्रमोदाश्रुधारा
सम्पत्स्येथाः स्फुरति पुरतः क्ष्मारुहोऽयं न भिक्षुः ॥
–१६७

सीता :- अह्मो, कहं रुक्खं उद्दिसिअ उब्भंतं अज्जउत्तेण ?
[अहो, कथं वृक्षमुद्दिश्य उद्भ्रान्तमार्यपुत्रेण]

राम :- (अग्रतो विलोक्य)

अपारपङ्काकलिताङ्गरागः
वीटीरसारुण्यविराजितोष्ठः ।
गायन्मुहुर्मञ्जुलमात्तहर्षः
कोऽयं विलासी विचरत्यरण्ये ॥ –१६८

(उपसृत्य) भोः, क्व पुनर्मम सीता ?

सीता :- अज्जउत्त इअंह्मि [आर्यपुत्र इयमस्मि] (इति उत्थाय गन्तुमिच्छति)

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

त्रिजटा :- अइ, मुद्धे, रूवअं खु एदं [अयि मुग्धे, रूपकं खल्वेतत्]

सीता :- कहं अहं वि अज्जउत्तो विअ उभ्भंतह्मि। [कथमहमपि आर्यपुत्र इव उद्भ्रान्तास्मि]

राम :- कथमयं निजगानरसविवशहृदयो नाकर्णयत्येव मे वाक्यम्

लक्ष्मण :- आर्य, नायं विलासी ।

कुसुमाच्छादितशाखः
पल्लविताग्रः पुरः कोऽपि ।
कूजत्कोकिलभृङ्गः
विलसति सहकारभूरुहः पश्य ॥ —१६९

राम :- (कतिचित्पदानि गत्वा)

समुज्वलाभिर्ननु दीपिकाभिः
विशत्यसौ कोऽपि घनान्घकारम् ।

पृच्छाम्येनं प्रियाप्रवृत्तिम् ।

लक्ष्मण :- (सनिर्वेदं) आर्य, नहि नहि ।

श्यामायमानेषु वनेषु पश्य
भाति प्रफुल्लः खलु चम्पकद्रुः ॥ —१७०

राम :- (पार्श्वतो विलोक्य)

दानाम्बुनिर्भरविषक्त मधुव्रतालिः
वप्रक्रियां ननु तनोति मदावलोऽत्र ।

लक्ष्मण :- आर्य, कोऽयं व्यामोहः ?

सम्फुल्लपुष्पविगलन्मधुलोलुपालिः
आस्ते तमालतरुरेष गिरेरुपान्ते ॥ —१७१

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

राम :- (अग्रतः पश्यन्)

अरुणव्रणभीषणाङ्गयष्टिः

करुणं क्रन्दति काननेऽत्र कश्चित् ।

किमयं जानीयाऽज्जानकीम् ?

लक्ष्मण :- निनदद्भ्रमरव्रजाश्रितोऽयं

परितः कोरकितः पलाशशाखी ॥ –१७२

राम :- वत्स, इतः पश्य

स्पर्शोत्कर्षविचित्र वेपथुमतीं प्रोद्भिन्नरोमोद्गमां

कांचिद्वीक्ष्य मुहुर्मुहुर्हसति काप्यन्या समीपे स्थिता ।

लक्ष्मण :-

पाटीरद्रुमसङ्गता मृदुमरुल्लोला स्फुरत्कोरका

सेयं चूतलता तदन्तिकगता फुल्लाप्यसौ माधवी ॥ –१७३

राम :- (अन्यतो विलोक्य)

क्रीडति कश्चित्प्रियया

कौसुम्भेनाम्भसा कामी ।

लक्ष्मण :- आर्य, निपुणं निरूपय ।

एतौ कोमलकिसलय-

भासाऽरुणितौ लतावृक्षौ ॥ –१७४

राम :- वत्स, पश्य, कयोश्चिदत्र विवाहमहोत्सव इव दृश्यते ।

लक्ष्मण :- आर्य, कथमेतत् ?

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

राम :- एषा पुष्कललाजवृष्टिरभितः

लक्ष्मण :- नहि, नहि, सूनच्युतिर्वीरुधां

राम :- अप्येते द्विजगीतमन्त्रनिनदाः

लक्ष्मण :- नहि, नहि, रम्या गिरः पक्षिणाम् ।

राम :- पश्यैतज्ज्वलनान्तराज्यहवनं

लक्ष्मण :- नहि, नहि, माध्वीच्यवः पल्लवे

राम :- नन्वेषोऽत्र करग्रहः

लक्ष्मण :- नहि, नहि, सुघटिते शाखे लताशाखिनोः ।। -१७५

राम :- वत्स, किमिदं सर्वमपि मदुन्नीतमन्यथयसि ?

इदं तावत्पश्य,

कस्याश्चिदम्बुजदृशः कुचसीम्नि कश्चित्

कामी करं कलयति प्रतिपन्नहासः ।

लक्ष्मण :- फुल्लस्य केसरतरोर्विटपो लतायाः

गुच्छे विषक्त इह, तद्विरमार्य, मोहात् ।। -१७६

राम :- (पुरो विलोक्य, सहर्षं) हन्त, हन्त, प्रियैव मयोपलब्धा यतः

अङ्गनासु मुदितासु समन्तात्

अप्रसन्नहृदयेयमिहास्ते ।। -१७७

सीता :- (सवितर्कं) कहं इहविदा वि अहं अज्जउत्तेण दिट्ठह्मि ?

[कथं अत्र विद्यमानापि अहं आर्यपुत्रेण दृष्टाऽस्मि]

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

त्रिजटा :- हला, एसो वि को वि उम्मादो एव्व ।

[हला, एषोऽपि कोऽपि उन्माद एव]

लक्ष्मण :- (साशङ्कं) अप्रतीकारविजृम्भणोऽयमार्यस्य उन्मादावस्कन्दः । तत्कथं प्रतिक्षिप्तो भवेत् ?

(नेपथ्ये)

भो भो महाभाग, कोदण्डपाणे,

आयातः श्रमणासभाजनकृते तूर्णं मतङ्गाश्रमं
तत्राऽऽकर्ण्य "गता दिवं रघुपतेरेषा प्रभावादि"ति ।
स्वां गच्छन्वसतिं, वनेऽत्र विजने लब्ध्वा यदस्मादहं
घोराद्वानरपुङ्गवादशरणः, त्रातव्य एष त्वया ॥
—१७८

(उभौ ससंभ्रममाकर्णयतः)

राम :- वत्स, गुहस्येवेदमाक्रन्दितं, तद्धनुर्धनुः ।

हनूमान् :- (सस्मितं) ममेदं तद्विलसितम् ।

[प्रविश्य, पुरुषः ससंभ्रमं रामस्य पादयोः पतति]

लक्ष्मण :- आर्य, स एवायं प्रियसखस्तत्र गुहो नाम निषादाधिपतिः ।

राम :- उत्तिष्ठ, सखे, उत्तिष्ठ, ।

गुह :- (उत्थाय, निर्वर्ण्य सहर्षं) कथमयं प्रियसखो मे रामभद्रः ?

राम :- क्वाऽसौ वानरापसदः ? (इति उद्धतं परिक्रामति)

हनूमान् :- दिष्ट्या, रूपकविधयैव, अनया सीतया परिज्ञास्ये

(प्रविश्य हनुमद्वेषधारी)

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

हनुमद्वेषधारी :-

मयि दासानुदासेऽत्र युक्तः कोपः किमीदृशः ।
पात्यतामेष राजेन्द्र मूर्धनि विद्विषतां तव ।। -१७९

(इति पादयोः पतति)

राम :- ननु कस्तावद्भवान् ?

हनूमान् :-

प्राप्तं त्वामवकर्ण्य राघव, दनोर्वाचा प्रहर्षस्फुर-
द्रोमाञ्चाञ्चितविग्रहेण तनयेनाऽहर्पतेः सादरम् ।
सुग्रीवेण, समस्तवानरशिरोभूषायमाणाङ्घ्रिणा
सन्दिष्टः, सचिवो हनूमदभिधः प्राप्तोऽस्म्यहं मारुतिः ।।
-१८०

राम :- तत्कथमाचरितस्त्वयाऽयमविनयोऽस्मिन्मम मित्रे ?

हनूमान् :- विभाव्य शोकपरवशमार्यं, इष्टजनावस्कन्दनजनितरुषं विना, न प्रकृतिमाप्नुयादित्यनुष्ठितं इदं मया ।

सीता :- साहु पवणसुद साहु । महं तं खु उपकिदं तुए ।
[साधु पवनसुत साधु । महत् खलु उपकृतं त्वया]

गुह :- देव, तर्हि नायमस्यापराधः ।

राम :- तद्भवत्कृते मर्षये । सखे, निषादाधिप, कः पुनः उदन्तस्तात-चरणानाम् ?

गुह :- श्रुत्वोदन्तं तवेमं स भरतशिरसि न्यस्य भारं धरित्र्याः
नायोध्यायां निवासे मतिमकृत नृपः त्वद्वियोगा-
सहिष्णुः ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

शक्रः पश्चाद्दिवं तं प्रियसखमनयद्दैत्यविध्वंसहेतोः
नन्दिग्रामे स शास्ति क्षितितलमनुजः पादुके तेऽभिषिच्य ॥
−१८१

राम :- हन्त, मद्विरहात्कष्टमनुष्ठितं तातेन ।

गुह :- रामभद्र, दिष्ट्या, त्वामधुना प्रपन्नोऽस्मि । तदस्मिन्नत्याहिते भवता समं वसन् सौहार्दं सफलयितुमिच्छामि ।

लक्ष्मण :- सखे, मामैव । त्वमितः प्रतिनिवृत्य अस्मद्विरहपर्याकुलानार्यचरणान्, अम्बाश्च आश्वासयितुमर्हसि ।

गुह :- (विचिन्त्य स्वगतं) युक्तमाह सौमित्रिः ।

गत्वा तूर्णमयोध्यां
भरताय निवेदयेऽद्य रामदशाम् ।
एवं सोऽपि ससैन्यः
कृच्छ्रात्त्रातुं यतेतापि ॥ −१८२

सीता :- अवि णाम सो महाभाओ एव्वं करिस्सदि ।
[अपि नाम स महाभागः एवं करिष्यति ?]

त्रिजटा :- सहि, णं एसो एव्व समत्थो तुमं उद्धरिदुं ।
[सखि, नन्वेष एव समर्थः त्वमुद्धर्तुम्]

राम :- सखे, सम्यगाह वत्सः । तत्साधयतु भवान्समीहितसाधनाय ।

गुह :- तथा (इति निष्क्रान्तः)

CC-0TSarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

राम :- हनूमान्, किं प्रयोजनमुद्दिशता सुग्रीवेण त्वमत्र प्रेषितोऽसि ?

हनूमान् :- अपहृतराज्यदारः, वालिना सन्तर्ज्यमानश्चिरतरं आपादमनुभवन्, दिष्ट्या, भवन्तमुपस्थितं विज्ञाय, त्वामेवात्र शरणं मन्यमानः, सख्यमिच्छन् मामत्र प्रेषितवान् ।

राम :- अपि जानासि तस्य वालिनो विक्रान्तिविलसितानि ?

हनूमान् :- बाढं, जाने, तदेव कथयामि । पुरा हि —

लोकाञ्जेतुमटन् निशाचरपतिर्ध्यायन्तमिन्द्रात्मजं
दृष्ट्वा, दक्षिणवारिधेस्तटभुवि, प्रापद्ग्रहीतुं शनैः ।
तेनासौ भुजमूलयन्त्रितवपुः त्रीनर्णवान्घूर्णितः
किष्किन्धोपवने श्वसन्मुखततिर्मुक्तोऽभजन्मित्रताम् ॥ —१८३

किंच,

एतद्वपुस्तेन पुरा हतस्य
पश्याग्रतो दुन्दुभिदानवस्य ।
कङ्कालशेषं पतितं वनेऽत्र
कैलासकूटश्रियमादधाति ॥ —१८४

अपि च,

पश्य त्वं रघुवीर सप्त पुरतस्तालद्रुमानुन्नतान्
हेलाकृष्टधनुर्गुणेन विभुना शाखामृगाणाममी ।
भिन्नास्सप्तभिरेकदा शरवरैर्वाताभिपूर्णान्तराः
गायन्तीव यशस्तदीयमधुनाप्युच्चैरमुष्मिन्वने ॥ —१८५

सीता :- हद्धी, हद्धी, ईदिसं बलिट्ठं दसमुहेण किदसिणेहं वालिणं वावादिअ, कहं सुग्गीवं पडिट्ठावइस्सदि ? [हा धिक् हा धिक्

CC-0T Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

ईदृशं बलिष्ठं दशमुखेन कृतस्नेहं वालिनं व्यापाद्य कथं सुग्रीवं प्रतिष्ठापयिष्यति]

(रामः परिक्रामन् कङ्कालं प्रपदेनोत्क्षिपति)

लक्ष्मण :- हनूमन्पश्य,

आर्येण प्रपदेनाद्य कङ्कालोत्क्षेपणच्छलात् ।

यशस्स्तोमः प्रतिक्षिप्तः सुदूरं वानरेशितुः ॥ –१८६

हनूमान् :- बाढं सौमित्रे बाढम् ।

राम :- (पुरो विलोक्य, धनुरायम्य) वत्स,

बाणेनैकेन भेत्स्यामि तालानेतान्पुरस्स्थितान् ।

प्रत्येतु, कर्मणानेन सुग्रीवो मम विक्रमम् ॥ –१८७

(इति तथा करोति)

हनूमान् :- सौमित्रे पश्य,

किञ्चिदाकृष्टमात्रोऽपि कार्मुकात्प्रच्युतः शरः ।

निर्भिद्य, सालसप्तिं प्रविष्टो धरणीतलम् ॥ -१८८

त्रिजटा :- हला, एदिणा विक्कमेण दाणिं णिस्संसआ होहि ।

[हला, एतेन विक्रमेण इदानीं निस्संशया भव]

हनूमान् :- राघव तवैतद्विक्रमविजृम्भितं गिरितटात्पश्यति सुग्रीवः ।

राम :- तत्किमिति विलम्बसे । सत्वरमानयैनम् ।

हनूमान् :- तथा (इति निष्क्रम्य, सुग्रीवेण सह प्रविश्य) देव, अयं ते प्रियसखः प्रपन्नः । तदेनं सम्भावय ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

सुग्रीव :- महाभाग, वैकर्तनः सुग्रीवोऽहमभिवादये ।
(इति पदयोः पतति)

राम :- (तमुत्थाप्य, परिष्वज्य च) सखे, मा भैषीः ।
निहत्य वालिनं वीर्यात्तव भार्यापहारिणम् ।
राजानं त्वां विधास्यामि कपीनामिह साम्प्रतम् ।। -१८८

सुग्रीव :- गृहीतोऽयं शिरसा देवस्य प्रसादः ।

लक्ष्मण :- भवाताप्यमुष्य, भार्याप्रवृत्तिविषये सहायेन भवितव्यम् ।

हनूमान् :- किमेतदपि वक्तव्यम् ?
उपकर्तव्याः सन्तः
सद्भिर्निर्व्याजमेष धर्मो हि ।
पूर्वं त्वदुपकृतस्सन्
प्रत्युपकुर्यात्कथं नायम् ।। -१८९

सीता :- (सहर्षं) णिद्दारिदं खु मह गवेसणं एदेहिं ।
[निर्धारितं खलु मम गवेषणमेतैः]

सुग्रीव :- (स्मृतिमभिनीय)
योषा काचिद्गगनसरणौ रक्षसा नीयमाना
दृष्ट्वा भूमीधरतटगतं वानरैर्मां चतुर्भिः ।
रामेत्युच्चैः करुणमसकृद्व्याहरन्ती निजानि
क्षौमग्रन्थिस्थगितकिरणान्यक्षिपद्भूषणानि ।। -१९०
(इत्यर्पयति)

सीता :- अहो, रक्खसणीअमाणाए मए जो दिट्ठो सो एसो ।
[अहो, राक्षसनीयमानया मया यो दृष्टः स एव एषः]

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

राम :- (निर्वर्ण्य, सास्रं)

मम स्पर्शात्सद्यः पुलकितकपोलं प्रियतमा
तदानीं येन स्वं वदनकमलं मार्जितवती ।
तदेतत्कौशेयं मृगमदमयैः पत्रमकरी-
विलासैः सङ्क्रान्तैः वहति बत वैचित्र्यमधुना ॥
-१९१

वत्स, विस्रंसय ग्रन्थिमुत्तरीयस्य ।

(लक्ष्मणः विस्रंसनं नाटयति)

राम :- (मुक्ताहारमादाय, सनिःश्वासं)

मां प्राप्तमन्तिकमवेक्ष्य यदा मृगाक्षी
नम्रानना स्थितवती त्रपया तदायम् ।
तस्या विलोचनरुचाऽगमदुत्पलाभां
किं पाण्डुतां वहति तद्विरहादिदानीम् ॥ -१९२

सीता :- एदं वि सुट्ठु सुमरिदं अज्जउत्तेण ।
[एतदपि सुष्ठु स्मृतमार्यपुत्रेण]

राम :- (नूपुरौ विलोक्य)

प्रासादादवरोहणे मृगदृशो मन्दं चलन्त्यास्तदा
कुर्वाणौ गणनामिव स्वरणितैः सोपानपंक्तेः क्रमात् ।
हंसाल्लँज्जयतः स्म नूपुरवरौ यौ ताविमौ साम्प्रतं
मूकीभावमुपेत्य तच्चरणयोर्द्वन्द्वं किमु ध्यायतः ॥
-१९३

(सविमर्शं) कथं न दृश्यते स चूडामणिः ?

सौधादधस्तादवरोहणार्थं
सम्प्रस्थितायाः सरसीरुहाक्ष्याः ।

CC-0.Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

यो वेणिमूले ग्रथितस्तदानीं
दृष्टस्समुद्यन्निव खे विवस्वान् ॥ -१९४

सीता :- अज्जउत्त, सो एथ्थ एव्व वट्टइ ।
[आर्यपुत्र, सोत्र एव वर्तते]

लक्ष्मण :- आर्य, नायं विक्लबतायाः समयः । तदिदानीं निश्चिनोतु सुग्रीवेणार्यप्रवृत्त्युपायम् ।

सीता :- वच्छ लक्खण, साहु भणिदं ।
(वत्स लक्ष्मण, साधु भणितम्)

राम :- (समाश्वस्य) सखे सुग्रीव, ततः कुत्र वा प्रस्थितः स राक्षसहतकः ।

सुग्रीव :- दक्षिणेन दिग्भागेन ।

हनूमान् :- देव, क्रियतां तावद्यत्नो वालिनिधनाय ।

राम :- (विचिन्त्य सुग्रीवं प्रति)
निर्गत्य वानरेन्द्रं त्वमाह्वयस्वात्र वालिनम् ।
ऋष्यमूकगिरौ तिष्ठन् युध्यमानं निहन्मि तम् ॥ -१९५

सुग्रीव :- यदाज्ञापयति देवः (इति निष्क्रान्तः)
(नेपथ्ये कलकलः) (सर्वे सम्भ्रान्ताः कर्णं ददति)

राम :- हनुमन्, पश्य, गिरिवरमारुह्य किमेतदिति ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

हनूमान् :- (आरोहणं नाटयन्, परितः चक्षुषी प्रसार्य)

युद्धाय द्रागुष्णभानोस्तनूजे-
नाहूतस्सन् हेममाली स वाली ।
रोषारब्धक्ष्वेडितस्फोटिताशः
किष्किन्धाया निस्सरत्येष वीरः ॥ -१९६

(रामलक्ष्मणौ गिरितटमारुह्य पश्यतः)

लक्ष्मण :- आर्य, पश्य पश्य,

साटोपं परिबद्धकच्छचिकुरावाबद्धमुष्टी दृढं
नर्दन्तौ रदपीडिताधरपुटौ रोषारुणापाङ्गकौ ।
वेगाघातनिरन्तरस्रवदसृग्धाराद्र गण्डस्थलौ
घूर्णं घूर्णमुपेत्य वानरवरौ सङ्ग्रामयेते पुरः ॥ -१९७

राम :- (सविमर्शं) वत्स, पश्यामि पश्यामि ।

सीता :- कहं अज्जउत्तेण अहुणा वि ण गहीदं सरासणं ।
[कथं अर्यपुत्रेणाद्युनापि न गृहीतं शरासनम्]

लक्ष्मण :- आर्य, कुतस्समरसङ्गतः कपिवरस्त्वयोपेक्ष्यते ?

सीता :- साहु लक्खण साहु । एवं तुवरावेहि ।
[साधु लक्ष्मण साधु । एवं त्वरयस्व ।]

राम :- न वीरसमयोचितं द्विषि पराङ्मुखे मर्दनम् ।

सीता :- हन्त, कहं दाणिं ? [हन्त, कथमिदानीम् ?]

हनूमान् :- त्वया यदि न हन्यते भवति भङ्गुरस्सङ्गरः

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

सीता :- किं इदो भणिस्सदि ? [किमितः भणिष्यति]

राम :- तदत्र करवै कथं निपतितोऽस्मि हा सङ्कटे ॥ -१९८

सीता :- अज्जउत्त, तुमं उण ण पडिदो, किंदु अहं एव्व मंद-
भाइणी ।
[आर्यपुत्र, त्वं पुनर्न पतितः, किन्तु, अहमेव मन्दभागिनी]

राम :- धिक् कथमपक्रान्त एव सुग्रीवः ।

सीता :- हा, हदह्मि [हा, हताऽस्मि]

(नेपथ्ये, सुग्रीवं प्रति)

तिष्ठ त्वमथवा गच्छ कान्दिशीकेन किं त्वया ।
प्राप्तोऽसि यदवष्टम्भात्तं निहन्मि रघूद्वहम् ॥ -१९९

सीता :- (सहर्षं) दिट्ठिआ, दाणिं अब्भमित्तीणो संवुत्तो ।
[दिष्ट्या, इदानीमभ्यमित्रीणस्संवृत्तः]

राम :- (सहर्षसम्भ्रमं) दिष्ट्या, सङ्कटान्मुक्तोऽस्मि । यदयं
मामभिपतति । तदेनं भुजबलेन सम्भावयामि ।
(इति निष्क्रान्तः)

सीता :- अज्जउत्त, विअई होहि संपदं देवदाणं पसादेण ।
[आर्यपुत्र, विजयी भव साम्प्रतं देवतानां प्रसादेन]

(नेपथ्ये)

मामवधीर्य क्रोधात्
राघवमभ्यद्रवद्वाली ।
तेनैकेन शरेण
द्राङ्निर्भिन्नो विचेष्टते भूमौ ॥ -२००

CC-0TSarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

हनूमान् :- सौमित्रे, शृणोषि प्रियवचनं महाराजसुग्रीवस्य ?

लक्ष्मण :- प्रियात्प्रियतरं नः ।

सीता :- (त्रिजटामालिङ्ग्य) सहि, दाणिं उज्जीविदम्हि ।

[सखि, इदानीमुज्जीवितास्मि]

(पुनर्नेपथ्ये)

भो भो हनूमन्,

जाम्बवदङ्गदसहितो

दक्षिणककुभं प्रयाहि वेगेन ।

हनूमान् :- एष महाराजसुग्रीवः समादिशति ।

(पुनर्नेपथ्ये)

सीतामार्गणनिपुणः

समयानुगुणं त्वमवधेहि ॥ –२०१

लक्ष्मण :- एष चार्यो विशिष्य त्वामेव सन्दिशति । तदेहि । विजयिनमार्यं सम्भाव्य, त्वमार्याप्रत्ययजनकमभिज्ञानं किञ्चिदादाय, गमिष्यसि । (इति निष्क्रान्तौ)

विद्याधरौ :- (प्रविश्य) देवि, गन्धर्वराजस्य दनोः निदेशात् एतावदार्यरामभद्रचरितं रूपकविधया तावदावेदितासि । तदावां यथागतं गच्छावः (इति निष्क्रान्तौ)

हनूमान् :- अहो, संविधानवैदग्ध्यी गन्धर्वराजस्य ।

सीता :- हला, तिअडे, अज्जउत्तेण मह किदे महंतो खु किदो समारंभो । अवि णाम पवणसुदो दुरासदं साअरं उल्लंघिअ,

CC-0.TSarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

इद आअछइ । [हला, त्रिजटे, आर्यपुत्रेण मम कृते महान्खलु कृतस्समारम्भः । अपि नाम पवनसुतः दुरासदं सागरमुल्लंध्य इह आगच्छति]

त्रिजटा :- को संदेहो णं पवनसुदेत्ति तुए एव्व भणिदं [कः सन्देहः इदानीं पवनसुत इति त्वयैव भणितम्]

हनूमान् :- अयमेवावसरो ममात्मानं दर्शयितुम् । (इति सहसोपसृत्य)

रविसुतभृत्येन त्वं
राघवदूतेन वायुतनयेन ।
हनुमन्नाम्ना कपिना
सीतादेवि, प्रणम्यसे पदयोः ॥ –२०२

सीता :- सहि तिअडे अवि णाम सुमरिदो प्पच्चुवट्ठिदो एसो सो एव्व भवे, आदु रक्खसी कावि माया ? [सखि, त्रिजटे, अपि नाम स्मृतः प्रत्युपस्थितः एषः स एव भवेदथवा राक्षसी कापि माया ?]

त्रिजटा :- (विचिन्त्य) भद्दमुह, रक्खसविप्पलद्धाए मह सहीए तुइ संदेहो । तासे किंवि पच्चभिज्जाणं दंसिअ पच्चाएहि । [भद्रमुख, राक्षसविप्रलब्धाया मम सख्याः त्वयि सन्देहः । तस्मात् किमपि प्रत्यभिज्ञानं दर्शयित्वा प्रत्यापय]

हनूमान् :- बाढम्

रामेण प्रहितं तावदभिज्ञानाङ्गुलीयकम् ।
दृष्टपूर्वमिदं देवि पुनर्निर्वर्णयाऽधुना ॥ –२०३

(इत्यर्पयति)

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

सीता :- (गृहीत्वा, विलोक्य, सास्त्रं, सानन्दं) हला, एसा मुद्दिआ, मम पणिग्गहणसक्खिनी, मह किदे अज्जउत्तेण विप्पओअं पत्ता।
[हला, एषा मुद्रिका, मम पाणिग्रहणसाक्षिणी, मम कृते आर्यपुत्रेण विप्रयोगं प्राप्ता]

त्रिजटा :- हला, दाणिं णीसंसआ संभावेहिं साअदेण
[हला, इदानीं निस्संशया सम्भावय स्वागतेन]

सीता :- महाभाअ, साअदं दे। अवि कुसलं अज्जउत्तस्स।
[महाभाग, स्वागतं ते, अपि कुशलमार्यपुत्रस्य ?]

हनूमान् :- अथ किम्।

त्रीजटा :- भद्दमुह, अवि उद्धरिस्सदि इमादो संकटादो पिअसहिं रामभद्दो। [भद्रमुख, अपि उद्धरिष्यति अस्मात्सङ्कटात्प्रियसखीं रामभद्रः ?]

हनूमान् :- आर्ये,

उद्धरिष्यति रामस्त्वामिति चेत्कथयाम्यहम्।
पुनरुक्तं भवत्येतत् प्रत्यक्षं वीक्षितं यतः॥ —२०४

सीता :- हला, एदिना पेक्खिदं तं नाडअं। [हला, एतेन प्रेक्षितं तन्नाटकम्]

त्रीजटा :- अह किं [अथ किम्]

सीता :- महाभाअ, कदा खु तुमं एत्थ सण्णिहिदो ?
[महाभाग, कदा खलु त्वमत्र सन्निहितः ?]

CC-0.TSarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

हनूमान् :- देवि, अहमद्यैव सागरमुल्लंघ्य, निभृतमत्रभवतीं मृगयमाणो, दिष्ट्याऽत्र वने विलोक्य, तथा परिदूयमानां त्वामाश्वासयितुमुपक्रममाणः, तावदन्तरा विद्याधरप्रस्तुतं रूपकं प्रतिपालयन्नवहितोऽस्मि। तद्ब्रूहि, किं प्रतिवक्तव्यः स मया रामभद्रः।

सीता :- इदो वरं चिरकालं ण सक्कुणोमि जीविदं धारेदुं। ता उइदं करेहित्ति। [इतःपरं चिरकालं न शक्नोमि जीवितं धारयितुम्। तस्मादुचितं कुर्विति]

हनूमान् :- देवि, तदर्पय किमपि प्रत्यभिज्ञानं, येन तमाश्वास्य सत्वरं प्रापयामि।

सीता :- (वेणीमूलग्रथितं चूडामणिमुन्मुच्य) गेह्ण दाव एदं। [गृहाण तावदेतम्]

(हनूमान् गृहीत्वा, प्रणम्य, गन्तुमिच्छति)

(नेपथ्ये)

सिच्यन्तां गन्धसलिलैः परितो वनवीथिकाः।
दीपिकाभिः प्रदीप्ताभिः तमस्तोमोऽपनीयताम्॥ -२०५

(सर्वे सम्भ्रान्ताः कर्णं ददति)

त्रिजटा :- णं महाराओ एव्व आअछदि। [ननु महाराज एवागच्छति]

सीता :- (सभयं) भद्दमुह, तुमं दाव झत्ति ओसर। [भद्रमुख, त्वं तावत् झटिति अपसर]

हनूमान् :- (विचिन्त्य) भवतु, क्षणं विटपान्तरितो भूत्वा पश्यामि।

(इति तथा करोति)

[ततः प्रविशति रावणः]

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

रावण :-

सौन्दर्यमभिजात्यं च सीताया वीक्ष्य तादृशम् ।
उचितेष्वपि दारेषु न लभे सर्वथा रतिम् ॥ -२०६

(सीता विलोक्य, सोद्वेगं पराङ्मुखी तिष्ठति)

रावण :-

सुत्रामप्रमुखास्त्वपानतमुखाः सर्वेऽपि बर्हिर्मुखाः
वाञ्छन्तः खलु मत्कटाक्षविसरं सीदन्त्यनासाद्य तम् ।
इच्छत्येष स ते यदद्य सरसं साकूतमालोकनम्
तद्भाग्यं जनकस्य जानकि, निमेर्वंशस्य, कीर्तिश्च सा ॥
-२०७

सीता :- हा, राहव, कहं इमाइं एअस्स कण्णपसाइं वअणाइं सुणिअ, जीविस्सं ? [हा, राघव, कथमिमानि एतस्य कर्णपरुपानि वचनानि श्रुत्वा जीविष्यामि ?]

रावण :- कथमभिजातमपि मां नानुमन्यसे ? । तथाहि —

विधातुः प्रपौत्रं पुलस्त्यस्य पौत्रं
श्रुतं विश्रवस्सम्भवं वीरवीर्यम् ।
अनादृत्य मां त्वं क्वचिन्मर्त्यपाशे
रतिं हन्त रामे कथं वा बिभर्षि ॥ -२०८

हनूमान् :- किमतः ? यत्कलशजलधिसमुद्भवहलाहलः सकलमुद्रेजयति ।

सीता :- हद्धी, हद्धी, अज्जउत्तणिंदणं वि सुणिअ ण दीरीअदि मह हिअअं । [हा धिक् हा धिक्, आर्यपुत्रनिन्दनमपि श्रुत्वा न दीर्यते मम हृदयम्]

CC-0.TSarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

रावण :-

साम्प्रतं हृदयजेन निर्दयं
वज्रसारपरुषैः शिलीमुखैः ।
हन्यमानमविषह्यवेदनं
पाहि मामशरणं विलासिनि ॥ -२०९

(इति उपसर्पति)

सीता :- (किञ्चिदपसृत्य, तृणमन्तरतः कृत्वा) एत्थ विसए मंडोदरी एव्व तुह सरणं होदु । [अत्र विषये मन्दोदरी एव तव शरणं भवतु]

रावण :- तां च प्राज्यमिदं राज्यं त्वत्कृते सन्त्यजाम्यहम् ।

सीता :- (संस्कृतमाश्रित्य) दिष्ट्या, राघवबाणेन निहते त्वयि तत्तथा ॥ -२१०

हनूमान् :- देवि, सम्यगुक्तम् ।

त्रिजटा :- (स्वगतं) साहु सहि साहु । (प्रकाशं) णं माणणीओ एसो राआ । [साधु सखि साधु । ननु माननीयः एष राजा]

रावण :- (सक्रोधं) कथमेतावदनुनीतापि न त्यजत्यात्मकौटिल्यम् । तदेनां व्यापादयामि । (इति कोशात्खड्गमाकर्षति)

त्रिजटा :- महाराअ, खमेसु खमेसु । [महाराज, क्षमस्व, क्षमस्व]

हनूमान् :- (विमृश्य) न शक्या खलु साम्प्रतमुपेक्षितुं देवी ।
(इत्युपसृत्य)

रे निशाचरकुलाधम धिक् धिक्
वीर इत्यपि वहन्नभिमानम् ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

उद्धरन्नसिलतां वनितायां
लज्जसे न कथमीदृदपि त्वम् ॥ -२११

रावण :- (विलोक्य, ससंभ्रमं विचिन्त्य सप्रत्यभिज्ञं स्वगतं) अतिभीषणा कृतिर्दृश्यते । तत्किमयं पुरा मदपहसितः कैलासाधिवासी भगवानेव नन्दी ? (प्रकाशं) त्रिजटे, अपि जानासि कोऽयं जाल्म इति ।

त्रिजटा (स्वगतं) (विचिन्त्य) होदु, एव्वं दाव [भवतु, एवं तावत्] (प्रकाशं) महाराअ, ईदिसं अदिभीसणं रूवं दाणिं एव्व दिट्ठं ।
[महाराज, ईदृशमतिभीषणं रूपमिदानीमेव दृष्टम्]

हनूमान् :- (सावष्टम्भं) शृण्वेवं कथयामि ।
येन त्वमात्मभुजमूलनिबन्धिताङ्गः
तोनर्णवानपि पुरा परिघूर्णितोऽसि ।
तं निघ्नतः सवितृवंशवरस्य दूतं
मां मारुतात्मजमवेहि हनूमदाख्यम् ॥ -२१२

रावण :- (स्वगतं) कथमत्रापि रामदूतः ।

हनूमान् :- अपि च ।
सीताप्रवृत्तिमधिगन्तुमहं प्रपन्नः
तामत्र रामवचनात्परिसान्त्व्य भूयः ।
गच्छन्निमं त्वदनयं प्रसमीक्ष्य, देवीं
त्रातुं, भवन्तमपि दण्डयितुं निवृत्तः ॥ -२१३

रावण :- (सक्रोधावष्टम्भं) रेरे, वानरापसद, नन्वनेनैव असिना त्वामेव तावन्निहन्मि । (इति अभिपतति)

(प्रविश्य पटाक्षेपेण विभीषणः)

CC-0T Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

विभीषण :- आर्य विरम विरम साहसात् ।

नयविद्भिर्महाराज दूतवध्या विगर्हिता ।
निगृह्यतां बलादेष लाङ्गूलं चास्य दह्यताम् ॥ -२१४

रावण :- तद्र्यादिश्यन्तां अस्य निग्रहाय, राक्षसभटाः । (विमृश्य, जनान्तिकं) नन्वतिभीषणाकृतिरयं, अन्यैर्दुरासदः इव लक्ष्यते । तन्मौलेः किङ्करैस्समक्षकुमारं चादिश ।

विभीषण :- यदाज्ञापयत्यार्यः (इति निष्क्रान्तः)

सीता :- (स्वगतं) हा, कहं दाणिं [हा, कथमिदानीम्]

(नेपथ्ये कलकलः)

हनूमान् :- कथमेते समुद्धृतप्रहरणाः राक्षसभटाः मामेवाऽभिपतन्ति तदेतानेव निहन्मि (इति सीतां प्रणम्य, निष्क्रान्तः)

सीता :- महाभाअ, सव्वहा विअई होइ [महाभाग, सर्वथा विजयी भव]

रावण :- (विलोक्य) भग्नैरुपवनतरुभिः
मथितास्सर्वेऽपि किङ्कराः कपिना ।
(सकरुणमश्रूणि वर्तयन्) धावन्नक्षकुमारः
महता निहतश्च सौधशिखरेण ॥ -२१५

सीता :- दिट्ठिआ, उज्जीविदह्मि । [दिष्ट्या, उज्जीविताऽस्मि]

रावण :- (सविमर्शं) अहो, विक्रान्तिविलसितमस्य वानरापसदस्य । तत्कथमयं निगृह्येत ।

(नेपथ्ये)

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

रे रे शाखामृग, अति हि नाम प्रगल्भसे। तिष्ठ तावत्।
अहं ते दर्पमपनेष्यामि।

रावण :- (विलोक्य, सहर्षं) कथमयं वत्सो मेघनादः? स्वयमभि-
पतति। (निपुणं निरूप्य) साधु कृतं वत्सेन, यदयं

ब्रह्मास्त्रेण निगृह्यादौ संयतः शणरज्जुभिः।
किं च, दीपितलाङ्गूलः मुक्तः शाखामृगाधमः॥ –२१६

सीता :- हद्धी, हद्धी, का एत्थ पडिवत्ती [काऽत्र परिवर्तिः]
(स्वगतं, सप्रार्थनं, संस्कृतमाश्रित्य)

यदि राघवपादाब्जे दृढभक्तिरहं सदा।
वैश्वानर, ततस्सद्यः शीतो भव हनूमति॥ –२१७

रावण :- (सापहासं) अयि, मुग्धे,

प्राप्तः प्रवृत्तिमधिगन्तुमिह त्वदीयां
यस्तस्य, जानकि, दशा प्रसमीक्षिता हि।
हृष्टा भजेः सुतनु, मामधुना विनीतं
रामाधमागमविचारपराङ्मुखी त्वम्॥ –२१८

सीता :- एव्वं भासंतस्स तुह जीहा कहं ण विगलदि।
[एवं भाषमाणस्य तव जिह्वा कथं न विगलति]

(नेपथ्ये)

प्रदीपितेऽपि लाङ्गूले न मां दहति पावकः।
तदेनं तर्पयिष्यामि पुरागारैस्समन्ततः॥ –२१९

सीता :- पिअं मे, पिअं मे। [प्रियं मे, प्रियं मे]

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

त्रिजटा :- (स्वगतं) अहो, माहप्पं पदिव्वदाए।
[अहो, माहात्म्यं पतिव्रतायाः]

रावण :- (साश्चर्यं) पावकोऽपि न दहति नाम।

(नेपथ्ये)

अटता प्रतिगृहममुना
दीपितलाङ्गूलयष्टिना कपिना।
प्रापितजनतातङ्का
लङ्का दन्दह्यते परितः॥ –२२०

रावण :- कथमयं व्याहरति प्रहस्तः? मन्ये तस्यापि दुरासदोऽयम्। तदहमेव गत्वा निग्रहीष्यामि। (इति साटोपं निष्क्रान्तः)

सीता :- सहि, तिअडे, दाणिं का उण अवत्था पवणणंदणस्स?
[सखि, त्रिजटे, इदानीं का पुनरवस्था पवननन्दनस्य]

(नेपथ्ये)

निर्दह्य लङ्कां जनकात्मजायाः
क्षेमं विदित्वा मुदितोऽस्मदुक्त्या।
निर्वाप्य चैष ज्वलनं पयोधौ
प्राप्तो महेन्द्राचलमाञ्जनेयः॥ –२२१

त्रिजटा :- सहि, समस्सस, णं ताणं एव्व दणुप्पेषिताणं विज्जाहराणं वअणं सुणीअदि। [सखि, समाश्वसिहि, ननु तेषामेव दनुप्रेषितानां विद्याधराणां वचनं श्रूयते]

सीता :- (सहर्षं त्रिजटामालिङ्ग्य) हला, दाणिं णिव्वुदंह्मि।
[हला, इदानीं निर्वृतास्मि]

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

त्रिजटा :- (प्राचीमवलोक्य, साकूतं संस्कृतयाश्रित्य)
निर्भिन्दन्नरुणसखः तमस्समूहं
भव्याभिर्भुवमभिभासयन्प्रभाभिः :
आलिङ्गन्नपि च करेण पद्मिनीं द्राक्
पश्याऽयं सखि, समुदेति सप्तसप्तिः ॥ −२२२

सीता :- णं उवचिट्ठेमि भअवंतं कुलगुरुअं [एनमुपतिष्ठे भगवन्तं कुलगुरुम्]

त्रिजटा :- जं दे रुचइ [यथा ते रोचते] (इति निष्क्रान्तास्सर्वे)

॥ राघवाभ्युदये सान्तर्नाटिके पञ्चमोऽङ्कः ॥

॥ श्रीतारायै नमः ॥

॥ अथ षष्ठोऽङ्कः ॥

[ततः प्रविशति शची]

शची :- तामाश्वासयितुं दिवः प्रचलिता सीतामदृश्या सती
पश्यन्ती परितो निशाचरपुरीं सन्दृष्टपूर्वामपि ।
विष्वग्विश्लथदग्धगोपुरगृहप्रासादशृङ्गाटक-
न्यासत्वादवधारये कथमिमां सैवेति सम्प्रत्यहम् ॥
−२२३

अपि च
या लङ्कास्फुरितसुवर्णवप्रभासा
सावर्ण्यं निजमददात्पुराम्बुराशेः ।
सम्प्लुष्टा पवनसुतेन साम्प्रतं सा
सारूप्यं व्रजति तदम्भसाऽसितेन ॥ −२२४

(पुरोऽवलोक्य) (सविस्मयं)

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

सम्प्लुष्टेषु समन्तात्
एकं रक्षोगृहेषु कस्यैतत् ।
शारदचन्द्रज्योत्स्ना-
सप्रभमालोक्यते सदनम् ॥ -२२५

(सप्रत्यभिज्ञं) तदिदं विभीषणस्य । (सहर्षं)

दिष्टया स धर्मानुरोधी
दुर्नयप्रवृत्तं भ्रातरमपहाय ।
दीनानुकम्पिनं राघव-
मेव शरणयितुं प्रस्थितः ॥ -२२६

(पार्श्वतो विलोक्य) तदिदं दक्षिणेन रावणभवनं प्रमदवनम् ।

यत्र किल –

निर्भग्नेषु समन्तात्
अन्येष्वाभाति शिंशुपावृक्षः ।
संक्षिप्तेष्विव निखिले-
ष्वेकः कल्पक्षये भगवान् ॥ -२२७

तदियमेव साऽशोकवनिका । अत्रावतरामि । (इत्यवतरणं नाटयन्ती) (विलोक्य, सकरुणं) कथमियं सीता, मारुतिवृत्तान्तकुपितेन रावणेन, परितः शिंशुपातरुं, आरचय्य कमपि दुर्गमं प्राकारं, एकाकिन्येव स्थापिता । तदेनामात्मानं प्रदर्श्य सम्भावयामि ।

(इति निष्क्रान्ता)

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

॥ विष्कम्भः ॥

[ततः प्रविशति शच्या परिसान्त्व्यमाना सीता]

सीता :- भअवदि, कहं सो पवणसुदो अज्जउत्तस्स सविहं पत्तो भवे।
[भगवति, कथं स पवनसुतः आर्यपुत्रस्य सविधं प्राप्तो भवेत्]

शची :- (विमृश्य, स्वगतं) किमस्याः पुनः पुनः कथनेन। पश्यत्वेषा प्रत्यक्षमेव रघुपतिचरित्रम्। (प्रकाशं) वत्से, ददामि ते दिव्याञ्जनम्। अनेन सम्भाविताक्षी पश्य यथासमीहितम्।

सीता :- (सविमर्शं) भअवदि, अज्जउत्तविरहिदाए ण जुत्तं दाव अंजणधारणं। [भगवति, आर्यपुत्रविरहितायाः न युक्तं तावदञ्जनधारणम्]

शची :- वत्से, को दोषः। न ह्यस्य सम्प्रति रागतो धरणम्।

सीता :- जं भअवदि आणवेदि (इति अञ्जनधारणं नाटयन्ती, सहर्षाश्चर्यं) भअवदि, सव्वं वि भूमंडलं मह दाणिं पच्चक्खं एव्व संवुत्तं। ता किं एदिणा। अज्जउत्तप्पदेसं अहिकरिअ कहेहि।
[यद्भगवती आज्ञापयति। भगवति, सर्वमपि भूमण्डलं मम इदानीं प्रत्यक्षमेव संवृत्तम्। तस्मात्किमेतेन। आर्यपुत्रप्रदेशं अधिकृत्य कथय]

शची :- वत्से, इतस्तावदुत्तरेण

जाम्बवदङ्गदमुख्याः
मारुतिमाश्लिष्य हर्षसम्पन्नाः।
विदलितमधुवनतरवः
प्राप्ताः पश्य त्वमृश्यमूकाद्रिम्॥ -२२८

CC-0.TSarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

सीता :- (सहर्षं) अम्हो, तस्सिं एव्व गिरिसिहरे अज्जउत्तो वच्छ्ल-लक्खणो वि । [अहो, तस्मिन्नेव गिरिशिखरे आर्यपुत्रः वत्सलक्ष्मणोऽपि]
(सादरं रामं निर्वर्ण्य, संस्कृतमाश्रित्य]

पूर्वं प्रावृड्जलधररुचिः स्निग्धगल्लाभिरामः
पीनोरस्को विपुलनयनो मांसलांसः प्रसन्नः ।
यस्सन्दृष्टो जनकनगरे मत्कृते सोऽधुनाऽयम्
सर्वेष्वङ्गेष्वहह गमितो मन्युना वैपरीत्यम् ॥ -२२९

(इति मूर्च्छति)

शची :- वत्से, समाश्वसिहि समाश्वसिहि ।

सीता :- (समाश्वस्य) भअवदि, तत्थ अज्जउत्तसमीवे को वि वाणरो दीसदि । णं सो एव्व सुग्गीवो भवे । [भगवति, तत्र आर्यपुत्रसमीपे कोऽपि वानरो दृश्यते । नूनं स एव सुग्रीवो भवेत्]

शची :- अथ किम् ।

सीता :- पेक्ख, पेक्ख, कहिदम्हदारप्पवुत्ती सो मारुदी हरिसपप्फुल्लरो-मंचेण अज्जउत्तेण आलिंगिदो [पश्य, पश्य, कथितास्मद्दारप्रवृत्तिस्स मारुतिः हर्षप्रफुल्लरोमाञ्चेन आर्यपुत्रेण आलिङ्गितः]

शची :- (स्वगतं)

व्ययन्तपारायणशीलिनो बुधाः
सन्दर्शनं यस्य भजन्ति वा न वा ।
तेनोपगूढः स्वयमद्य मारुतिः
तपोविपाकस्तदमुष्य तादृशः ॥ -२३०

(प्रकाशं) पश्यामि वत्से, पश्यामि ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

सीता :- कहं अज्जउत्तो किं वि पवणसुदकहिदं सुणिअ अस्सूणि मुंचंतो दीसइ । [कथमार्यपुत्रः किमपि पवनसुतकथितं श्रुत्वा अश्रूणि मुञ्चन् दृश्यते]

शची :- वत्से, किमत्र चित्रम् ?

शृण्वति समावस्थां ते
पश्यति चूडामणिं च रामेऽस्मिन् ।
दैन्यं शोको मोहः
सहसा युगपत्समाविशन्त्यधुना । -२३१

सीता :- हद्धी, हद्धी, कहं पुणो पुणो वि अज्जउत्तस्स आआसकारिणी होमि । [हा, धिक्, हा धिक्, कथं पुनः पुनरपि आर्यपुत्रस्यायासकारिणी भवामि । (इति निःश्वसिति)

शची :- वत्से,

लक्ष्मणविहिताश्वासः
सुग्रीवनीतवानरानीकम् ।
कर्षन्मुदितश्चलितः
त्वामुद्दिश्यायमग्रतः पश्य ॥ -२३२

सीता :- कहं पत्तो एव्व महंतेण अणीएण साअरतडं ।
[कथं प्राप्त एव महतानीकेन सागरतटम्]

शची :- (विलोक्य)

पृतनाम्बरवारिधीन्मुहुः
मुहुरालोकयतां मनीषिणाम् ।
इयदेतदिति क्षमं भव-
त्यधिगन्तुं न कदापि मानसम् ॥ -२३३

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

सीता :- (सवितर्कं) कहं दाणिं एसा सेणा साअरं उल्लंघिस्सदि ?

[कथमिदानीमेषा सेना सागरमुल्लङ्घयिष्यति ?]

शची :- समारम्भः कृतस्तावदियान् दैवेन येन ते ।

तदेवाग्रे शुभं सर्वं घटयिष्यति भामिनि ॥ -२३५

सीता :- (सभयं) को उण एसो वाणरसमाजे कदिपयेहिं रक्खसेहिं रक्खसो दीसइ ? । [कः पुनरेष वानरसमाजे कतिपयैः राक्षसैः राक्षसो दृश्यते ?]

शची :- अनुजः खल्वयं विभीषणो रावणस्य ।

अपनयमपहाय भ्रातरं न्यायवादी

शरणमधिगतोऽसौ राघवं धर्मशीलम् ।

तदनु समनुकम्पात्स्निग्धचित्तेन तेन

द्रुततरमभिषिक्तो रक्षसामाधिपत्ये ॥ -२३६

सीता :- (ससम्भ्रमं) संपदं अज्जउत्तो समुद्दप्पदीरे कुससअणे सइदो दीसइ । [साम्प्रतमार्यपुत्रः समुद्रप्रतीरे कुशशयने शयानः दृश्यते]

ता एत्थ किं णिमित्तं भवे ? [तस्मादत्र किं निमित्तम् भवेत् ?]

शची :- (विभाव्य, स्वगतं)

मध्येसमुद्रमधिशय्य भुजङ्गराजं

योऽसौ पुराऽभजत तादृशयोगनिद्राम् ।

शेते स दर्भशयनेऽद्य तटे पयोधेः

कालोचितं चरति हन्त महेश्वरोऽपि ॥ -२३७

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

(प्रकाशं)

मार्गं याचितुकामः
सागरमभ्येति राघवश्शरणम् ।
कृच्छ्रे महति शरण्याः
महतां, लोके महान्तो हि ।। —२३८

सीता :- (सनिःश्वासं, स्वगतं संस्कृतमाश्रित्य)

मम भुजमुपधानीकृत्य पर्यङ्कपृष्ठे
शयनमुचितमेतद्यस्य ते स त्वमद्य ।
निजभुजमुपधाय क्ष्मातले दर्भशय्यां
बत कथमधिशेषे, धिग्विधेर्वैपरित्यम् ।। —२३९

(प्रकाशं) भअवदि, पेक्ख पेक्ख, झत्ति उट्ठिदो किं वि आलपंतो धणू गेह्णिअ पुरदो पट्ठिदो एव्व अज्जउत्तो ।
[भगवति, पश्य, पश्य, झटित्युत्थाय किमपि आलपन्, धनुर्गृहीत्वा पुरतः प्रस्थित एवार्यपुत्रः]

शची :- विहिताऽवमतिं पयोधिमेषः
स्वशरासारकृशानुपीततोयम् ।
प्रतिज्ञाकलितान्तरो विधातुं
चलितस्सम्प्रति पश्य रामभद्रः ।। —२४०

सीता :- को उण एसो दसणीअदेहसोभग्गो मज्झेसमुद्दं दीसइ ? ।
[कः पुनरेष दर्शनीयदेहसौभाग्यः मध्येसमुद्रं दृश्यते]

शची :- दहन्तमिव मन्युना जगदशेषमभ्यागतं
शरादृतधनुष्करं समवलोक्य रामं भयात् ।

CC-0 Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

जवोच्चलितवीचिसञ्चलितनक्रचक्राकुलं
विभिद्य जलमुत्थितः सपदि मूर्तिमानम्बुधिः ॥
—२४१

सीता :- कहं सो ण दीसइ साअरो, मुत्तो साअरो अज्जउत्तेण ?
[कथं स न दृश्यते सागरः ? मुक्तस्सागरः आर्यपुत्रेण]

शची :- (व्यानना‍टितकेन)
"बद्धं सेतुमहं नलेन बिभृयां, त्वं याहि तेनाधुना
केचिद्दाशगणा वसन्ति, सलिलं मे दूषयन्तश्चिरात् ।
तेष्वेतं विसृजाऽऽशु सायक"मिति प्रह्वस्य वार्द्धेर्वचः
श्रुत्वा, दाशरथिस्तथैव, हतवानन्तर्हितश्चाम्बुधिः ॥
—२४२

वत्से, पश्य पश्य,

सन्देशाद्वातसूनोर्हरिवरनिकरैः क्ष्वेडितस्फोटिताशैः
उन्मूल्योन्मूल्य, वेगाद्गिरितटनिवहान्पातितानब्धितीरे ।
आदायादाय, दोर्भ्यां पटुरधिसलिलं सूत्रविन्यासपूर्वं
सेतुं त्वष्टस्तनूजो रचयति नितरामायतं विस्तृतं च ॥
—२४३

सीता :- (विलोक्य) (सहर्षं) णं बद्धो खु णलेण सुवेलसिहरं जाव महंतो सेदू । पत्थिदो अ महंतेण हरिसेणेण अज्जउत्तो ।
[ननु बद्धः खलु नलेन सुवेलशिखरं यावत् महान् सेतुः । प्रस्थितश्च महत्या हरिसेनया, आर्यपुत्रः]

शची :- पश्य, निवेशितश्च स्कन्धावारो दक्षिणेन समुद्रं रामभद्रेण ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

सीता :- आम भअवदि आम । [आम् भगवति आम्]

शची :- प्रासादमधिरूढो दशकन्धरः शुकसारणाभ्यां कथ्यमानं पश्यति वानरबलम् ।

सीता :- एसो वि अज्जउत्तो अहिरूढो सुवेलगिरिसिहरं साणुओ वाणररक्खसपदीहिं समं पेक्खदि लंकाणअरं ।
[एषोऽप्यार्यपुत्रः अधिरूढः सुवेलगिरिशिखरं, सानुजः वानरराक्षसपदातिभिस्समं प्रेक्षते लङ्कानगरम्]

शची :- अद्रेरुत्प्लुत्य वेगाद्दशवदनमभिप्रस्थितो वानरेन्द्रः
सौधादाकृष्य दोर्भ्यां क्षितितलविलुठच्छत्रमौलिं च कृत्वा ।
रुष्टः पादावघातस्रवदसृगनुलिप्तोत्तमाङ्गस्य तस्य
ज्ञात्वा छद्मप्रवृत्तिं रघुपतिसविधं पश्य तूर्णं प्रयाति ॥
–२४४

सीता :- साहु वाणरराअ साहु । [साधु वानरराज साधु]

शची :- एते गवाक्षगजजाम्बवदाञ्जनेय-
नीलाङ्गदद्विविदमैन्दसुषेणमुख्याः ।
अभ्यापतन्ति रभसादधुनाऽधिरोढुं
प्राकारमुच्छ्रिततरं प्लवगप्रवीराः ॥ –२४५

सीता :- रक्खसा वि अहिजुज्जंदि । [राक्षसा अपि अभियुज्यन्ते]

शची :- यूपाक्षत्रिशिरोमहोदरमहापार्श्व क्रतुध्वंसक-
त्सम्पातिप्रघसप्रजङ्घपनसप्रेष्ठास्समस्ता अपि ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

विज्ञायापततः प्लवङ्गमभटान् रक्षःपतेराज्ञया
निर्गच्छन्त्यधुना निशाचरभटाः पश्योन्नदन्तः पुरात् ॥
-२४६

सीता :- मिलिदा खु दुवे वि सेणाओ, होदु विअओ वाणरसेणाए।
[मिलिते खलु द्वे अपि सेने, भवतु विजयो वानरसेनायाः]

शची :- ननु विजिता एव वानरै राक्षसाः। एष हि –
धनुरटनिदत्तबाहुः
विजयी रामः प्रसन्नवदनेन्दुः।
विनिहतवैरिप्रवरान्
सम्भावयति प्लवङ्गमान् पश्य ॥ -२४७

सीता :- (सहर्षकौतुकं पश्यन्ती) आम् भअवदि आम्
[आम् भगवति आम्]

शची :- विहितं वानरवीरैः
महदिदमाकर्ण्य रक्षसां निधनम्।
प्राप्तः पृतनाधीशः
नीलेन हतः प्रहस्तनामाऽयम् ॥ -२४८

सीता :- (ससंभ्रमं) के एदे दुवे भीसणमहुण्णदसरीरा णअरादो णिग्गच्छिअ जुज्झंदि। [कावेतौ द्वौ भीषणमहोन्नतशरीरौ नगरतः निर्गत्य युध्येते]

शची :- सरभसमतिकायकुम्भकर्णौ
कपिपृतनामवमर्द्य दाशरथ्योः।
शरनिकरकृशानुहेतिषु द्राक्
शलभदशामवलोकय प्रपन्नौ ॥ -२४९

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

सीता :- (पार्श्वतो विलोक्य) को दाणिं लंकाए णादिदूरे रक्खसो जण्णं कुणइ ? । [क इदानीं लङ्कायाः नातिदूरे राक्षसः यज्ञं करोति ?]

शची :- (विलोक्य) हन्त, प्रमादः प्रमादः ।

अयमिह दशवक्त्रस्यात्मजो मेघनादः
रिपुजयमभिकाङ्क्षन् यष्टुमद्य प्रवृत्तः ।
यदि सवनसमाप्तिर्दुर्जयो निर्जरैर-
प्यहह कथमिदानीं स्यादमुष्याऽन्तरायः ।। -२५०

सीता :- किं एत्थ करणिज्जं । [किमत्र करणीयम् ?]

शची :- (पुरो विलोक्य, सहर्षं) अयं हि विभीषणः -

विज्ञाप्य रामाय मखप्रवृत्तिं
आदाय सौमित्रिमधिज्यचापम् ।
चमूं प्रकर्षन्महतीं कपीनां
प्रयाति मार्गेण निकुम्भिलायाः ।। -२५१

सीता :- णं पत्तो एव्व णिकुंभिलं । [ननु प्राप्त एव निकुम्भिलाम्]

शची :- विभीषणस्य तत्कर्म विज्ञाय च विनिन्द्य च ।
असमाप्तक्रतुः क्रोधाद्युध्यते रावणिस्स्वयम् ।। -२५२

अपि च,

क्रुद्धः सेनावमर्दाद्द्रुतमभिचलितः सङ्गतो लक्ष्मणेन
छिन्नच्छत्रध्वजाश्वः समरभुवि, तथाप्येष तिष्ठन्पदातिः ।
बाणैस्सञ्छाद्य विष्वग्दिवसकरमभिव्यञ्जयन्नन्धकारं
धीरो गत्वाशु लङ्कां, पुनरपि सरथः सङ्गरायाऽभियातः ।। -२५३

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

सीता :- वट्ठदि दाणिं एदाणं समरसंरंभो ।

[वर्धत इदानीमेतयोः समरसंरम्भः ।]

शची :- प्रायेण सौमित्रिः, ऐन्द्रमस्त्रमभिसन्दधाति ।

सीता :- (सप्रार्थनं, संस्कृतमाश्रित्य)

धर्मात्मा सत्यसन्धश्च रामो दाशरथिर्यदि ।

पौरुषे चाऽप्रतिद्वन्द्वः शरैनं जहि रावणिम् ।। -२५४

शची :- (सहर्षं) पश्य, पश्य \

पातितः शरवरेण सुमित्रा-

नन्दनेन बत रावणिदेहात् ।

मस्तको विमलकुण्डलभाभिः

भासयत्यवनिमण्डलमेषः ।। -२५५

सीता :- पिअं, पिअं । [प्रियं, प्रियम्]

शची :- दिष्टया, जयेन महता महितं प्रपन्नं

आलिङ्ग्य, गाढमनुजं दयितस्तवायम् ।

सम्भाव्य, तावपि विभीषणवायुपुत्रौ

जातस्तवाऽधिगमनिश्चयहृष्टचेताः ।। -२५६

क्रुद्धोऽनुजात्मजवधाद्रजनीचरवल्लभः ।

निर्याति स्वयमेवायं सङ्गराय मदोद्धतः ।। -२५७

सीता : कहं एसो अप्पपरिवारो एव्व गच्छदि । ता मण्णे सव्वे वि रक्खसा णिहदा । [कथमेषः अल्पपरिवार एव गच्छति । तेन मन्ये सर्वेऽपि राक्षसा निहताः]

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

शची :- कतिपयरजनीचरप्रवीरैः
परिवृत एष रणे निशाचरेन्द्रः ।
उषसि हिमकरः प्रकाममल्पैः
उडुभिरिवाद्य यथापुरं न भाति ॥ -२५८

अपि च,

कपिभटवारिदमुक्तं
गिरितरुसङ्घातवर्षमुच्चण्डम् ।
उत्सार्य बाणपवनैः
पश्याऽभिद्रवति रावणो रामम् ॥ -२५९

सीता :- कहं रहट्ठिदेण रक्खसेण भूमिट्ठिदस्स राहवस्स जुद्धव्वावारो ।
[कथं रथस्थितेन राक्षसेन भूमिस्थितस्य राघवस्य युद्धव्यापारः ?]

शची :- पश्यायमस्मदार्यपुत्रप्रहितो रथो मातलिना रामभद्राय उपनीतः ।

सीता :- साहु भअवं महेंद साहु । [साधु भगवन्महेन्द्र साधु]

शची :- सम्प्रेक्षितुं सङ्गरमाशरेन्द्र-
नरेन्द्रयोस्सम्प्रति पश्य सर्वे ।
विधातृवृत्रारिपुरारिमुख्याः
देवा विमानैर्द्रुतमापतन्ति ॥ -२६०

सीता :- (ससंभ्रममूर्ध्वमवलोक्य) कस्स वा एदे मत्थआ उड्डीयंदि ?
[कस्य वा एते मस्तकाः उड्डयन्ते ?]

शची :- (विहस्य) वत्से, रावणस्यैव मूर्धानः ।
सम्प्राप्ताः सैंहिकेया बहव इति भृशं भीषयन्तो दिनेशं
केचिद्बाणैर्निकृत्ता गगनतलममी तूर्णमभ्युत्पतन्ति ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

न छिन्ना एव सम्प्रत्यहह, कथमिति भ्रान्तिमुत्पादयन्तः
चित्ते रामस्य, केचित्पुनरपि युगपत्प्रोत्थिताश्छिन्नमात्राः ॥
-२६१

सीता :- (सविषादं) कहं संछिछ्न्ना अवि मत्थआ पुणो पुणो उब्भवंति ।
[कथं सञ्छिन्ना अपि मस्तकाः पुनः पुनः उद्भवन्ति]

शची :- वत्से, मा विषदः । पश्य, तावदस्त्रयुद्धकौशलं महावीरयोः ।
धूमस्तोमस्थगितगगनाभोगदिक्चक्रवालं
ज्वालाजालैर्झटिति विशदीकुर्वदुर्वीतलं च ।
आग्नेयास्त्रं रघुपतिधनुर्मुक्तमुज्जृम्भमाणं
मुञ्चत्येतद्दशमुखरथे घोरमङ्गारवर्षम् ॥ -२६२

सीता :- एसो वि रक्खसहदओ पेक्ख, निमीलितलोअनो वट्टइ ।
[एषोऽपि राक्षसहतकः पश्य, निमीलितलोचनो वर्तते]

शची :- उच्चैस्ततस्स्तनितपूरितदिग्विभागं
उच्चण्डताण्डवनशौण्डशिखण्डिखण्डम् ।
विद्युच्छटाच्छुरितवारिदवारिताग्नि
रक्षःप्रभोर्धनुषि दीव्यति वारुणास्त्रम् ॥ -२६३

सीता :- दाणिं अज्जउत्तो वि किं वि चिंतेदि ।
[इदानीमार्यपुत्रोऽपि किमपि चिन्तयति]

शची :- उन्मूलितः क्ष्मारूहशैलभृङ्गं
उत्सारिताशेषपयोदचक्रम् ।
उद्घूर्णयद्रावणचक्रयानं
उज्जृम्भते राघवपावनास्त्रम् ॥ -२६४

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

सीता :- साहु अज्जउत्त साहु । [साध्वार्यपुत्र साधु]

शची:- इतश्च, निपीतपवनं विष्वगुद्गीर्णगरलानलम् ।
प्रयुक्तं राक्षसेन्द्रेण पन्नगास्त्रं विजृम्भते ॥ –२६२

अपि च, पश्य,

शाणोल्लीढासिधारानिशितनखमुखालूनपीनायतांसं
चञ्च्वा व्याकृत्तकण्ठं गरुदवदलितस्यन्दनं पङ्क्तिकण्ठम् ।
प्राप्तः किं वा जटायुः पुनरपि सहसा भीषयत्खण्डिताहि-
व्रातं वेगेन रामप्रहितमिदमिहोऽस्जृम्भते गारुडास्त्रम् ॥
–२६३

सीता :- भअवदि, कहं दाणिं वि ण णिहदो ? ।
[भगवति, कथमिदानीमपि न निहतः ?]

शची :- (सहर्षं) पश्य, वत्से, रामेण हि –

सूतप्रार्थनया प्रयुक्तमधुना ब्रह्मास्त्रमुद्यत्प्रभैः
शस्त्रास्त्रैर्बहुधा निवारितमपि क्रव्यादभर्त्राऽमुना ।
दग्ध्वा तानि विभिद्य तस्य रभसाद्विस्तारिवक्षस्तटं
तूर्णं तूणमुखं प्रविष्टमखिलानानन्दयन्निर्जरान् ॥ –२६४

सीता :- (निपुणं निरूप्य, सहर्षं) कहं णिवडिदो एव्व महीअले । दिट्ठिआ, उज्जीविदह्मि । [कथं निपतित एव महीतले । दिष्ट्या, उज्जीविताऽस्मि] (इति प्रमोदाश्रुक्षेपणं नाटयन्ती, पुनर्निर्वर्ण्य, ससंभ्रमम्) अच्चरिअं, अच्चरिअं । कहं अज्जउत्तचरिदं पेक्खंदी एव्व संपदं ण पेक्खामि । [आश्चर्यं, आश्चर्यम् । कथमार्यपुत्रचरितं पश्यन्ती एव साम्प्रतं न प्रेक्षे]

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

शची :- वत्से, प्रमोदाश्रुक्षेपणेन क्षालितमिव ते नयनाद्दिव्याञ्जनम्

(नेपथ्ये)

अत्रेदानीम् ,

या रथ्या रजनीचरैर्निबिडितास्ताः पूरिता वानरैः
यस्सालश्चलकेतनैरुपचितः सोऽयं शरैरावृतः ।
गीतं यत्र गृहे गृहे मृगदृशां, तत्रोच्चकैः क्रन्दनं
सर्वोऽयं रघुवंशवर्धनधनुर्ध्वानप्रभावोदयः ॥ -२६५

शची :- स एष हनूमानिव व्याहरति ।

[ततः प्रविशति हनूमान्]

हनूमान् :- (सप्रणामं)

कृतरिपुनिधनः प्रहृष्टचेताः
निशिचरवानरनाथसन्नुतश्रीः ।
अनुजविरचितानुरूपवादः
रघुपतिरिच्छति देवि, दर्शनं ते ॥ -२६६

सीता :- (सानन्दं) दिट्ठिआ, तुह आआसो सहलो । ता दाणिं जह एत्थ भअवदी आणवेदि । [दिष्ट्या, तव आयासस्सफलः । तेन, इदानीं यथात्र भगवती आज्ञापयति]

शची :- (सहर्षं)

कमला कमलेक्षणेन, वाणी
विधिना, शैलपतेस्सुता शिवेन ।
मिलिता मुदिता यथा बभूवुः
भव रामेण तथा त्वमद्य सीते ॥ -२६७

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

सीता :- (विचिन्त्य) (संकृतमाश्रित्य)

एतावन्तमनेहसं निशिचरागारोषितां मामयं
प्रत्येतु प्रथमं विशुद्धहृदयां हन्तार्यपुत्रः कथम् ? ।
विस्रम्भाद्यदि शङ्कते न स पुनः, शङ्केत सर्वो जनः
तद्द्यामनले विशुद्धिमधुना पश्यत्सु लोकेष्वहम् ॥
–२६८

हनूमान् :- शान्तं पापं, शान्तं पापम् । देवि, किमिदमसम्भावनीयमेव सम्भावयसि ।

शची :- मारुते, मामैवम् । युक्तमुक्तं वत्सया दीर्घदर्शिन्या ।

सीता :- ता, हनूमं, झत्ति गदुअ उज्जोलेहि अज्जउत्तस्स णादिदूरे पावअं । [तस्माद्धनूमन्, झटिति गत्वा उज्ज्वलय आर्यपुत्रस्य नातिदूरे पावकम्]

हनूमान् :- यदाज्ञापयति देवी (इति निष्क्रान्तः)

(शचीसीते उत्थाय परिक्रामतः)

सीता :- भअवदि, रणभूमीं एव्व संपत्तह्मो ।
[भगवति, रणभूमिमेव सम्प्राप्ते स्वः]

शची :- (पुरो विलोक्य)

प्रदक्षिणाभिर्ज्वालाभिः परितो गगनाङ्गणम् ।
पश्यैष कपिशीकुर्वन् समिद्धो हव्यवाहनः ॥ –२६९

सीता :- अह्मो, मह अग्गिप्पवेसो अज्जउत्तस्स संमदो एव्व । जं सविहगदं वि मं ण पुलोएदि । ता झत्ति जहसमीहिदं

CC-0.TSarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

करिस्सं। (अह्मो, ममाग्निप्रवेशः आर्यपुत्रस्य सम्मत एव। यत्सविध-गतामपि मां न विलोकते। तस्मात् झटिति यथासमीहितं करिष्यामि)
(इति उपसृत्य, साञ्जलिपुटं, संस्कृतमाश्रित्य)

रुद्रादित्यमरुद्वसुप्रभृतयः सर्वे सुराणां गणाः
गन्धर्वाप्सरसः क्षमाजलनिधिद्यावः क्षपावासरौ।
एते मामधुना विलोक्य दहने दीप्ते, विशन्ती"मियं
शुद्धैवेत्यवधारयन्तु" तदनु, प्रत्येतु रामस्स्वयम्॥ -२७०

यावत्प्रविशामि। (इति निष्क्रान्ता)

शची :- (विलोक्य, सविस्मयं) अहो, साहसमस्याः। प्रविष्टैव खलु वैश्वानरमियम्। कथं पश्यन्नप्येनामुपेक्षते रामभद्रः ?

(नेपथ्ये)

स्वं धन्यं मनुते स ते कुलगुरूः लब्ध्वा वधूरीदृगि-
त्यात्मानं पृथिवी यया तनयया पूतं सदा मन्यते।
किं च प्रोज्झितकिल्मषोऽहमधुना स्पर्शादिदःपादयोः
तत्त्वं स्वीकुरू रामभद्र, दयितामाजानशुद्धामिमाम्॥
-२७१

शची :- कथमयं वैश्वानरः स्वयमेव सीतामादाव रामायार्पयति। सन्निहितश्चात्र, विरिञ्चिप्रभृतिभिः सुरगणैस्समं आर्यपुत्रः। तदहमपि तत्समीपं गच्छामि। (इति निष्क्रान्ता)

[ततः प्रविशति रामः सीता लक्ष्मणश्च]

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

राम :- कल्याणि, दिष्ट्या, वर्धसे ।

[सीता सलज्जमधोमुखी तिष्ठति]

राम :- (स्वगतं) अहो, महिमा पातिव्रत्यस्य ।

माल्यानि तानि तिलकश्च स एव भाले

तच्चांशुकं स च पुनस्सरसाङ्गरागः ।

अस्या विशुद्धमनसस्तदिदं समस्तं

नैवाऽभजद्विकृतिमग्निसमुत्थितायाः ॥ -२७२

(आकाशे)

जगत्पते, रामभद्र, जय जय,

यार्या वेदवती पुरा कृतयुगे तेपे तपो दुश्चरम्

सैवैषा मिथिलाधिराजतनया सीता तव प्रेयसी ।

विष्णुस्त्वं च सनातनः स भगवान् त्रातुं त्रिलोकीमिमां

सम्भूतोऽसि मनोः कुले, दशमुखं हत्वा कृतार्थोऽसि च ॥
-२७३

लक्ष्मण :- आर्य, पश्यायं ब्रह्मपुरोगैर्देवैस्समेतः कात्यायनीकान्तो भगवानिन्दुशेखरः सम्भावयति ।

राम :- (सप्रश्रयं) दाशरथी रामो वः प्रणमति ।

(पुनराकाशे)

स्थित्वा मम विमानेऽस्मिन् पिता दशरथस्तव ।

त्वां द्रष्टुमागतो राम तमेनमभिवादय ॥ -२७४

लक्ष्मण :- कथमयं व्याहरति पुलोमजापरिवृढः ।

राम :- प्रिये, पश्यैते महेन्द्रस्यार्धासने निषण्णास्तातपादाः ।

तदेतानभिवादयामहे । (इति सर्वे प्रणमन्ति)

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

(पुनराकाशे)

द्रष्टुं दशरथो राजा तवोद्वाहाऽभिषेचने ।
विमानेन त्वया सार्धमयोध्यां गन्तुमिच्छति ॥ —२७५

राम :- (सहर्षं, स्वगतं) कथं मदभीप्सितमेवाह भगवान्महेन्द्रः (प्रकाशं) भगवन् , अनुगृहीतोऽस्मि ।

(नेपथ्ये)

राज्ञा दशरथेनेदं समधिष्ठितमग्रतः ।
आरोहणं, विमानं ते राम, काङ्क्षति पुष्पकम् ॥ —२७६

लक्ष्मण :- आर्य, सन्निधापितपुष्पविमानोऽयं व्याहरति विभीषणः । तदेनमारोहत्वार्यः समीहितसाधनाय ।

राम :- तथा (इति परिक्रम्य, निष्क्रान्तास्सर्वे)

॥ इति षष्ठोऽङ्कः ॥

*

॥ अथ सप्तमोऽङ्कः ॥

(नेपथ्ये)

प्राप्तः पङ्क्तिरथः स्वकीयनगरीं आहूय सीरध्वजं
तत्कन्याभिरथाध्यवस्य भरतादीनां विवाहोत्सवम् ।
सम्प्रत्येष वसिष्ठकौशिकशतानन्दादिभिः संवृतः
रामोद्वाहमहोत्सवाय चलितः कल्याणवेदीं प्रति ॥—२७७

(चूलिका)

[ततः प्रविशति कल्याणवेदीं गतो रामः वसिष्ठादयश्च]

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

दशरथ :- (रामं निर्वर्ण्य, स्वगतं)

उद्वाहोचितवेषहृद्यवपुषं वध्वा समं राघवं
रम्यां कौतुकवेदिकामधिगतं निर्वर्णयामीत्यसौ ।
सञ्जाताङ्कुर एव वाञ्छिततरुः प्रत्यूहदावाहतः
सिक्तः सम्प्रति भागधेयसुधया जातः फलायोन्मुखः ।।
–२७८

(प्रकाशं) (जनकं प्रति) महाभाग, सीरध्वज, किमधुना विलम्ब्यते? प्रवर्त्यतां तावत्पाणिग्रहणविधिर्वत्सयोः ।

जनक :- (सहर्षं)

तव देववचस्सुधाभिषेकात्
शिशिरं सम्प्रति यादृगान्तरं मे ।
अभवन्न कदाचिदीदृगेत-
न्निगमान्तामृतचूर्वणादपि प्राक् ।। –२७९

वसिष्ठविश्वामित्रौ :- (अन्योन्यं प्रति) चिराभिलषितः प्रस्तुतः खल्वनयोस्सम्बन्धिनोः उचितव्याहारः ।

जनक :- (नेपथ्याभिमुखमवलोक्य) चन्द्रलेखे, गृहीतविवाहनेपथ्यां वत्सां सीतां सम्प्रति सत्वरं प्रवेशय । भगवन् आङ्गिरस, प्रवर्त्यतां प्रकृतो मङ्गलविधिः ।

[शतानन्दः "तथे"ति मङ्गलविधिप्रयोगं नाटयति]

[ततः प्रविशति सीता सखी च]

सीता :- (सहर्षकौतुकं) हला, गहिदवररवेसो अज्जउत्तो अहिअदरं सोहदि । [हला, गहीतवरवेषः आर्यपुत्रः अधिकतरं शोभते]

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

चन्द्रलेखा :- एसा वि गहिदवहूवेसं होदिं वि एव्वं मण्णेदि ।
[एषोऽपि गृहीतवधूवेषां भवतीमपि एवं मन्यते]

[सीता लज्जावनतवदना जनकमुपसरति]

राम :- (सीतां निर्वर्ण्य, स्वगतं)
वसाना माञ्जिष्ठं निटिलधृतकाश्मीरतिलका
रजोभिर्हारिद्रैः ललितमनुलिप्ताङ्गलतिका
जगन्माङ्गल्यश्रीरिव तनुमतो काप्यनुपमा
समागच्छत्येषा मम सदनभूषाऽद्य निकषा ॥ -२८०

जनक :- (सीतां हस्ते गृहीत्वा, राममुपसृत्य)
दत्ता मयाद्य सीतेयं पाणिं गृहाणीष्व पाणिना ।
त्रिवर्गे राम सौवर्गे नातिचारीदमूं भवान् ॥ -२८१
(इति सीताया हस्तं रामहस्तेऽर्पयति)

राम :- (स्वगतं) कथमात्मानमपि कश्चिदतिचरिष्यति ?
(सविनयलज्जं सीताकरमालम्बते)

चन्द्रलेखा :- (जनान्तिकं) हला, दिट्ठिआ वट्ठसि ।
[हला, दिष्ट्या, वर्धसे]

राम :- (सीतायाः करं निर्वर्ण्य, स्वगतं)
गृहीतो यः पूर्वं चकितचकितं कुञ्जसदने
स एवायं पाणिः नवकिसलयोल्लाससुभगः ।
इदानीं सानन्दं जनकधरणीन्द्रेण विधिवत्
वितीर्णो विस्रम्भं कमपि जनयन्मोदयति माम् ॥
-२८२

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

सीता :- (स्वगतं) ओलंबिदे मह पाणिपल्लवे अज्जउत्तेण, उम्मीलंदि मह अंगेसु पुलआ। [अवलम्बिते मम पाणिपल्लवे आर्यपुत्रेण, उन्मीलन्ति ममाङ्गेषु पुलकाः]

राम :- (स्वगतं)

इदमद्य वपुर्मदङ्गसङ्गात्
पुलकैः पुङ्खितमम्बुजेक्षणायाः ।
प्रसमीक्ष्य ममापि गात्रमेतत्
यतते तच्छनकैरिवाऽनुकर्तुम् ॥ –२८३

[ततः प्रविशति पटाक्षेपेण अष्टावक्रः]

अष्टावक्र :- (वसिष्ठादीन्प्रणम्य, जनकदशरथौ प्रति) सोत्थि होदु संबंधीणं [स्वस्ति भवतु सम्बन्धिभ्याम्] (राममुपसृत्य, जनान्तिकं) वअस्स, दिट्ठिआ वट्ठसि समीहिदलाहेण। [वयस्य, दिष्ट्या, वर्धसे समीहितलाभेन]

राम :- सर्वमेतद्भवतः शिवानुध्यानेन ।

विदूषक :- (सोपालम्भनं, संस्कृतमाश्रित्य)

यः पूर्वं यदुपक्रमाय भवता भूयस्स्मृतोऽयं जनः
कार्ये तन्न फलोन्मुखे सति, कथं हा विस्मृतस्सोऽधुना ।
यद्वाऽहं त्वयि दोषमत्र विषये नारोपयामि प्रभो,
"राजानः किल कार्यबन्धव" इति व्यक्तः प्रवादो यतः ॥
–२८४

राम :- (ससान्त्वनं) वयस्य, सर्वदा मनस्येव सन्निहितोऽसि ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

शतानन्द :- (जनकं प्रति) सम्पन्नोऽत्र सीतारामयोः पाणिग्रहणविधिः।
निर्वर्तय तावदूर्मिलामाण्डवीश्रुतकीर्तीनामपि

जनक :- स एष कुशध्वजः पुरतस्तन्निर्वर्तयति।

शतानन्द :- (वसिष्ठं प्रति) ननु भगवता तत्र सन्निधातव्यम्।

वसिष्ठ :- पश्य, मन्निदेशाद्वामदेव एव सर्वं समयोचितं आचरति।

दशरथ :- शतानन्द, ब्रूहि, मद्वचनाद्वामदेवम्। निर्वर्तिते पाणिग्रहणमण्डले, निधाय वधूजनमन्तः पुरे, भरतलक्ष्मणशत्रुघ्नाः प्रेषणीयास्सत्वरमत्रैवेति।

शतानन्द :- तथा (इति निष्क्रान्तः)

वसिष्ठविश्वामित्रौ :- (राजानौ प्रति) इतोऽनुभूयतां नयनोत्सवः।

माण्डव्याः भरतः पाणिं ऊर्मिलायाश्च लक्ष्मणः।
श्रुतकीर्तेश्च शत्रुघ्नः श्रेयसे गृह्णते क्रमात्॥ -२८५

राजानौ :- (मुनी प्रति)

रुचिरिव माध्वीसितयोः
सङ्गादन्योन्यमावयोरधुना।
सम्बन्धेन भवद्भ्यां
सम्प्रति भूयोऽपि वर्धिता प्रीतिः॥ -२८६

वसिष्ठविश्वामित्रौ :- (जनान्तिकं)

रामात्मना रविकुलेऽजनि वासुदेवः
सीतात्मना निमिकुले कमलैव साक्षात्।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

तत्राऽनयोरुपयमेऽद्य निमित्तमात्रं

जाता वयं किल कुतश्चन भाग्ययोगात् ॥ -२८७

(प्रकाशं) सुघटितमेतत्सर्वं विधिना ।

[ततः प्रविशन्ति भरतलक्ष्मणशत्रुघ्नाः]

एष वः प्रणामपर्यायः (इति प्रणमन्ति)

इतरे :- भद्रमस्तु भवताम् ।

जनक :- (स्वगतं) (सानन्दं)

पुण्यं पुरा दशरथेन चिरात्कृतं यत्

पुत्रात्मना परिणतं तदशेषमस्य ।

ब्रह्माऽनुवेलमनुचिन्तितमात्मना यत्

जामातृतामुपगतं तदिदं ममापि ॥ -२८८

विश्वामित्र :- भगवन्मैत्रावरुणे, नन्वयमेव माङ्गलिको मुहूर्तो रामाभिषेकोत्सवस्य ।

वसिष्ठ :- (विचिन्त्य, सप्रत्यभिज्ञं)

सलिलमभिषेकार्थं हर्तुं सरित्सरिदीशतः

तपनपवनापत्यप्रष्ठाः केचित्कपयो गताः ।

न, कथमधुनाप्येते सर्वे द्रुतं न समागताः

त्वरयितुममूनाशु प्रस्थापितोऽपि विभीषणः ॥ -२८९

[ततः प्रविशन्ति विभीषणसुग्रीवहनूमन्तः]

"एतत्तीर्थानां पावनमुदकं"

(इति घटान्निधाय यथोचितं प्रणम्य स्थिताः)

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

राम :- (गुरून्प्रति)

कृच्छ्रे तस्मिन्नहमधिवनं यस्य साचिव्ययोगात्
जित्वा रक्षःप्रवरमितरैः सर्वथा दुर्निरीक्षम् ।
ईदृक्षस्य प्रबलयशसः साम्प्रतं पात्रमासम्
सोऽयं मित्रं मम रविसुतो जीवितं चापि साक्षात् ॥
-२९०

वसिष्ठ :- किं ब्रवीषि ?

एकाभिजनस्नेह-
ग्रथितो युवयोर्यदन्तरात्मैव ।
तदुचितमधुना सर्वं
विहितममुना किलात्मनीनमिदम् ॥ -२९१

राम :- शृणुत गुरवः ।

धर्मैकबद्धहृदयेन विभीषणेन
त्यक्त्वाऽमुनाग्रजमधर्मकृतप्रवृत्तिम् ।
प्रीत्याऽनुगृह्य जनमेनमकारि साह्यं
अप्रत्युपक्रियमिदं परिभावयामि ॥ -२९२

विश्वामित्र :- ननु बहूनां कैकसीसम्भवानामयमेकः एव धर्मास्पदम् ।

राम :- किं च, किष्किन्धा क्व क्वाऽम्बुधिः कुत्र लङ्का
सर्वं येन क्रान्तवानाञ्जनेयः ।
वीर्येणैतस्याद्य मे सर्वमेतत्
कीर्तिस्सीता राज्यमेते च यूयम् ॥ -२९३

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

लक्ष्मण :- किं बहुना,

दत्वा सीतोदन्तं

हृत्वा धरणीध्रमोषधीनां च ।

अमुनाऽद्भुतगुणचरितेन

आर्यश्चाहं च जीवितौ सद्यः ॥ –२९४

वसिष्ठ :- सत्यमयमीदृगेव ।

सुग्रीवविभीषणहनूमन्त :- (सप्रश्रयं) श्रूयतामार्यैः ।

अयं हि महाभाग :-

कथञ्चिदुपकारेण कृतेनैकेन तुष्यति ।

न स्मरत्यपकाराणां शतमप्यात्मवत्तया ॥ –२९५

भरतशत्रुघ्नौ :- अहो धन्याः परमेते । यदार्याप्येनानेवं बहुमन्यते ।

चन्द्रलेखा :- (जनान्तिकं) हला, कहं तुए उवण्णिदगुणो सो एसो पवणसुदो ? [हला, कथं त्वयोपवर्णितगुणः स एष पवनसुतः ?]

सीता :- अह इं [अथ किम्]

वसिष्ठ :- वत्स, रामभद्र, सन्निहितानीमानि मङ्गलोपकरणानि । विधाय तदालम्भनं इदमधितिष्ठ भद्रासनम् ।

राजानौ :- वत्स, त्वरितमशून्यं कुरु गुरुनियोगम् ।

राम :- यदाज्ञापयन्ति गुरवः । (इति तथा करोति)

विश्वामित्र :- वत्से, जानकि, त्वमप्यलङ्कुरु वत्सस्योत्सङ्गम् ।

(सीता सलज्जं तथा करोति)

CC-0 T Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

लक्ष्मणभरतशत्रुघ्ना :- (परस्परं) दिष्ट्या, पश्यामो राजानमार्यम् ।

सुग्रीवादय :-

भद्रासनाधिरूढः
प्रियया रामः श्रियं धत्ते ।
उदितस्योदयशृङ्गे
प्रभया सहितस्य साम्प्रतं भानोः ॥ –२९६

विदूषक :- (पुरतस्स्थित्वा) महाराअ, विअई होहि ।
[महाराज, विजयी भव]

वसिष्ठ :-

संवर्त इव मरुत्तं
गुरुरिव बर्हिर्मुखाधीशम् ।
कण्व इव प्राग्भरतं
त्वामिह विधिनाऽधुनाऽभिषिञ्चामि ॥ –२९७
(इति कलशावर्जनं नाटयति)

दशरथ :- गुरो, गृहाणेमं मुकुटम् । एतेन सम्भावय वत्सम् ।

वसिष्ठ :-

आमनोरादशरथात्
बहुभिर्यो नृपैर्धृतः ।
त्वदुत्तमाङ्गं तेनाद्य
मुकुटेन विराजताम् ॥ –२९८
(इति तदारोपणं नाटयति)

CC-0. SaTasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

राम :- अनुगृहीतोऽस्मि ।

दशरथ :- (सहर्षं)

अयं तावन्मूर्द्धा मम चिरतरं यस्य वहनात्
परिश्रान्तः सम्प्रत्यसहनविधां तस्य जरया ।
प्रकम्पन्व्याजेनप्रथयति, भरं तं रघुपतेः
शिरस्याधायाहं मुकुटमपि, जातोऽस्मि सुखितः ॥
–२९९

विश्वामित्र :-

अनुजा भरतप्रष्ठाः च्छत्रव्यजनपादुकाः ।
गृह्णन्तु, चामरे चेमे गृह्णीतां हरिराक्षसौ ॥ –३००

(सर्वे यथानिदेशमनुतिष्ठन्ति)

(आकाशे दुन्दुभिध्वनिः सर्वे सहर्षसम्भ्रमं कर्णं ददति)

वसिष्ठ :-

अभिषिक्तमवेक्ष्य रामभद्रं
प्रतिपन्नप्रमदैस्सुरैरशेषैः ।
त्रिजगन्निनदाऽद्वयं वितन्वन्
पटहः कोणहतस्समुज्जिहीते ॥ –३०१

दशरथ :- (ऊर्ध्वमवलोक्य) गगने किं वा विद्युत् ?
किमु शेषः किन्नु तारकावलयम् ? ।

जनक :- नेयं, नायं, नेदं,
चित्रं त्वेतद्विलोक्यते किमपि ॥ –३०२

CC-0 Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

वसिष्ठ :-

हृष्टेन हरिणा हारमुद्भासितहरिन्मुखम् ।
रामाय प्रेषितं, वायुरानयत्येष पश्यत ।। —३०३

विदूषक :- (ऊर्ध्वमवलोक्य) जाव एदं णिवडंतं एव्व गेह्णिस्सं ।
[यावदेतं निपतन्तमेव गृहीष्यामि] (इति ऊर्ध्वबाहुस्तिष्ठति)
सर्वे – (साश्चर्यं) अहो, चातुरी पवनस्य, यदयं रामकण्ठ एव निवेशितो हारः ।

विदूषक :- कहं वंचिदोह्मि पवणेण । [कथं वञ्चितोऽस्मि पवनेन ?]

विश्वामित्र :- (सर्वतोऽवलोक्य, सहर्षं)

मञ्जुगुञ्जदलिपीतमधूलिः,
सान्द्रसौरभभरी भरिताशा ।
पुष्पवृष्टिरभितो गगनाग्रात्
आपतत्यमरदारविमुक्ता ।। —३०४

दशरथ :- वत्स, रामभद्र अस्मिन्महाभिषेकमहोत्सवे, महोपकारिणः सुग्रीवविभीषणप्रभृतीन्, उचिताभिः सपर्याभिरुपचर ।

राम :- (सहर्षं, स्वगतं) कथं हृदयगतमेवाहुस्तातपादाः । (प्रकाशं) यदाज्ञापयन्ति गुरवः । (इति यथोचितं वसनभूषणादिभिरुपचरति)

सीता :- (स्वगतं) अहं वि तारिसे अच्चाहिदे महोवआरिणं पवणसुदं कहं उवचरेमि ? होदु, एव्वं दाव [अहमपि तादृशेऽत्याहिते महोप-

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

कारिणं पवनसुतं कथमुपचरामि ? भवतु, एवं तावत्] (इति कण्ठात् हारं विमुच्य, साकूतं राममवलोकते)

राम :- (सीतां प्रति, सस्मितं, जनान्तिकं)

प्रदेहि सुभगे हारं यस्य तुष्टाऽसि भामिनि ।
पौरुषं विक्रमो बुद्धिः यस्मिन्नेतानि सर्वदा ॥ –३०५

[सीता, सहर्षस्मितं हनूमतः कण्ठे हारमर्पयति]

हनूमान् :- (सप्रणामं) परमनुगृहीतोऽस्मि ।

(नेपथ्ये)

जयजय जगत्पते रामभद्र,

मन्वादयस्सार्वभौमाः यथाऽस्मान्पर्यपालयन् ।
तथैव रञ्जयन्राजन्, एधस्वाचन्द्रतारकम् ॥ -३०६

(प्रविश्य, पटाक्षेपेण सुमन्त्रः)

सुमन्त्र :- (सप्रणाम्) महाराज, सर्वाश्चैताः प्रकृतयः सोपायनपाणयः त्वामुपतिष्ठन्ते । तदेताः कृपाकटाक्षेण सम्भावय ।

[रामः, सर्वाः प्रकृतीः सस्मितं सादरमवलोकते]

वसिष्ठ :- वीक्ष्य राममभिषिक्तमवन्यां
केवलं न मुदिता वयमद्य ।
किन्तु, पश्यत चराचरमेतत्
विश्वमप्यधिगतातुलमोदम् ॥ -३०७

CC-0TSarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

विश्वामित्र :- राघवाभ्युदय एष चेतसा
याद‍ृगध्यवसितश्चिरान्मया ।
वीक्षितस्समधिकस्ततोप्यहो
कौशलं हि घटनाविधौ विधेः ॥ -३०८

तद्भगवन् मैत्रावरुणे, किमेतेषां भूयः प्रियमुपहरामि ।

जनक :- शुल्कं सीताविषये
कृत्वा दुस्साधमीदृशं सुचिरम् ।
सङ्कटसिन्धौ निपतितं
उद्धृतवानेष रामभद्रो माम् ॥ -३०९

तत्किमितोप्यन्यत्प्रियं मे ।

दशरथ :- शारदचन्द्रप्रतिम-
च्छत्रच्छायावृताननं रामम् ।
निध्यायन्नधुनाऽहं
निर्वृतहृदयोऽस्मि भूयसः कालात् ॥ -३१०

तदितोऽपि किमन्यत्प्रियमस्ति ।

राम :- दुर्धर्षं तदनुग्रहेण भवतां भग्नं धनुश्शाम्भवं
दारा रूपजुषः समुन्नतकुलोत्पन्नाः समासादिताः ।
दुर्दान्तः स हतो निशाचरपतिर्लब्धं यशो निस्तुलं
लोका वीतभयाः कृताश्च, किमतोप्यन्यत्प्रियं मेऽधुना ॥
-३११

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

तथापीदमस्तु भरतवाक्यम् –

अवतु विधिवशीश्वरो धरित्रीं
अनुसरतु प्रकृतिव्रजस्स्वधर्मम् ।
भवतु कृतिरियं भुवि प्रसिद्धा
भजतु मुदं भगवानपि प्रकामम् ।। -३१२

(इति निष्क्रान्तास्सर्वे)

॥ श्रीमति राघवाभ्युदये रामोद्वाहाभिषेको नाम सप्तमोऽङ्कः ॥

रचितं भगवन्नाम्ना श्रीगङ्गाधरसूनुना ।
राघवाभ्युदयं नाम नाटकं जयति क्षितौ ।। -१

॥ लेखकपाठकयोः शुभं भूयात् ॥

॥ श्रीतारायै नमः ॥ ॥ श्रीरामाय नमः ॥

॥ श्रीरस्तु ॥ ॥ हेरम्बाय नमः ॥

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

॥ श्रीः ॥

॥ एतन्नाटकस्थश्लोकानां अकाराद्यनुक्रमणिका ॥

		श्लोक.	पुट संख्या
अङ्गनासु मुदितासु	...	176	87
अटता प्रतिगृहं	...	220	107
अत्रैपा पदपङ्क्तिः	...	130	68
अत्रोदग्र	...	126	67
अद्रेरुत्प्लुत्य	...	244	116
अध्वश्रमेण	...	108	61
अन्तःपुरं	...	67	39
अन्तर्नियमितं	...	29	13
अन्यभाव	...	88	48
अनुजा भरतप्रष्ठाः	...	300	136
अपनयमपहाय	...	236	113
अपश्यन्ती	...	79	45
अपारपङ्का	...	168	84
अम्भः प्रसन्नं	...	45	24
अभिनवघन	...	11	5
अभिषिक्तमवेक्ष्य	...	301	136
अयमिह दश	...	250	118
अयं तावन्मूर्धा	...	299	136
अयं मकरकेतनः	...	163	82
अरुणव्रण	...	172	86

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

		श्लोक.	पुट संख्या
अवतु विधिवत्	...	312	139
अविरलभूरुह	...	144	72
अश्रुस्नपित	...	154	76
अशोकोऽपि	...	164	83
अस्मद्वियोग	...	109	61
अस्यामजस्र	...	50	30
अस्मिन्कुले	...	23	10
आमनोरादशरथात्	...	298	135
आमूलप्रकटा	...	46	25
आयातः श्रमणा	...	178	88
आर्येण प्रपदेन	...	186	92
आलीजनांस	...	59	35
इच्छति दर्शनं	...	77	43
इदमद्य धनुः	...	283	130
इदमिह वत	...	131	68
उच्चैस्तःस्तनित	...	263	121
उद्धरिष्यति रामः	...	204	100
उद्दामाभिः	...	40	18
उद्वाहोचितवेष	...	278	128
उन्मूलितःक्ष्मारुह	...	264	121
उन्मीलिताक्षाणि	...	135	69
उपकर्तव्याः सन्तः	...	189	93
उत्प्लुत्योत्प्लुत्य	...	90	49
ऊर्ध्वं चेदवलोकये	...	158	81

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

		श्लोक.	पुट संख्या
ऋणतस्त्विदिव	...	12	6
एकक्ष्माधिपतेः	...	6	3
एकाकिनीं	...	93	52
एकाभिजनस्नेह	...	291	133
एतद्वपुस्तेन	...	184	91
एतावन्तमनेहसं	...	268	124
एते गवाक्षगज	...	245	116
एष प्रस्रवणाख्यः	...	120	65
एष व्यायत	...	138	70
एषा पुष्कल	...	175	87
औशीरपङ्क	...	70	40
कच्चित्क्रियाः	...	33	15
कथश्चिदुपकारेण	...	295	134
कन्याजनक	...	28	12
कतिपयरजनी	...	258	120
कपिभटवारिद	...	259	120
कमला कमलेक्षणेंन	...	267	123
कस्याश्चिदम्वुज	...	176	87
क्रमान्मन्दाक्षं	...	157	80
कासार इव	...	58	34
किश्चिदाकृष्ट	...	188	92
किमपि किमपि	...	48	27
किष्किन्धा क्व	...	293	133
क्रीडति कश्चित्	...	174	86

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

		श्लोक.	पुट संख्या
कुतस्समरसङ्गतः	...	198	96
क्रुद्धोऽनुजात्मज	...	257	119
क्रुद्धः सेनावमर्दात्	...	253	118
कुर्वाणस्सकलान्	...	3	2
कुसुमाच्छादित	...	169	85
कृच्छ्रे तस्मिन्नहं	...	290	133
कृतः पित्रा	...	7	3
कृतरिपुनिधनः	...	266	123
कृत्यं निन्द्यं	...	85	48
क्रोशन्तीं राम	...	136	69
कौशिकोऽयं	...	60	35
गगने किं वा	...	302	136
गत्वा तूर्णं	...	182	90
गन्धर्वप्रवर	...	141	71
गुरुजनसविधे	...	51	30
गृहीतो यः पूर्वं	...	282	129
जाग्रत्यत्र	...	84	47
जानुभ्यामवनिं	...	124	66
जाम्बवदङ्गद	...	228	110
जाम्बवदङ्गद	...	201	98
जिज्ञास्या	...	15	7
जेतारं जगतां	...	103	57
तमात्तसायं	...	94	52
तव देववचस्सुधा	...	279	128

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

		श्लोक.	पुट संख्या
तव सञ्चरतः	...	32	14
त्वत्पादाम्बुज	...	111	61
त्वया विहित	...	71	41
त्वयि शासितरि	...	34	15
त्वं चेदुपेष्यसि	...	143	72
तवैव राजन्	...	17	8
त्वय्यन्तपारायण	...	230	111
तां च प्राज्यमिदं	...	210	103
तामालुलोक	...	66	39
तामाश्वासयितुं	...	223	108
तिरयति बाष्पः	...	54	31
तिष्ठ त्वमथवा	...	199	97
तैस्तैर्भाव	...	55	32
त्रैलोक्ये वल	...	100	55
दत्ता मयाद्य	...	281	129
दत्वा सीतोदन्तं	...	294	134
दम्पत्योर्मयि	...	75	43
दयितां विभाव्य	...	142	72
दहन्तमिव मन्युनां	...	241	114
द्रष्टुं दशरथः	...	275	127
दानाम्बुनिर्भर	...	171	85
दिस्टचा जयेन	...	256	119
दुर्धर्ष तदनुग्रहेण	...	311	139
दुष्टाः कुरङ्गाः	...	92	50

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

		श्लोक.	पुट संख्या
द्रुतसुवर्ण	...	86	48
दैवात्क्षत्र	...	16	7
धनुरटनिदत्त	...	247	117
धर्मात्मा सत्य	...	254	119
धर्मैकबद्धहृदयेन	...	292	133
धिक्कृतनन्दनं	...	152	76
धूमस्तोम	...	262	121
धैर्योत्कर्ष:	...	123	66
ननु भवद्विपया	...	20	9
नयविद्भि:	...	214	105
नार्यस्त्रिजगति	...	101	56
निकुञ्जभवन	...	127	67
निपीतपवनं	...	262	122
नियन्त्रितात्मा	...	5	2
निर्दह्य लङ्कां	...	221	107
निर्भग्नेषु समन्तात्	...	227	109
दिष्टया स धर्मा	...	226	109
निर्भिन्दन्नरुण	...	222	108
निरुध्य पदवीं	...	106	60
निरुपमरुचि	...	47	26
निरुपमरुचि	...	68	40
निर्गत्य वानरेन्द्रं	..	195	95
निर्मुक्तवाण	...	107	60
निवसद्भि:	...	13	6

CC-0T Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

		श्लोक.	पुट संख्या
निसर्गभीरवः	...	52	31
निसर्गसिद्धं	...	162	82
निहत्य वालिनं	...	188	93
नैसर्गिकमपि	...	116	63
पश्य त्वं रघुवीर	...	185	91
पश्यन्नपि	...	63	38
पश्य प्रांशु	...	128	67
प्रतिलभ्य सुतां	...	97	53
प्रतिकृतिमेतां	...	21	9
प्रत्यक्ष एव	...	166	84
प्रदक्षिणाभिः	...	269	124
प्रदीपितेऽपि	...	219	106
प्रदेहि सुभगे	...	305	138
पातितः शरवरेण	...	255	119
प्राङ्निर्माय	...	18	8
प्राप्त त्वां	...	180	89
प्राप्तः प्रवृत्ति	...	218	106
प्राप्तः पङ्क्तिरथः	...	277	127
प्रासादादवरोहणे	...	193	94
पीतो येन	...	117	63
पुण्यं पुरा	...	288	132
पुरायोऽसौ	...	140	71
पूर्वं त्वस्सप्तकृत्वः	...	99	55
पूर्वं प्रावृड्जल	...	229	111

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

			पुट संख्या
पृच्छति सखीं	...	80	45
पृतनाम्बरवारिधीन्	...	233	112
वद्धं सेतुमहं	...	242	115
ब्रह्मास्त्रेण निगृह्य	...	216	106
वाणेनैकेन	...	187	92
वाधापेशलं	...	78	44
वीभत्सां	...	43	19
भग्नं धनुः	...	102	56
भग्नं पुरौ धनुः	...	134	69
भग्नैरुपवनतरुभिः	...	215	105
भद्रासनाधिरूढः	...	296	135
भस्मत्रिपुण्ड्र	...	121	65
भिन्दन्नभो	...	96	53
भीता राक्षसराजात्	...	153	76
भृङ्गाली सा	...	167	84
भृशमयं	...	69	40
मकरन्दरसो	...	53	31
मञ्जुगुञ्जदलि	...	304	137
मन्दं मन्दं	...	73	41
मध्येसमुद्रं	...	237	113
मन्वादयस्सार्वभौमाः	...	306	138
मम भुजमुप	...	239	114
मम स्वशात्	...	191	94
मयि व्यथित	...	81	46

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

		श्लोक.	पुट संख्या
मयि दासानुदासे	...	179	89
मर्माविद्भिः	...	161	81
माण्डव्या भरतः	...	285	131
मां प्राप्तमन्तिकं	...	192	94
मामवधीर्य	...	200	97
मार्ग याचितुकामः	...	238	114
माल्यानि तानि	...	272	126
मिलदलिकुन	...	9	4
यतः पादनखाः	...	25	11
यत्त्रिलोकैक	...	61	37
यत्नः प्रतिकृति	...	49	28
यथाऽसौ सीत्कण्ठा	...	122	65
यद्घर्माम्भः	...	56	32
यदि राघव	...	217	106
यस्यैवाचार	...	4	2
यः कण्डूल	...	36	16
यः प्राक्कौणपतां	...	139	71
यः पूर्वं यदुपक्रमाय	...	284	130
या गतिर्यज्ञ	...	137	70
या मे विधुवदनायाः	...	132	68
या रथ्या रजनी	...	265	123
यार्या त्रेदवती	...	273	126
या लङ्का स्फुरित	...	224	108
याः पूर्वं	...	129	68

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

		श्लोक.	पुट संख्या
युद्धाय द्राक्	...	196	96
यूपाक्षत्रिशिरो	...	246	116
येन त्वमात्मभुज	...	212	104
येन प्राप्ते	...	31	14
यो मम दुर्लभः	...	83	47
योधा काचित्	...	190	93
रविसुतभृत्येन	...	202	99
रक्षसा भृशं	...	112	62
राघवाभ्युदय एषः	...	308	138
रामस्य पावनतया	...	41	18
रामात्मना रविकुले	...	287	131
रामे कुर्वति	...	95	52
रामेण प्रहितं	...	203	99
रामेण सम्प्रति	...	91	50
राज्ञा दशरथेन	...	276	127
रुचिरिव माध्वी	...	286	131
रुद्रादित्यमरुत्	...	270	125
रुद्धां राक्षस	...	151	75
रेखास्वस्तिक	...	24	11
रे निशाचर	...	211	103
लक्ष्मणविहिता	...	232	112
लिखता प्रतिकृतिं	...	26	11
लोकाञ्जेतुं	...	183	91
वसाना माञ्जिष्ठं	...	280	129

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

		श्लोक.	पुट संख्या
वारं वारं	...	74	42
व्याहन्तुं दशकन्धरं	...	105	60
विचिता नगरी	...	150	75
विजित्य कश्चित्	...	148	74
विदलितशाम्भव	...	118	64
विदेहकन्यकां	...	14	7
विधातुः प्रपौत्रं	...	208	102
विनयेनानत	...	72	41
विद्युद्वेल्लित	...	1	1
विभीषणस्य तत्कर्म	...	252	118
विवर्तयञ्जपवटीं	...	165	83
विवाहे निर्वृत्ते	...	113	62
विष्णोर्विक्रम	...	87	48
विहितं वानर	...	248	117
विहितावमतिं	...	240	114
विज्ञाप्य रामाय	...	251	118
वीक्ष्य रामं	...	307	138
वीर्यात्कार्मुक	...	22	10
शक्तः स्थातुं	...	104	57
शत्रूनपोह्य	...	114	62
शयानं दुग्धाब्धौ	...	35	15
शाणोल्लीढासि	...	263	122
शारदचन्द्र	...	310	139
शासिता दुर्विनीतानां	...	82	47

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

		श्लोक.	पुट संख्या
शिलाभावं	...	42	19
शिशिरक्लिष्टां	...	2	1
शीतीकृत्य	...	39	17
शुल्कं सीता	...	309	139
श्रुत्वोदन्तं तवेमं	...	181	89
शृण्वति समावस्थां	...	231	112
शैलः कोऽयं	...	119	64
शोकस्य हन्त	...	160	81
शोकाद्वैर्य	...	159	81
सञ्जातवास्प	...	57	33
सञ्जातोत्कलि	...	64	38
सदस्सम्प्रत्येव	...	30	13
सन्देशाद्भानु	...	243	115
सम्प्राप्ताः सैंहिकेयाः	...	261	120
सम्प्रत्यदभ्रं	...	76	43
सम्भूतमखिलं	...	19	9
सम्भूता वहवः	...	110	61
सम्भूतोऽयं	...	10	5
सम्प्लुष्टे समन्तात्	...	225	109
सम्प्रेक्षितुं सङ्करः	...	260	120
समारम्भः कृतः	...	235	113
समुज्वलाभिः	...	170	85
समुद्वाहः	...	27	12
सरभसपरि	...	133	69

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

		श्लोक.	पुट संख्या
सरभसमतिकाय	...	249	117
स्पर्शात्कस्यचित्	...	173	86
संवर्त इव मरुत्तं	...	297	135
सलिलमभिषेक	...	289	132
साचिव्यधुर्यो	...	8	4
साटोपं परिवद्ध	...	197	96
साम्प्रतं यियक्षमाणः	...	37	16
साम्प्रतं हृदयजेन	...	209	103
सिच्यन्तां गन्ध	...	205	101
स्थित्वा मम	...	274	126
सीताप्रवृत्ति	...	213	104
सीतां राघव	...	156	78
सीता हृतेति	...	125	66
स्थीयतामवहितेन	...	62	37
सुत्रामप्रमुखाः	...	207	102
सुबाहुरिषुणा	...	44	20
सुमरिअ सुमरिअ	...	155	78
सुरासुरैरपि	...	98	54
सूतप्रार्थनया	...	264	122
स्नेहस्स्नेहः	...	89	49
स्वैरं चन्द्रच्छायं	...	65	39
सौन्दर्यमाभिजात्यं	...	206	102
सौधादधस्तात्	...	194	94
स्वं धन्यं मनुते	...	271	125
हत्वा शक्रसुतं	...	146	74

CC-0. Saraswati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

		श्लोक.	पुट संख्या
हरता राघव	...	145	73
हरितो भरिता:	...	149	75
हर्ष: कार्मुक	...	115	62
हृष्टेन हरिणा हारं	...	303	137
हृष्टो जाम्बवतो	...	147	74
क्षणपरिचय	...	38	17

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

CC-0. Saraswati Mahal Series. Digitized by Sri Muthulakshmi Research Academy